श्रीमन्महाकविभारविप्रणीतम्

किरातार्जुनीयम्

महाकाव्यम्

टीकमाणीसंस्कृतकालेजाध्यक्षपण्डितप्रवर-
श्रीमत्ताराचरणभट्टाचार्य्य काव्यतीर्थ-
साहित्याचार्य्येण
संशोधितया
प्रसिद्धसाहित्याध्यापक-
श्रीजानकीनाथभट्टाचार्य्यकाव्यव्याकरण-
तीर्थविद्याभूषणसाहित्यशास्त्रिप्रणीतया

दण्डान्वय-वाच्यान्तर-व्याकरण सरलार्थ-कोषविग्रहालङ्कारसमा-
लङ्कृतया परीक्षार्थिनां परमोपयोगिव्याख्यया समेतम्

ग्रन्थकारेणैव प्रकाशितम्

सन् १९३४ अगस्त

समर्पणम्

विद्यार्थिनांकृते यस्मात् कृतेयं विमला कृतिः।
समर्प्य तेभ्य एवाहं यातोऽस्मि कृतकृत्यताम्॥

—:o:—

दिव्यास्त्रलाभाय समाकुलस्य
यस्य प्रभावैस्तपसां प्रसन्नः।
कैलासवासं विरहय्य शम्भुः
किरातरूपेण तुतोष जिष्णौ॥

तस्येन्द्रसूनोः शशिशेखरस्य
कथाप्रपञ्चेन मनोहरस्य।
श्रीभारवेः सर्वजनाभिरम्यं
व्याख्यानमाख्याय लभेयतृप्तिम्॥

सनातनब्रह्मकुलावतंसो
यो धर्म्मगोप्ता शुनकः पुरासीत्।
तद्गोत्रवंशक्रममाधितिष्ठन्
श्रीजानकीनाथजनोऽभिजातः॥

विज्ञप्तिः

अस्ति किरातार्जुनीयं नाम साहित्यकुसुमकाननेषु प्रधानीभूतमेकं महाकाव्यकुसुमम्। यदिदमर्थगौरवसौरभे निखिलबुधवरपरमादरभ्रमरसुसंगतमतीव रमणीयं प्रतिभाति। यच्चैतावत्कालमतुलनीययशसामनेकविदुषामुपेक्षातीव्रतपनतापेन तेषां प्रयत्नजलसेकविरहेण वा विशेषविकाशविहीनतया रसगुणालंकारमधुनिकरयुक्तमप्यशक्तमितस्ततो भ्रमतां विद्यार्थिवृन्दमानसमधुपानामानन्दं संवर्द्धयितुमितिदृश्यते दृश्यते च दुरवगम्यया श्रीमत्कोलाचलमल्लिनाथघनविनिर्गतया व्याख्याबिन्दुमालया सुप्रकाशरहितमितीदानीं तस्य सर्गत्रयस्य तामेवावलम्बयताश्रीमताकाव्यव्याकरणतीर्थजानकीनाथभट्टाचार्यण साहित्यशास्त्रिणाऽपरिमितपरिश्रमसलिलसेकसम्भारैःसमस्तश्लोकमुकुलानांसरलान्वयवाक्यान्तरव्याख्याव्याकरणकोषविग्रहालंकारविकाशं जनयता भारतसंस्कृतसाहित्यकुसुमोद्यानस्यातितमांरमणीयतां विधाय साहित्यिकापूर्वभावदेवतापूजार्थं परीक्षार्थिविद्यार्थिसंघभृङ्गानामनायासाध्ययनजनितानन्दमधुसंग्रहार्थञ्च अनेनैवाधुना विदुषा

जगति महानुपकारः सम्पादित इति मन्यते मन्यते चास्य विविधशास्त्रमलयाचलप्रभूतविद्यागौरवचन्दनगन्धं मन्दं वहता कर्मान्तनिसमीरणेन शीघ्रमेव सर्वेषां भारतप्रदेशवासिना मन्येषामपि निरन्तरविपुलसुखसम्प्रदेन भवितव्यमिति । किंबहुनाऽस्य सुलेखमिममवलोकयता मयानन्दमन्दाकिनीजलावगाहं विधाय पूनहृदयेन आशास्यते तावदसौ भगवद्विश्वनाथकृपया सम्भूय दीर्घायुरवश्यमन्येषामपि ग्रन्थकुसुमानां विकाशंकरिष्यतीत्यस्माभिरवलोकयिष्यत इति ।

श्रीवामाचरणभट्टाचार्य्यस्य

सुप्रसिद्धपण्डितानांमतम्

श्रीरामचन्द्राय नमः

श्रीमत्पण्डित-जानकीनाथसाहित्यतीर्थ-संकलितं किरातार्जुनीयस्य साङ्गोपाङ्गं व्याख्यानं छात्राणा मतीवोपकारकं सरलं हृद्यं चेति पुस्तकस्यास्य पर्यालोचनया मया निर्धारितमिति प्रतिपादयति ।

काशीस्थो

२४।३।३४। हाराणचन्द्रभट्टाचार्यः ।

उपयोगि सेतस्यतीदम्पुस्तकन्तेषां विद्यार्थिनां येषां कृते प्रणीतमिदम् । अस्मिन् ग्रन्थे प्रथमंमूलश्लोका लिखिताः तदनन्तरन्तेषामन्वयः, ततो वाच्यपरिवर्त्तनं, ततोव्याख्या, तत स्सरलार्थस्ततोऽलंकाराः, ततः कौमुदी—अर्थाद् व्याकरण-सम्बन्धिनो विषयाः । एवम्प्रकारेण पर्याप्तोऽयं सन्दर्भः ।

काशीनाथशर्म्मा

काशीतः भूतपूर्वसंयुक्तप्रान्तीयसंस्कृत

२०।५।३२ पाठशालानिरीक्षः ॥

श्री विश्वनाथः

काव्यव्याकरणव्याख्याध्यापनादिविचक्षणः ।
विप्रः श्रीजानकीनाथकविराजो विराजते ॥
तेन भारविकाव्यस्य व्याख्यानं यत् कृतं नवम् ।
विद्यार्थिनां तद् वहूना मधुनोपकरिष्यति
अत्रान्वयः प्रतिश्लोकं वाच्यान्तर मतः परम् ।
व्याख्यातः सरलार्थश्च सम्यक् सरलया गिरा ॥
मल्लिनाथगुरोर्व्याख्या सुलभात्र पदे पदे ।
ततः सुवोधमेतद्धिपाठ्यं विद्यार्थिभिः सुखम् ॥

२७।९।३४

महामहोपाध्याय

श्रीफणिभूषणतर्कवागीशस्य

श्री श्री गौरकृष्णः शरणम्

चिराय.........पण्डित-श्रीजानकीनाथशर्मभट्टाचार्यमहोदय-विरचितां किरातार्जुनीयमहाकाव्यस्यादितःसर्गत्रयस्य टीकामालोच्य सम्भावयंश्चैनया प्रविविक्तुश्छात्रोपकृतिम् । आशासानश्च भगवदनुकम्पया अन्वहमिदमीयप्रचारम्······विरमति मुधा विरतारादिति ।

वैसं १६६१

मातृनवम्यां

काश्याम्

गोस्वामि

श्रीदामोदरशास्त्री ।

ओम् नमो भगवते वासुदेवाय ।

प्रथमसर्गस्य संक्षिप्तेतिवृत्तम्

(१) अक्षक्रीडायां पराजितो राजा युधिष्ठिरो भ्रातृभिर्द्रौपद्या च समं वनवासमाश्रितः कदाचिद् दुर्योधनस्य प्रजापालनवृत्त-परिज्ञानाय कञ्चिद् वनेचरं प्रेषयामास । स वनेचरो ब्रह्मचारि-वेशं धृत्वा सर्वं परिज्ञाय द्वैतवने युधिष्ठिरसकाशमागत्याचख्यौ ।

(२) राजन् ! भवदुपदिष्टेन मार्गेणाऽहं सर्वं सुयोधनस्य गूढमपि वृत्तजातं विज्ञातवान् । तदहं यथास्थितं सर्वं निवेदयामि श्रूयताम् । यदि वात्र किञ्चिदप्रियमस्ति तदपि प्रयोजनानुरोधेन भवता सोढव्यम् ।

(३) अक्षक्रीडाकपटेन लब्धं राज्यं स्थिरीकर्त्तुं स राजा सुयोधनः सामादीनुपायान् यथायथं विभज्य प्रयुङ्क्ते । मनुप्रणीतेन मार्गेण प्रतिक्षणं सावहितः सर्वान् व्यवहारान् पश्यति प्रजानां कल्याणाय पूर्त्तादिकं सम्यगनुष्ठितवांस्तेन राज्यं शस्यसमृद्धि-युक्तं प्रजाश्च निरुपद्रवाः सुसमृद्धास्तस्मिन् नरपतौ गाढा-नुरक्ताः सन्ति । किं बहुना तस्य राज्ञो गुणैरावर्जिताः प्रजाः प्रीत्या प्रभुतानि धनानि तस्मा उपाहरन्ति । स्वपरराष्ट्रेषु सुदक्षा आत्मीयाश्चाराः प्रयुक्ताः । तैश्च स राजा सर्वेषां नरप-पतीनां सर्वं वृत्तं जानाति न तु तस्य राज्ञो वृत्तं फलात् प्राक् केनाप्यवगन्तुं शक्यम् । तद्गुणानुरागिणः सामाद्यु-पायवशीकृता नृपतयःसर्वदैवोपाहरन्ति तस्मै प्रभुतानि रत्नानि ।

बहवो धनुर्धारिणो युधि लब्धयशसो वीराः स्वप्राणव्ययेनापि तदुपकारं साधयितुमिच्छन्ति। एवं राज्यं वशीकृत्य यौवराज्ये दुःशासनं संस्थाप्य पुरोहितसहायः स धर्म्मं सेवते। धर्म्मार्थकामान् सममेव सेवमानः स भवतोऽपि अधिकान् गुणानात्मनः प्रकटयति। किं बहुना सर्वथा नोपेक्षणीयो वर्धमानो रिपुरिति विचार्य भवान् यथोचितं प्रतिविदधातु।

(४) वनेचरस्य वचनं निशम्य राजा परितुष्टस्तस्मै पारितोषिकं दत्तवान्। स च वनेचरः पारितोषिकं गृहीत्वा प्रतिगतः। अथ राजा तत् सर्वं वनेचरकथितं वृत्तं भार्यायै अनुजेभ्यश्चाख्यातवान्। तच्छ्रुत्वा द्रौपदी शत्रुकृतान् दुर्व्यवहारान् स्मृत्वा व्याकुला सती राजानं प्रदीपयन्ती सम्भाषितवती।

(५) हे महाराज ? भवतः पूर्वपुरुषैः प्रतिपालितं राज्यमधिगम्यापि भवता प्रमादेन शत्रुभिरपहारितम् महदेतद् दुःखं यद् भवतोऽपि ईदृशी दुरवस्था जाता भवान् हि पुरा ब्राह्मणान् भोजयित्वा भुक्तावशिष्टैरन्नैस्तृप्तिं गतः। सम्प्रति तु वन्यफलैर्जीवति। योऽयं महावीरो भीमसेनो रथमारुह्य सदर्पं राजमार्गेषु तत्र तत्राचलत् सोऽयमधुना पादचारेण वनस्थलीषु चरति। योऽसौ धनञ्जयो धनानि विजित्यायच्छत् सोऽधुना ते वल्कलवस्त्रमाहरति। इमौ राजपुत्रौ नकुलसहदेवौ सुकुमारौ पुरा तत्तत्सुखमनुभूतवन्तावधुना कीदृक् दुःखं सहेते। एतत् सर्वं विलोक्य मम हृदयं सुतरां सन्तप्तं। न जाने कथङ्कारं सहते भवान्। क्षमा हि तपस्तपस्विनामेव कामादिजयेन तपःसिद्ध्युपायो न राज्ञाम् शत्रुवधोपायः। अतो भवान्

क्षमां विहाय शत्रुवधाय क्रोधम् यथोचितमुत्साहञ्च विदधातु एवं चेदनभिमतं मम वचनं ततो वृथा किमिदं धनुर्वहसि विहाय राजवेशमवलम्ब्य यतिवेशं यथासुखं तिष्ठतु। अथ यदि रोचते मद्वचनं तदा रिपून् पराभूय अचिरेणाभ्युदयं लभताम्।

द्वितीयसर्गस्य संक्षिप्तेतिवृत्तम्।

(१) अथ द्रौपद्युक्तं वचनं निशम्य भीमोऽपि ओजस्वि युक्तिपूर्णं च वचनमवोचत्—

(२) राजन्नियमस्माकं हितेच्छया सर्वतो विचार्य यदभिहितवती तद्वचनं सत्यमेव विस्मयजनकमतीवोपकारि गुणवच्च अतः सर्वथा गुणानुरागिणा भवता ग्रहणीयमिदम्। द्विषतां योयमभ्युदयः आत्मनश्च परिक्षयः तौ कदापि नोपेक्षणीयौ सम्यग् बलवीर्यशालिनो वयं चत्वारस्ते भ्रातरः शत्रूनुन्मूलयितुं समर्थास्तथापि भवान् किं भीतभीतइव कालमेव प्रतिक्षते। अथाधुनापि यदि स उपेक्ष्येत तदा त्रयोदशवर्षावसाने राज्यलाभो दुष्कर एव स्यात् विना युद्धं स कदापि न प्रत्यर्पयेद्राज्यम् अथ यदि प्रत्यर्पयेदपि तद्राज्यं तदास्माकं बाहुवीर्यैः किं कृतम्। अभिमानिनो हि स्वयं शत्रून् विजित्योपार्जितां श्रियं भोक्तुकामाः। न कदापि परानुग्रहलब्धं भोगं श्लाघनीयं मन्यन्ते। अतः शत्रून् हत्वा तद्वनिताश्रुसेकैर्निर्वापयतु क्रोधवह्निम्।

(३) अथ राजा युधिष्ठिरः क्रोधेन चञ्चलं लुप्तधैर्यं भीमसेनं सान्त्ववचनैः प्रशमयितुमुपक्रमते स्म।

(४) भ्रातर्यदिदं त्वया बलपक्षमवलम्ब्य युक्तियुक्तमशास्त्रविरुद्धं वचनमभिहितं तत् सर्वथा भवद्विधानामेवार्हं वचनम् सर्वथा सर्वगुणोपेतं नीतिशास्त्रसम्मतमेतद् भवन्मतमवगत्यापि संशयवानेवास्मि कञ्चिदर्थं प्रति। सन्धिविग्रहादिकं विधाय निर्विघ्नः समृद्धिलाभो दुष्कर एव। सहसा न किञ्चित् करणीयम् क्रोधस्य वशं गता नृपतयोऽविमृश्य प्रवर्त्तन्ते ध्वंसमुपयान्त्यचिरेणैवेति सर्वथा विमृश्याचरणीयम्। सुयोधनो हि मदमानसमुद्धतः प्रयोजनवशादेव आत्मानं विनीतमिव दर्शयति सम्पदान्धः सोऽचिरेणैव नृपतीन लङ्घयिष्यति। तस्य क्षुद्राशयतया प्रजा अपि विरक्ताः स्यु रतः स कालान्तरेऽपि जेतुं सुकर एव। तथापि किमसामयिकं कोपं दर्शयसि। धैर्यमवलम्ब्य कञ्चिदेव कालं प्रतीक्षस्व। यादवा नृपा अन्ये च बहवो नृपाः सदैवास्मत्पक्षा एव प्रयोजनवशादेव तदधीनास्तिष्ठन्ति। ते समये सर्वेऽप्येनं परित्यक्ष्यन्ति अतः क्रोधं त्यज। धैर्यमवलम्ब्यस्वान्तःप्रकृतिप्रकोपजो-वह्निरेवैनं धक्ष्यति।

(५) यदा युधिष्ठिरो भीममेवं सान्त्वयति तदा तत्र कृष्णद्वैपायनो मुनिरुपस्थितः। अथ पाद्यादिभिस्तं सत्कृत्य महार्हे आसने समुपवेश्य च तदनुमत्या स्वयमप्यासनमधितष्ठौ।

तृतीयसर्गस्य संक्षिप्तेतिवृत्तम्।

(१) अथ धर्म्मराजो मुनिं द्वैपायनं कृतोचितसत्कारं सविनय-मुवाच।

(२) अद्य सफलो मे जन्मलाभः लब्धं मया यज्ञादिधर्म्माणां फलम्, फलितानि ब्राह्मणानामाशीर्वचनानि यद्भवन्तो मे दृग्विषयीभूताः। अहो महान्ति मे पुराकृतानि पुण्यानि, अहो अस्मि कल्याणानां भाजनम्, अद्याहं जगति बहुमानपात्रं जातोऽस्मि। किं बहुना भवत्साक्षात्कारलाभः सर्वेषां शुभानां निदानं। सर्वाघौघप्रध्वंसनं चेति मे चित्तं चिरेण शांतिमाप्नोति-निस्पृहाणां भवादृशानां यदि चास्मत्सकाशे किमपि काम्यं नास्ति तथापि ममैव कल्याणाय भवद्वचनं श्रोतुं नितरामुत्कण्ठितोऽस्मि।

(३) सविनयमेतदुक्तवति नरेन्द्रे कृष्णद्वैपायनो मधुरैर्वचनैः स्वागमनप्रयोजनमकथयत्।

(४) राजन्। तपोधनानां सर्वेषु जनेषु समैववृत्तिर्युज्यते तथापि धार्मिकाणां भवत्सदृशानां गुणेषु मम पक्षपातो जात इति न दोषाय। सदाचारसम्पन्नेषु साधु सर्वेषां पक्षपातो भवत्येवेति तव गुणौघैर्मम चित्तं नितरामावर्जितमिति तवकल्याणार्थमेवोपदेष्टुमागतोऽस्मि। यूयं हि धृतराष्ट्रस्य कनीयसो भ्रातुस्तनयाः स्वतनयेभ्योऽपि गुणवत्तमास्तथापि विषयवासनामुग्धः स वृथा युष्मान् त्यक्तवानिति महदन्याय्यं कृतं तेन। भवतु नात्र भवता मनः खेदनीयमचिरेणैव राजश्रीर्भवदङ्कगता भविष्यति। परं भीष्मद्रोणकर्णादयो धनुर्धरा दुर्योधनसहायाः सन्ति तञ्च जेतुं युष्माकं न कोऽपि क्षमः तांश्चाऽजित्वा न ते राज्यलाभो भविष्यतीति स्वबलोत्कर्षाय भवता यतितव्यम्। एतदर्थमेवाहमागतः। अर्जुनः खलु मम सकाशात् ऐन्द्रं मन्त्रं

गृहीत्वा तपश्चरतु तपसा हि समधिकं वीर्यं देवतानुग्रहेण प्राप्यतथैवासौ भीष्मादीन् जेतुं शक्यति ।

(५) अथार्जुनो युधिष्ठिरादेशेन मुनिसकाशात् मन्त्रं जग्राह मुनिरपि तपःप्रभावेण तस्मै योगविद्यां वितीर्य तपःसाधनरीतिमुपादिशत् । आदिष्टवांश्च "आत्मरक्षार्थं सायुध एव तपश्चर । यत्र पर्वते तपश्चरिष्यसि एष समागतो यक्षस्तं पर्वतं त्वां नेष्यति ।" एवमुक्त्वा मुनौ गते यक्षस्तत्रागतः । अथ भ्रातरो द्रौपदी चार्जुनविरहेण व्याकुला अपि कार्यानुरोधेन धैर्यमवललम्बिरे । तत्रापि स्त्रीस्वभावात् द्रौपदी शोकव्याकुलार्जुनं वाष्पगद्गदया वाचा सम्भाषितवती ।

(६) भो वीर ! त्वं खलु महाप्रभावोऽपि मेघैः सूर्य इव शत्रूणां कपटप्रबन्धेऽनाभिभूतोऽसि । शत्रुभिर्यथा वयं पराभूताः तत् सर्वं खलु दुःखं विस्मृतप्रायमिदानीं पुनर्नवीभूतं सत् नितरां क्लेशयति । त्वं खलु योग्योऽसि शत्रुविलुप्तं यश उद्धर्तुं यदि त्वं न प्रवृत्तो भवेः प्रतीकाराय । तदा वृथैवासि क्षत्रियो, वृथैव वहसि कार्मुकम्, अतः सर्वथा व्याकुलो भूत्वा तपश्चर । अस्मद्विरहेण खिन्नो मा भूः एवं तपःसिद्धं प्रत्यागतं त्वां तदानीमेव विशेषेण सम्वर्धयिष्यामि । गच्छाधुना देवताप्रसादात् तपःसिद्धिरस्तु ते ।

(७) अथार्जुनो द्रौपदीवचनेन शत्रूणाम् अपकारान् स्मृत्वा भृशं प्रदीप्तो बभूव । योधोचितं वेशं विधाय तेन यक्षेण सह प्रस्थितवान् ।

॥* नमः शिवाय *॥

किरातार्ज्जुनीयम्

महाकाव्यम्

प्रथमः सर्गः

नमामि जगदाराध्यं साक्षाद्ब्रह्मसनातनम् ।
शिवेतरक्षयो यस्य स्मरणात् सशिवं शिवम् ॥

सुकविप्रसिद्धमहाकाव्यलक्षणसमलंकृतमिदं महाकाव्यं, श्रीमन्महर्षिवेदव्यासप्रणीतमहाभारतान्तर्गतवनपर्वतो द्यूतक्रीडायां

पराजयं प्राप्य, द्वादशवर्षाणि वनवासं स्वीकुर्वतां द्वैतवनस्थानां पाण्डवानां वृत्तमधिकृत्य, तत्रभवता महाकविना भारविणा विरचितम्। अत्र कविद्यूतकथाप्रसङ्गेन, सुगभीरामर्थभूयिष्ठां राजनीतिं यथाशास्त्रं वर्णितवांश्च। ग्रन्थेऽस्मिन् किरातवेषधारिणा भगवता महादेवेन सह, तपस्यतो धनञ्जयस्य युद्धं, तथा प्रसादिताच्चन्द्रशेखरात् तस्य पाशुपतास्त्रप्राप्तिञ्च, महाकविः प्रधानतया वर्णितवान्॥

नायकादिज्ञानाय संग्रहश्लोको यथा—

"नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज—
स्तस्योत्कर्षकृतेऽनुवर्ण्यचरितो दिव्यः किरातः पुनः।
श्रृंगारादिरसोऽङ्गमत्र विजयी वीरप्रधानो रसः,
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम्"–॥

ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामो ग्रन्थकारो देवतावाचकश्रीशब्दप्रयोगपूर्वककाव्यमारभते। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः। ते सर्वे, नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा। इतिस्मरणात्। "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुख"–मितिस्मरणाच्च। वस्तुनिर्देशरूपंकथामुखमुपक्षिपति—श्रिय इत्यादि।

-×-

श्रियः कुरूणामधिपस्य पालनीं,
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ,
युधिष्ठिरं द्वैतवने वनेचरः ॥१॥

अन्वयः

कुरूणां, अधिपस्य, श्रियः, पालनीं, प्रजासु, वृत्तिं, वेदितुं, [युधिष्ठिरः] य, अयुङ्क्त, वर्णिलिङ्गी, सः, वनेचरः, विदितः, [सन्] द्वैतवने, युधिष्ठिरं, समाययौ ॥

वाच्यान्तरम्

कुरूणामधिपस्य......युधिष्ठिरेण यः अयुज्यत, वर्णिलिङ्गिना तेन वनेचरेण विदितेन द्वैतवने युधिष्ठिरः समायये ॥

व्याख्या

कुरूणामिति कुरूणां निवासो जनपदः कुरवः तेषाम् *अधिपस्य* कुरुदेशभूपतेः, राज्ञः सुयोधनस्य इत्यर्थः । *श्रियः* राज्यसम्पदः *पालनीं* पाल्यते रक्ष्यते यया वृत्त्या,-ताम् *प्रजासु* जनेषु "प्रजा स्यात् सन्ततौ जने" इत्यमरः *वृत्तिं* आचरणं, यादृग्व्यवहारेण प्रजाः पालयतो भूपतेः प्रतिष्ठा भवति, राज्ञः सुयोधनस्य तादृग्व्यवहारो वर्तते न वा इति *वेदितुं* ज्ञातुम् *यं* वनेचरं वनेचरतीति वनेचरस्तं द्वैतवनस्थं कञ्चित्

म्लेच्छजातीयं पुरुषम् *अयुङ्क्त* नियोजितवान्,सम्यग्राज्यवृत्तान्तपरिज्ञानाय प्रेषितवान् इत्यर्थः *वर्णिलिङ्गी* वर्णः प्रशस्तिरस्यास्तीति वर्णी "वर्णादिन् ब्रह्मचारिणि" इति सूत्रेण इन्,तस्य लिङ्गं चिह्नं विद्यते यस्य स ब्रह्मचारिवेशधारी वनेचरः*विदितः* विदितः वेदनं ज्ञानमितियावत् अस्य अस्तीति ज्ञानवान्, परवृत्तान्तज्ञः सन् इत्यर्थः। *द्वैतवने* द्वौ शोकमोहौ इतौ गतौ यस्मात् तत् द्वीतम्, द्वीतमेवेति द्वैतं शोकमोहरहितं, द्वैतञ्च तद्वनञ्चेति द्वैतवनम् शोकमोहरहितवनम्, तस्मिन्, यद्वा द्वैतनामकवनं तस्मिन् द्वैतनामके वने इत्यर्थः *युधिष्ठिरं* युधि रणे तिष्ठतीति युधिष्ठिरः तं धर्म्मराजम् *समाययौ* तत्समीपे समुपस्थितः इति भावः ॥

सरलार्थः

द्वैतवनस्थो धर्मराजो युधिष्ठिरः प्रजासु दुर्योधनस्य व्यवहारपरिज्ञानाय यं वनेचरं नियुक्तवान, स वनेचरो ब्रह्मचारिच्छद्मवेशं धृत्वा तत्र गत्वा सर्ववृत्तान्तं परिज्ञाय, तत्सर्वं युधिष्ठिराय निवेदयितुं, युधिष्ठिरसकाशं प्रत्याजगाम। सर्गेऽस्मिन् वंशस्थवृत्तम्, तदुक्तम्—"जतौ तु वंशस्थमुदीरितं जरौ" इति ॥

'वने वनेचर'—इत्यत्र वृत्त्यनुप्रासोऽलङ्कारः वकारनकारयोरावृत्तेः। तदुक्तम्—" अनेकस्यैकधा साम्यमसकृद् वाप्यनेकधा। एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते।" इति।

कौमुदी

'किरातार्ज्जुनीय'मिति—किलकिलेत्यव्ययम्, 'किलकिले'ति—शब्दायमानाः, अतन्ति गच्छन्तीति किराताः मयूरपुच्छपरिधानाश्चाण्डालभेदाः 'भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः"—इत्यमरः। तद्रूपवान् महादेवोऽत्र किरातशब्देनोच्यते। अर्जुनस्तृतीयपाण्डवः, किरातश्च अर्जुनश्च इतिद्वन्द्वे "अभ्यर्हितञ्चे"तिवार्त्तिकसूत्रेण किरातस्य पूर्वनिपाते, किरातार्ज्जुनौ तावधिकृत्य कृतमिदं काव्यमितिवाक्येन, शिशूनां क्रन्दः शिशुक्रन्दस्तमधिकृत्य कृतो ग्रन्थः-'शिशुक्रन्दीय'इतिवदत्रापि, "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छ"-इत्यनेन 'छ'प्रत्ययः। 'कुरूणामि'ति-कुरुशब्दात् "तस्य निवास"इत्यण्-प्रत्ययः, तस्य जनपदार्थे लोपः। "षष्ठी शेषे"-इति षष्ठीविभक्तिः। 'श्रिय'-इति'पालनी'ति कृत्प्रत्ययस्य प्रयोगे, "कर्तृकर्म्मणोः कृति"-इत्यनेन कर्म्मणि षष्ठी पालनीति-पाल्यते अनयेति वाक्येन, "करणाधिकरणयोश्चे"ति सूत्रेण ल्युट्प्रत्ययः। ततस्त्रियां ङीप्। 'विदित' इति "अर्श आदिभ्यश्चे"तिसूत्रेण 'अच'-प्रत्ययः। पीता गावः—भुक्ता ब्राह्मणा इतिवत्। 'वनेचर' इति "चरेष्ट"-इत्यनेन 'ट'प्रत्ययः। "तत्पुरुषे कृति बहुल"मित्यनेन सप्तम्या अलुक्। 'युधिष्ठिर'—इत्यत्रापि सप्तम्या अलुगेव। 'अयुङ्क्त'ति रुधादिगणीययुज्धातोर्लङि रूपम्. 'वर्णिलिङ्गी'ति 'द्वैतवने' इति च व्याख्यायां द्रष्टव्यम्॥

-×-

युधिष्ठिरसमीपमागतस्य वनेचरस्य, दूतोचितं व्यवहारं, तथा कार्यनैपुण्यं, दर्शयितुमाह—

कृतप्रणामस्य महीं महीभुजे,
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि प्रियं,
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

अन्वयः

कृतप्रणामस्य, सपत्नेन जितां, महीं, महीभुजे, निवेदयिष्यतः, तस्य मनः, न, विव्यथे, हि, हितैषिणः, मृषा, प्रियं, प्रवक्तुं, न, इच्छन्ति ॥

वाच्यान्तरम्

मनसा न विव्यथे हितैषिभिः..... न इष्यते ।

व्याख्या

कृतप्रणामस्य कृतः प्रणामः नमस्कारो येन तस्य इति बहुव्रीहिः, प्रणतस्य आदौ नमस्कारं विधाय स्थितस्येत्यर्थः, अनेन भृत्यस्य विनयित्वं सूच्यते । *सपत्नेन* शत्रुणा दुर्योधनेन "रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः" इत्यमरः । *जितां* छलेन गृहीतां वशीकृतामिति यावत् *महीं* पृथिवीम् *राज्ञे* युधिष्ठिराय * निवेदयिष्यतः * विज्ञापयिष्यतः कथयिष्यत इत्यर्थः । *तस्य* वनेचरस्य किरातस्य *मनः* चित्तम् "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मन" इत्यमरः । *न विव्यथे* न दुःखितमभूदित्यर्थः । 'शत्रुणा राज्यं विजित्य यथाविधि प्रतिपा-

लितमि'त्थमप्रियं, राज्ञे कथं निवेदनीयमिति विविच्य, स न चचाल इति भावः। व्यथाभावे समर्थकं कारणमाह*हि* यस्मात् *हितैषिणः* हितं मंगलं एषितुम् अन्वेष्टुं स्वभावो येषां ते, शुभाभिलाषिणो जना इत्यर्थः। *मृषा* असत्यम् *प्रियं* श्रुतिमधुरं वचनम् *प्रवक्तुं* कथयितुं *न इच्छन्ति* न वाञ्छन्ति। असत्यं प्रियवचनं स्वामिने कथयन्तो भृत्याः कार्यविघातकतया सर्वथा स्वामिद्रोहिण एव स्युरिति भावः॥

सरलार्थः

कुरुराज्ये प्रजासु, दुर्योधनस्य व्यवहारं सम्यक् ज्ञात्वा, स वनेचरो युधिष्ठिरसमीपं प्रत्यागत्य, राजानं प्रणम्य च, सुशासनेन शत्रुणा राज्यं वशीकृतमिति निवेदितवान्। इत्थमप्रियं राज्ञे कथं निवेदयामीति मनसि चिन्तयित्वा, न खिन्नोऽभूत्। अप्रियसत्यभाषणमेव स्वामिहिताभिलाषिणा कर्त्तव्यमिति विविच्य तथ्यमेवाभिहितवान्। यतो हि मनस्तुष्टये हितैषिणो मिथ्या न भाषन्ते। अत्र हितैषिणो मृषा प्रियं प्रवक्तुं न इच्छन्ति इति वाक्यार्थस्य पूर्ववाक्यार्थसमर्थकतया अर्थान्तरन्यासोऽलङ्कारः। तदुक्तं—

"सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः"॥

कौमुदी

'महीभुजे'-इति महीं भुनक्तीति क्विप् "क्रियया यमभिप्रैति स सम्प्रदानम्" इति वार्त्तिकसूत्रेण चतुर्थी। महीभुजमवबोधयितुमित्यर्थे "क्रिया-

र्थोपपदस्य च कर्म्मणि स्थानिनः" इति सूत्रेण, एधाय व्रजतीतिवद्वा चतुर्थी । 'निवेदयिष्यत'-इति,—णिजन्तविद्धातो"लृटः सद्वेति" शतृप्रत्ययः । 'मृषेत्य'व्ययं, अत्र क्रियाविशेषणे द्वितीया, अव्ययत्वाद्विभक्तेर्लोपः । 'हितैषिण'इति, हितमिच्छन्तीति णिन्प्रत्ययः, कृतप्रणामस्यैति,व्याख्यायामवलोकनीयम् । चारगुणास्तु "अमौढ्यममान्द्यममृषाभाषि त्वमभ्यूहकत्वञ्चेति" ॥

तथापि सत्यमप्यप्रियं प्रिये पूज्ये च राजनि, न, युज्यते, परन्तु प्रभोरनुमतिं प्राप्य तथाभिधाने न दोषः स्यादित्यत आह—

द्विषां विघाताय विधातुमिच्छतो,
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं,
विनिश्चितार्थामिति वाचमाददे ॥३॥

अन्वयः

सः, रहसि, द्विषां विघाताय, विधातुम्, इच्छतः, भूभृतः, अनुज्ञां, अधिगम्य, सौष्ठवौदार्यविशेषशालिनीं, विनिश्चितार्थां, इति, वाचं, आददे ॥

वाच्यान्तरम्

तेन..............सौष्ठवौदार्यविशेषशालिनी विनिश्चितार्था इति वाक् आददे ॥

व्याख्या

सः वनेचरः *रहसि* विजने "विविक्तविजनच्छन्ननिःशलाकास्तथा रहः। रहश्चोपांशु" इत्यमरः *द्विषां* शत्रूणाम् *विघाताय* विनाशाय शत्रून् विहन्तुमित्यर्थः *विधातुं* विधानं व्यापारं कर्त्तुम् *इच्छतः* अभिलषतः शत्रुन् विहन्तुं जाताभिलाषस्य अतएव *भूभृतः* भुवं पृथिवीं विभर्ति पालयति इति भूभृत् राजा तस्य भूपतेः युधिष्ठिरस्येत्यर्थः। *अनुज्ञाम्* अनुमतिम् आदेशमिति यावत् *अधिगम्य* प्राप्य, *सौष्ठवौदार्यविशेषशालिनीम्* सुष्ठु सुन्दरम् तस्य भावः सौष्ठवम् सुमधुरपदविन्यासः, उदारस्य सरलस्य भावः–औदार्यम् ललितार्थप्रतिपादनं, सौष्ठवञ्च औदार्यञ्च ते सौष्ठवौदार्ये ते एव विशेषः वैलक्षण्यम् तेन शालते शोभते या ताम् अतिमधुरपदैर्विरचिताम्, मनोरमार्थप्रतिपादिकाञ्चेत्यर्थः *विनिश्चितार्थाम्* विशेषेण निश्चितः अर्थः अभिधेयः वक्तव्यविषय इतियावत् यस्याः ताम् विशिष्टप्रमाणेन निर्णीतार्थामित्यर्थः। *इति* वक्ष्यमाणप्रकाराम् *वाचम्* वाक्यम् *आददे* उवाच॥

सरलार्थः

शत्रूणाम् विनाशसाधनाय, उपायम् विचिन्तयतो राज्ञो युधिष्ठिरस्य, अनुमतिं प्राप्य, सः—वनेचरः, निर्जनप्रदेशे तदानीं यद् वक्तव्यं तत् सम्यक् मनसा निर्णीय, सुमधुरया भाषया ललितार्थ-प्रतिपादकं वचनमुवाच॥

कौमुदी

'द्विषामि'ति—कर्म्मणि षष्ठी, 'विघातायेति—'कृत्'—प्रत्ययान्तपद-प्रयोगे "कर्त्तृकर्म्मणोः कृति"इत्यनेन सूत्रेण (विघातायेति) विपूर्वहन्-धातोःर्भावे 'घञ्'—प्रत्ययः। "तुमर्थाच्च भाववचनात्" इतिसूत्रेण चतुर्थी। 'अधिगम्येति'–अधिपूर्वगम्धातोः 'ल्यप्'--प्रत्ययः। 'सौष्ठवौदार्य-विशेषशालिनीमि'ति,-सुष्ठु शब्दाद्भावे अण्, सौष्ठवम् इति,–उदार-शब्दाद् भावे ष्यञ्, औदार्यम् इति, सौष्ठवञ्च औदार्यञ्च इति द्वन्द्वे सौष्ठवौदार्ये ते एव विशेष इति कर्मधारयः समासः, ततस्तेन शालते, इति ताच्छील्ये णिनि प्रत्ययः। 'विनिश्चितार्थामि'ति विनिश्चितः अर्थः यस्याः सा विनिश्चितार्था इति बहुव्रीहिः, ताम्। आददे' इति, आङ्-पूर्वक'दा'धातोः अनास्यविहरणे अर्थे कर्त्तरि आत्मनेपदम्॥

यन्मया कार्य्यगौरवेणाप्रियं वक्तव्यं तदवश्यं भवता श्रोतव्यमिति न मद्वचने दोषो मन्तव्यः, एवं वनेचरो राजानं निवेदयति, अथ दूतः स्ववचनस्य अवश्यश्रोतव्यत्वे हेतुं प्रदर्शयति।

क्रियासु युक्तैर्नृप! चारचक्षुषो,
न वञ्चनीयाः प्रभवोऽनुजीविभिः।
अतोऽर्हसि क्षन्तुमसाधु साधु वा,
हितं मनोहारि च दुर्लभं वचः॥४॥

अन्वयः

हे नृप,! क्रियासु, युक्तैः, अनुजीविभिः, चारचक्षुषः, प्रभवः,'न—

वञ्चनीयाः, अतः, असाधु, साधु, वा, क्षन्तुम्, अर्हसि, [यतः] हितं, मनोहारि च वचः, दुर्लभम् [भवतीति शेषः] ॥

वाच्यान्तरम्

[हे] नृप……युक्ता अनुजीविनः चारचक्षुषः प्रभून् न वञ्चयेयुः । ……त्वया क्षन्तुम् अर्ह्यते । हितेन मनोहारिणा च वचसा दुर्लभेन भूयते ॥

व्याख्या

हे नृप नॄन् जनान् पाति रक्षतीति नृपः जनपालकः, तत्-सम्बोधने हे महाराज ! *क्रियासु* विशेषकर्त्तव्येषु *युक्तैः* नियुक्तैः *अनुजीविभिः* चारादिभिर्भृत्यवर्गैः चरन्ति विचरन्ति नानादेशम् इति चराः, चरा एव चाराः, प्रज्ञादित्वादण्, चारा एव चक्षुः येषां ते, प्रभवः राजानः *न वञ्चनीयाः* न प्रतारणीयाः । भूपतयः परराष्ट्रपरिज्ञाने चारान् नियुज्य प्रत्यक्षमेव सर्वं यथायथं जानन्ति, अतः चरा एव तेषां नयनवत्, अतः अप्रियं भवतु तथापि सत्यमेव वक्तव्यमिति भावः । *अतः* अस्मात् कारणात् हे महाराज मदीयं वचः *असाधु* अप्रियं *साधु* प्रियं वा *क्षन्तुम्* अर्हसि । मद्वाक्यं श्रुत्वा मयि रुष्टो न भवेः इत्यर्थः । यतः *हितं* मांगलिकं, *मनोहारि* मनोहरति इति मनोहारि चित्ताकर्षकं *वचः* *वाक्यं* दुर्लभम् दुःखेन लब्धुं शक्यं, प्रायशोऽसुलभमिति भावः । अतो भवता श्रोतव्यमेव ॥

सरलार्थः

हे महाराज! चाराहते राजानः स्वपरराष्ट्रेभ्यः किमपि वृत्तं ज्ञातुं न अर्हन्ति। अतश्चारा अपि प्रभुभक्ताः स्वामिकार्यमकपटम् सम्पादयन्ति, निवेदयन्ति च यथायथं सर्वं वृत्तम्। एतदेव चाराणा मुचितं कर्त्तव्यम्। नरपतीनामपि चारवचनं प्रियं अप्रियं वा यथा-स्थितं श्रोतव्यमेव। सर्वथा दुर्लभमेव सुप्रियं वचनमिति मया यदुच्यते तत् प्रियम् अप्रियं वास्तु धैर्यमवलम्ब्य भवता श्रोतव्यमेव। नात्र मम कश्चिद् दोषो मन्तव्यः॥

कौमुदी

चारा एव चक्षूंषि येषां ते चारचक्षुषः इति बहुव्रीहिः समासः। "गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति पण्डिताः। चारैः पश्यन्ति राजा-नश्चक्षुर्भ्यामितरे जनाः॥" 'दुर्लभ'मिति "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल"इति कर्म्मणि 'खल्' प्रत्ययः। 'चारा' इति व्याख्यायां द्रष्टव्यम्। अत्र 'हितं मनोहारि च दुर्लभं वच'इति वाक्यार्थस्य 'असाधु साधु वा मद्व चनं सोढुम अर्हसी'ति वाक्यार्थम् प्रति उपपादकहेतुतयाऽभिधानात् का-व्यलिंगमलङ्कारः तल्लक्षणं यथा'हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतम्'।

-x-

अथ दूतः स्ववचनस्याऽवश्यश्रोतव्यत्वे हेतुं प्रदर्शयति—

स किंसखा साधु न शास्ति योऽधिपं,
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं,
नृपेष्वमात्येषु च सर्वसंपदः॥५॥

अन्वयः

यः, अधिपं, साधु, न, शास्ति, स, किंसखा, यः, हितात्, न, संशृणुते, सः, किम्प्रभुः, हि, सदा, अनुकूलेषु, नृपेषु, अमात्येषु, च, सर्वसम्पदः, रतिं, कुर्वते ॥

वाच्यान्तरम्

येन अधिपः साधु न शिष्यते तेन किंसख्या भूयते, येन न संश्रूयते तेन किम्प्रभुणा भूयते, सर्वसम्पद्भिः रतिः क्रियते।

व्याख्या

यः सखा, अमात्यादिरिति यावत् *अधिपम्* स्वामिनम् *साधु* हितम् *न शास्ति* न उपदिशति *सः* राज्ञोहितेषु विषयेषु अनुपदेष्टा अमात्यादिः *किंसखा* कुत्सितः सखा दुर्म्मन्त्रीत्यर्थः। * यः * प्रभुः राजा *हितात्* हितवादिनः अमात्यादेः न *संशृणुते* हितवाक्यं श्रुत्वा न गृह्णाति *सः* *किम्प्रभुः* निकृष्टः स्वामी *हि* यतः *नृपेषु* राजसु *अमात्येषु च* मन्त्रिषु च *अनुकूलेषु* परस्परानुरक्तेषु सत्सु *सर्वसम्पदः* सर्वाः सम्पदः समस्ताः श्रियः *सदा* सर्वदा *रतिं* अनुरागम् आसक्तिमिति यावत् *कुर्वते* विदधति। अतो मया भवतो भाविमङ्गलाय यद्यद् उच्यते तदवश्यमेव भवता सावधानेन श्रोतव्यमिति भावः॥

सरलार्थः

यो भृत्यः सचिवो वा राजानं हितवाक्यं नोपदिशति स भृत्यः सचिवो वा कुत्सितो बन्धुरेव। यश्च राजा हितमुपदिशतोऽपि भृत्यस्य

सचिवस्य वा, हितोपदेशं न गृह्णाति स चापि कुत्सितो राजा। राजा मन्त्री च यदि द्वावपि परस्परानुरागिणौ सन्तावैकमत्येन सर्वं कुरुतः तदा तत्र राज्यश्रीश्चिरं वर्धते। अतो मया भवतो भाविमङ्गलाय यद्वक्तव्यं तद्भवतापि अवहितेन सता श्रोतव्यमिति। अत्र प्रभुभृत्ययोरैकमत्यलक्षणस्य कारणस्य सर्वसम्पत्सिद्धिरूपकार्यस्य समर्थकतया कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। लक्षणन्तु प्रागेवोक्तम्॥

कौमुदी

किंसखा कुत्सितः सखा—इति वाक्ये "किमः क्षेपे" इतिसूत्रेण "राजाहःसखिभ्यष्टच्" इतिसूत्रेण प्राप्तस्य 'टच्'प्रत्ययस्य प्रतिषेधः। शास्तीत्यस्य दुह्याद्यन्तर्भावाद् द्विकर्म्मकतया अधिपमिति हितमिति च द्वयोः कर्म्मत्वम्। हितात् इति "आख्यतोपयोगे" इति सूत्रेण पञ्चमी, 'संशृणुते'—इत्यत्र "अर्त्तिश्रुदृशिभ्यश्च" तिवार्त्तिकसूत्रेण आत्मनेपदम्। 'नृपेषु'--'अमात्येषु' च इत्युभयत्र विषयाधिकरणे सप्तमी, मोक्षे इच्छास्तीतिवत्॥

-*-

माद्दृशस्याल्पबुद्धेः परराष्ट्रवृत्तान्तविज्ञानं यदि च न सम्भवति तथापि भवदीयप्रभावादेव सर्वमवगतम् मया इत्याह—निसर्गेति।

निसर्गदुर्बोधमबोधविक्लवाः,
क्व भूपतीनां चरितं क्व जन्तवः।

तत्रानुभावोऽयमवेदि यन्मया,
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥६॥

अन्वयः

निसर्गदुर्बोधं, भूपतीनां, चरितं, क्व, अबोधविक्लवाः, जन्तवः, क्व, निगूढतत्त्वं, विद्विषां, नयवर्त्म, यत् मया, अवेदि, अयं, तव, अनुभावः ॥

वाच्यान्तरम्

निसर्गदुर्बोधेन चरितेन क्व भूयते, अबोधविक्लवैः जन्तुभिः क्व भूयते, अहम् अवेदिषम्, अनेन तवानुभावेन भूयते ॥

व्याख्या

निसर्गेण स्वरूपेण *दुर्बोधम्* बोद्धुमशक्यम् "संसिद्धिप्रकृती त्विमे स्वरूपञ्च स्वभावश्च निसर्गश्चे"त्यमरः। *भूपतीनां* भुवः पृथिव्याः पतयः स्वामिनः तेषाम्, राज्ञामित्यर्थः। *चरितं* कार्यकौशलमित्यर्थः *क्व* कुत्र वर्त्तते *अबोधेन* अल्पज्ञानेन *विक्लवाः* विमूढाः, कर्त्तव्याकर्त्तव्यविवेकशून्या इति यावत् *जन्तवः* मादृशाः साधारणाः पामरजनाः क्व इत्यर्थः। बुद्धिमतामपि राजचरित्रं दुर्ज्ञेयं, का कथा मादृशानामल्पबुद्धीनामित्यर्थः। बुद्धिमतां कार्यं बुद्धिमद्भिरेवानुमेयमिति भावः। तथापि एतदुभयोरसामञ्जस्येऽपि *निगूढतत्त्वं* निगूढं सुगुप्तं *तत्त्वं* मन्त्रणादिकं यस्मिन् तत् नयवर्त्म नीतिमार्गः सन्धिविग्रहादिकौशलम् *यन्मया* *अवेदि* ज्ञातम् *अयं*

इदं ज्ञानमित्यर्थः, *तव अनुभावः* भवतो माहात्म्यम्, तव प्रभावेणैव सर्वं मया विज्ञातमिति भावः ॥

सरलार्थः

राज्ञां कुटिलां नीतिं बुद्धिमन्त एव केचन अवगन्तुं शक्नुवन्ति, मादृशा मन्दमतयस्तु तत्र प्रवेष्टुं नार्हन्ति, एवं सत्यपि मया तव प्रभावेण त्वदुपदिष्टेन प्रकारेण भवतः शत्रूणां दुर्बोधापि नीतिः परिज्ञाता, अत्र न मे किञ्चित् पाटवम् परन्तु भवत एव प्रभावः ॥

कौमुदी

निसर्गेण दुर्बोधं निसर्गदुर्बोधमिति तृतीयातत्पुरुषः समासः। दुर्बोधमिति—"ईषद्दुःसुषु" इत्यादिसूत्रेण कर्म्मणि 'खल्'—प्रत्ययः। 'क्व' इति कस्मिन्नित्यर्थे "किमोऽत्" इति अदादेशः "क्वाति" इत्यनेन क्वादेशः 'अनुभाव' इति-अनुगतो भाव इति घञन्तेन प्रादिसमासः न तु उपसृष्टात् 'घञ्' प्रत्ययः 'श्रिणी भुवोऽनुपसर्गे' इत्यनुपसर्गात् भूधातो र्घञ्'-विधानात्। 'नयवर्त्म' नयस्य वर्त्म इति षष्ठीतत्पुरुषः समासः ॥

विशङ्कमानो भवतः पराभवं,
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते,
नयेन जेतुं जगतीं सुयोधनः ॥७॥

इदानीं वनेचरो विदितं वृत्तान्तं वक्तुमुपक्रमते—विशङ्कमान इति।

अन्वयः

सुयोधनः नृपासनस्थोऽपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः दूरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते ।

वाच्यान्तरम्

सुयोधनेन नृपासनस्थेन अपि......विशङ्कमानेन......समीह्यते ।

व्याख्या

सुयोधनः धृतराष्ट्रस्य प्रथमः पुत्रः कुरुराजो दुर्योधनः *नृपस्य* राज्ञः आसने तिष्ठति इति *नृपासनस्थः* सिंहासनस्थः * अपि * वनाधिवासिनः * वनमधिवसति इति वनाधिवासी तस्मात् वनस्थात् *भवतः* त्वत्तः *पराभवं* पराजयं * विशङ्कमानः * संशयानः * दुरोदरच्छद्मजितां * दुष्टं उदरं यस्य तत् दूरोदरम् द्यूतम् पृषोदरादित्वात् साधु तस्य छद्मना व्याजेन "कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे" इत्यमरः । *जितां* विजित्यलब्धां *जगतीं* महीं राज्यमित्यर्थः *नयेन* नीत्या *जेतुं* वशीकर्त्तुं *समीहते* चेष्टते ।

सरलार्थः

सम्राट् अपि स राजा दुर्योधनः द्यूतकपटेन विजित्य स्वलब्धं राज्यं राजनीत्या सम्यग् वशीकर्त्तुं चेष्टते । यदि च भवान् अधुना वनमधिवसति तथापि वनवासस्य अवसाने पुनर्विजित्य स्वराज्यं ग्रहीष्यति इति सदैव स दुर्योधनः शङ्कते अतस्तथा नीति बलेन वशीकर्त्तुं यतते यथा भवान् स्वराज्यं पुनरुद्धर्त्तुं न शक्ष्यति । अत्र दुरोदरच्छद्मजितामिति विशेषणद्वारेण पदार्थं प्रति हेतुत्वेनोपन्यासात्

काव्यलिङ्गमलङ्कारः। "हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गं निगद्यते" इति लक्षणात्।

कौमुदी

नृपासनस्थ इति नृपासने इत्युपपदे स्था धातोः "सुपिस्थः" इत्यनेन क प्रत्ययः। वनाधिवासिन इति वनमधि वसतीति वाक्ये णिनि प्रत्ययः ततः पञ्चमी। भवत इति पञ्चम्यन्तस्य विशेषणत्वात्। भवत इति "ल्यब्लोपे कर्मण्यधिकरणेचेति पञ्चमी। दुरोदरच्छद्मजिता-मिति व्याख्यातोऽव मन्तव्यम्।

-✲-

सुयोधनः नयेन जगतीं जेतुं केनप्रकारेण समीहते इति विशिष्याह। तथापीति।

तथापि जिह्मः स भवज्जिगीषया,
तनोति शुभ्रं गुणसंपदा यशः।
समुन्नयन्भूतिमनार्यसंगमाद्,
वरं विरोधोऽपि समं महात्मभिः ॥८॥

अन्वयः

तथापि स जिह्मः भवज्जिगीषया गुणसम्पदा शुभ्रं यशः तनोति। भूतिं समुन्नयन् महात्मभिः समं विरोधः अपि अनार्यसङ्गमाद् वरम्।

वाच्यान्तरम्

तथापि तेन जिह्मेन......तन्यते। भूतिं समुन्नयता......विरोधे-नापि......वरेण भूयते।

व्याख्या

तथापि भवतः पराभवमाशङ्कित वानपि *सः जिह्मः* प्रतारकः वञ्चक इतियावत् "अवामं वृजिनं जिह्ममूर्म्मिमत् कुञ्चितं नतम्। आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि" *भवज्जिगीषया* जेतुमिच्छा जिगीषा भवतः जिगीषया जयेच्छया भवन्तं दयादाक्षिण्यशौर्यवीर्यादिभि गुणैः अभिभवितुम् इच्छया इत्यर्थः *गुणसम्पदा* दानादिगुणगरिम्णा *शुभ्रं* निर्मलं *यशः* कीर्त्तिं *तनोति* विस्तारयति। गुणलोभनीयां त्वत्कीर्त्तिसम्पदम् आत्मसात्कर्त्तुं त्वत्तोऽपि आत्मनो गुणवत्तां प्रकटयति इत्यर्थः। नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महान् दोषः इत्याशङ्क्य सतापि विरोधः सत्संसर्गलाभहेतुतया नीचसङ्गमात् श्रेयानेव आत्मोत्कर्षजनकत्वात् इत्याह तथाहि *भूतिं* सम्पदम् *समुन्नयन्* उत्कर्षमापादयन् *महात्मभिः* महान् आत्मा येषां तैः *बहुव्रीहिःसमासः* प्रकृष्टगुणशालिभिरित्यर्थः *समं* "साकं सत्रा समंसह" इत्यमरः। *विरोधः* विरुद्धाचरणम् *अनार्यसङ्गमात्* न आर्याः अनार्याः तेषां सङ्गमः तस्मात् नीच संसर्गाद् *वरम्* मनाक्प्रियः "देवाद्वृते वरः श्रेष्ठे त्रिषु-क्लीवम् मनाक्प्रिये" इत्यमरः।

सरलार्थः

सर्वाः प्रजाः भवता दयादाक्षिण्यशौर्यादिभिगु णैर्भवन्तं प्रति भृश मनुरक्ताः इति सुयोधनः सदैव विशङ्कते यथा वनवासात्

प्रतिनिवृत्तो भवान् पुनरपि अल्पायासेनैव स्वराज्यं ग्रहीष्यति इति। ततः सोऽधुना तथा प्रयतते यथा प्रजाः त्वत्तोऽपि समधिकान् गुणान् प्रेक्ष्य भवन्तं विस्मृत्य तं प्रत्येव सुदृढं अनुरक्ता भवेयुः। तदर्थं स त्वत्तोऽपि गुणवत्ता मात्मनः प्रकटयति। तथाहि महद्भिः सह विरुद्धाचरणाम् अपि नीचजनसंसर्गात् श्रेयस्करमेव। अत्र भूतिं समुन्नयन्निति विशेषणस्य वाक्यार्थं प्रति उपपादकहेतु तयोपन्यासात् काव्यलिङ्गम् अलङ्कारः। पूर्वार्द्धगत वाक्यार्थं प्रति उत्तरवाक्यस्य पूर्वार्द्धवाक्यार्थ समर्थकतया अर्थान्तरन्यासश्चालङ्कारः स च पूर्वोक्त काव्यलिङ्गालङ्कारेणानुप्राणितः। एतयोर्लक्षणे प्रागेवदर्शिते।

कौमुदी

जिगीषयेति जिधातोः सनन्ताद् भावे अप्रत्ययः हेतौतृतीया। जहाति सरलमार्गं इति जिह्मः। हा धातोर्मन् प्रत्ययः। गुण सम्पदा इति करणे तृतीया। समुन्नयन् इति सम् उत् पूर्वकनीधातोः "शतृशानचौ" इति शतृप्रत्ययः। अनार्यसंगमादिति "पञ्चमी विभक्तेः" इत्यनेन पञ्चमी। न आर्य्या इति अनार्य्या नञ् तत्पुरुषः समासः। ऋ धातोः ण्यत् प्रत्ययः कर्त्तव्यमाचरन् कार्य्यमकर्तव्यमनाचरन्। तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः। महात्मभि रिति सहार्थे तृतीया।

-×-

("ननुकातर्यं केवला नीतिः" इत्युक्तेः राज्ञोऽयं दोषएव यत्, तस्य पौरुषं नीतियुक्तं न इत्यपि न शङ्कनीयम् यत स्तस्य पौरुषं नीतियुक्तमेवेति प्रतिपादयितु माह।"

कृतारिषड्वर्गजयेन मानवी

मगम्यरूपां पदवीं प्रपित्सुना ।

विभज्य नक्तन्दिवमस्ततन्द्रिणा

वितन्यते तेन नयेन पौरुषम् ॥९॥

अन्वयः

कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपित्सुना तेन अस्ततन्द्रिणा नक्तंदिवं विभज्य नयेन पौरुषं वितन्यते ।

वाच्यान्तरम्

कृतारिषड्वर्गजयः......प्रपित्सुः अस्ततन्द्रिः सः.. ...वितनोति ।

व्याख्या

(कृतारिषड्वर्गजयेन) षट्संख्यकानां वर्गः समूहः षड्वर्गः अरीणां शत्रूणां कामक्रोधादीनां षड्वर्गः अरिषड्वर्गः शिवभागवतवत् समासः। अरिषड्वर्गस्यजयः अरिवर्गजयः षष्ठीतत्पुरुषः समासः। कृतः अरिषड्वर्गजयो येन स कृतारिषड्वर्गजयः इति बहुव्रीहिः समासः तेन कामक्रोधादीन् षड्रिपून् विजित्यस्थितेन सुविनीतेन इत्यर्थः। विनय एव प्रजापालनोपायः इति भावः *अगम्यरूपां* अगम्यं पुरुषमात्रदुष्प्राप्यं रूपं स्वरूपं यस्याः ताम् इति बहुव्रीहिः समासः अतिदुःसाध्यामित्यर्थः मनोरिमां *मानवीं* मनूपदिष्टसदाचारयुक्ताम् *पदवीं* प्रजापालन पद्धतिं *प्रपित्सुना* प्रपत्तुम् लब्धुमिच्छुना *तेन* दुर्योधनेन *अस्त-

तन्द्रिणा* अस्ता दूरेक्षिप्ता परित्यक्ता इत्यर्थः तन्द्रिः आलस्यं येन इति बहुव्रीहिः तेन अनलसेन इत्यर्थः *पौरुषं* पुरुषस्य कार्यं पुरुषकारः उद्योगः इति यावत् "पौरुषं पुरुषस्योक्तं भावे कर्म्मणि तेजसि" इति विश्वः *नक्तन्दिवं* नक्तं च दिवा च इति द्वन्द्वः समासः अहोरात्रम् विभज्य वितन्यते । अस्यां घटिकायामेवं कर्त्तव्यं तस्यां घटिकाया-मेतत् करणीयम् इति इत्यनयारीत्या दिनस्य दण्डान् रात्रे-रपि दण्डान् विभज्य सुनियमेन सर्वं कार्यं सम्पाद्यते इत्यर्थः ।

सरलार्थः

स सुयोधनः कामक्रोधादीन् षड्रिपून् विजित्य दिनस्य दण्डान् पृथक् पृथक् विभज्य आलस्यं परित्यज्यच यस्यां घटिकायां यत् कार्यं करणीयं तस्यामेव घटिकायां तत् कार्यं साधयन् मनुना समुपदिष्टां प्रजापालनपद्धति मेव सम्यगवलम्बते । एवं सदैव नीतिमार्ग-मनुसृत्यैव पुरुषकारं प्रदर्शयति । अत्र कृतारि षड्वर्गजयेनेति, मानवीं पदवीं प्रपित्सुनेति अस्ततन्द्रिणेति च विशेषणत्रयस्य परस्पर-साकांक्षतया साभिप्राय त्वात् परिकरोऽलङ्कारः । तदुक्तम् "उक्तिवि-शेषणैः साभिप्रायैः परिकरो मतः ।"

कौमुदी

समस्त पदानां समासाः व्याख्यायाम् द्रष्टव्याः । मानवीमिति मनो रिमामिति अण् प्रत्ययः इदमर्थे । प्रपित्सुनेति प्रपूर्वक पद् धातोः सन-न्तादुप्रत्ययः नक्तन्दिवमिति "अचतुर इत्यादिना अच् । तन्द्रिरिति तन्द्रादेः सौत्रात् किः । विभज्येति वि पूर्वक भज् धातोर्ल्यप् ।

तस्य राज्ञः सुयोधनस्य भृत्यादिषु प्रीतिं दर्शयितुमाह सखीनिति ।

सखीनिव प्रीतियुजोऽनुजीविनः,
समानमानान्सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः,
कृताधिपत्यामिव साधु बन्धुताम् ॥१०॥

अन्वयः

गतस्मयः सः अनुजीविनः प्रीतियुजः सखीनिव सुहृदश्च बन्धुभिः समान मानान् बन्धुतांच कृताधिपत्याम् इव सन्ततं साधु दर्शयते ।

वाच्यान्तरम्

गतस्मयेन तेन......सखायः इव......समानमानाः बन्धुताच कृताधिपत्याइव......दर्श्यते ।

व्याख्या

गतस्मयः गतः अपगतः स्मयः अहङ्कारः यस्य सः गतस्मयः बहुव्रीहिः समासः अहङ्काररहितः स सुयोधनः *सन्ततं* सर्वदा "सततेऽनारताश्रान्त सन्ततविरतानिशम् नित्यानवरताजस्र" मित्यमरः *साधु* अकपटं *अनुजीविनः* भृत्यान् *प्रीतियुजः* वत्सलान् *सखीनिव* मित्राणि इव *दर्शयते* लोकस्येति शेषः *सुहृदः* शोभनं हृदयं येषाम् ते बान्धवाः तान् *बन्धुभिः* भ्रात्रादिभिः *समानमानान्* तुल्यसत्कृतान् दर्शयते । आत्मीयान् सहोदरान् इव पश्यति

इत्यर्थः। बन्धूनां समूहः बन्धुता "ग्रामजनबन्धुभ्यस्तल्" इति तल् प्रत्ययः *कृताधिपत्यामू* कृतं आधिपत्यं यया ताम् इव दर्शयते बन्धून् अधिपतीन् इव पश्यति इत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धि जीयते लोकानाम् तथा तान् सम्भावयतीति भावः।

सरलार्थः

स राजा दुर्योधनः अहङ्कारं परित्यज्य भृत्यवर्गान् तथा सम्भावयति यथा साधारण लोकास्तानपि भृत्यवर्गान् तस्यराज्ञः सखीनिवमन्यन्ते। यथा च तेऽपि भृत्यवर्गाः सखायं राजानं मन्यन्ते। राजानथैव भृत्यवर्गैः सहव्यवहरति। एवं बन्धून् तथा सम्भावयति यथा लोकास्तान् तस्य राज्ञः भ्रात्रादितुल्यान मन्यन्ते यथाच तेऽपि बन्धवः राजानं स्वभ्रातरमिव मन्यन्ते राजानथैवतैः सहव्यवहरति। भ्रात्रादीन् तथा सम्भावयति यथा लोकास्तान् एव प्रभून् मन्यन्ते यथा च तेऽपि भ्रात्रादयः वयमेव सर्वाधिकारे नियुक्ता इति मन्यन्ते राजा तथैवतैः सहाचरति। स सुयोधनः भृत्येषु बन्धुजनेषु इव प्रीतिं बन्धुजनेषु भ्रात्रादिषु इव सत्कारं भ्रात्रादिषु च सर्वाधिकारार्पणं कृतवानिति तात्पर्यम्।

कौमुदी *

प्रीतियुजः प्रीतिं युनक्ति इति क्विप्। सुहृदः इति "सुहृद् दुहृदौ मित्रामित्रयोः" इति। दर्शयते इत्यत्र "हेतुमति" इतिणिच्। "णिचश्च" इत्यात्मनेपदम्। 'अभिवादिदृशोरेव आत्मने पद मुप संख्यानम्" इति सूत्रेण अनुजीविनः तं पश्यन्ति इति अणिजन्तस्य

कर्त्तुरनुजीविन इतिपदस्यः पाक्षिकं कर्म्मत्वम् । साधु इति दर्शयते इति क्रियायाः विशेषणम् द्वितीयाच तत एव । समानः मानः येषाम् तान् इति समान मानानित्यत्र बहुव्रीहिः समासः । गतस्मय इति बहुव्रीहिः समासः कृताधिपत्यामिति च बहुव्रीहिः समासः ।

-x-

"धर्म्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः सजनो जघन्यः" इत्युक्तिं प्रतिपालयत स्तस्य राज्ञो धर्म्मार्थ कामेषु समानुरागं दर्शयति असक्तमित्यादि ।

असक्तमाराधयतो यथायथं,
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान,
न बाधतेऽस्य त्रिगणः परस्परम् ॥११॥

अन्वयः

यथायथं, विभज्य, समपक्षपातया, भक्त्या असक्तं आराधयतः अस्य त्रिगणः गुणानुरोधात् सख्य मीयिवान् इव परस्परं न बाधते ।

वाच्यान्तरम्

यथायथं......त्रिगणेन.. ...ईयुषा......बाध्यते ।

व्याख्या

***यथायथं* यथास्वं विभज्य विभागं कृत्वा धर्मार्थकामानाम् मध्ये अस्मिन् काले धर्म्मः एव सेव्यः नतु अर्थः कामो**

वेति तथा अस्मिन् काले अर्थः एव सेव्यः नतु धर्मः कामो-वेति तथा अस्मिन् काले काम एव सेव्यः नतु अर्थो धर्मो वेति एवं रूपेण विभागं कृत्वा इत्यर्थः *समपक्षपातया* समः तुल्यः पक्षपातः अनुरागः यस्याम् इति बहुव्रीहिः समासः तया तुल्यानुरागया इत्यर्थः *भक्त्या* सेवया *असक्तं* अनासक्तं अव्यसनि तयेति यावत्। *आराधयतः* सेवमानस्य अस्य दुर्योधनस्य *त्रिगणः* त्रयाणां धर्म्मार्थकामानां गणः त्रिवर्ग इति यावत *गुणानुरागात्* गुणेषु अनुरागात् आसक्ति विशेषात् गुणवदाश्रयलोभात् इत्यर्थः *सख्यम्* मित्रत्वम ईयिवान् प्राप्तवान् इव परस्परं अन्योऽन्यं न वाधते परस्परं अनुनपीडयन्त इव बर्धन्ते इत्यर्थः।

सरलार्थः

धर्म्मार्थकामाः सममेव सेव्याः इत्युक्तिविशेषभनलम्ब मानः स राजा धर्मार्थकामान् समयविभागं कृत्वा सम्यक् सेवते अतस्तस्य धर्म्मार्थकामाः सदैव प्राचुर्येण बृद्धिमापद्यन्ते। सख्यमीयिवानिवेति उत्प्रेक्षालङ्कारः। तल्लक्षणंतु "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना। इति।

कौमुदी

यथेति निपातस्य द्विर्भावः नपुंसकत्वम्च "ह्रस्वो नपुंसके प्रातिपदिकम्" इति ह्रस्वः। भज् धातोक्तिः भक्तिः "भज इत्येष वै धातुः सेवायां परिकीर्त्तितः। तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधन भूयसी" सख्यमिति ' सख्युर्यः" इति य प्रत्ययः उपेयिवानिति "उपेयिवानाश्वान्

अनूचानश्च" इति उपपूर्वक इ धातोः क्वसुप्रत्ययेन सिद्धं गुणानुरागादिति हेतौ पञ्चमी गुणानुरागं प्राप्येति ल्यवलोपेवा ।

-x-

राज्ञः उपायप्रयोग नैपुण्यं वक्ष्यमाण श्लोकत्रयेण वर्णयितु मादौ सामदाने आह निरत्ययमित्यादि ।

निरत्ययं साम न दानवर्जितं,
न भूरिदानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनो,
गुणानुरोधेन बिना न सत्क्रिया ॥१२॥

अन्वयः

तस्य निरत्ययं साम दानवर्जितं न प्रवर्त्तते । भूरिदानं सत् क्रियां विरहय्य न प्रवर्त्तते । विशेषशालिनी सत्क्रिया गुणानुरोधेन विनान प्रवर्त्तते

वाच्यान्तरम्

तस्य निरत्ययेन साम्ना दानवर्जितेन न (प्रवृत्यते) भूरिणा दानेन... (प्रवृत्यते) । विशेषशालिन्या सत् क्रियया......प्रवृत्यते ।

व्याख्या

तस्य दुर्योधनस्य *निरत्ययं* निः नास्ति अत्ययः दोषः यस्मिन् तत् बहुव्रीहिः समासः निर्वाधम् अमायिकम् इत्यर्थः । मायिकञ्चेत् जनानां दुर्ग्रहमिति भावः । *साम* सान्त्वम् "सामसान्त्वमुभे समे" इत्यमरः । *दानवर्जितं*

दानेन वर्जितम् इति तृतीया तत्पुरुष: समास: *न प्रवर्त्तते* दानयुक्तमेव सामतेन प्रयुज्यते अन्यथा केवलसामप्रयोग: निष्फलः स्यात् साम दानम् भेद: दण्ड: इति चत्वार: उपायाः तेषां साम प्रथमोपाय: तच्च साम द्विविधं अतथ्यं तथ्यञ्च इदञ्च तथ्यं अमायिकत्वात् दानसहकृतत्वाच्च। तथाच शास्त्रं "लुब्धमर्थेन गृह्णीयात्" इति। *तथा भूरि* प्रभूतं *दानं* सत्क्रियां सत् इति आदरार्थे अव्ययम् आदरानादरयो: सदसती इत्युक्तेः। तस्य क्रिया ताम् यद्वा सती क्रिया सत्क्रिया ताम् विरहय्य विहाय न प्रवर्त्तते। सत्कारपूर्वकमेव दानं दीयते यत: अनादरे दानस्य वैफल्यं स्यात् इति भाव:। अथचेत् सर्वत्र एवं रीत्या दानं विधीयते तदा तस्य राज्ञोऽविवेकितया प्रभूतदानेन कोशहानि: स्यादित्याह *प्रवर्त्तते इति* विशेषशालिनी विशेषेण शालते शोभते इति समधिकादरवतीत्यर्थः *सत्क्रिया* आदरक्रिया सत्कार: इति यावत् गुणानुरोधेन गुणानाम् अनुरोध: तेन गुणानुरागेण विना न प्रवर्त्तते गुणापेक्षया एव साम दानादिकं विधीयते नतु सर्वत्र इति न तत्राविवेकित्वं सम्भावनीयमिति भावः।

सरलार्थः

सराजा दुर्योधन: संग्राह्यान् अव्याजमाश्रित्य सन्धिं विदधानः सन्धिं चिरस्थायिनं करोति। लुब्धान् वशीकर्त्तुं केवलं साम न पर्याप्तं इति मत्वा तत् सिद्ध्यै प्रभूतं धनं ददाति। आदरं विना दानं निष्फलं, अतो यथायथं सत्कृत्य धनं ददाति ; सर्व्वत्रैव सत्कारे अविवेकित्व

प्रसङ्गः स्यादिति मत्वा गुणिनः सत्कार योग्यान् बहुमानं समर्चयति। अत्र पूर्वं पूर्वं प्रति परं परं विशेषणतया स्थापित इति एकावलीनामालङ्कारः। तल्लक्षणम् यथा "पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्। स्थाप्यतेऽपोह्यते वाचेत् स्यात् तदैकावली द्विधा।

कौमुदी

गुणानुरोधेन इत्यत्र 'पृथग्विना" इत्यादिना विना योगे तृतीया सर्वे समासा व्याख्याता विज्ञेयाः।

-x-

दण्ड प्रकार माह वसूनि वाञ्छन् इति।

वसूनि वाञ्छन्न वशी न मन्युना,
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा,
निहन्ति दण्डेन स धर्मविप्लवम् ॥१३॥

अन्वयः

वशी स वसूनि न वाञ्छन् मन्युना नच किन्तु निवृत्तकारणः स्वधर्म्म इत्येव गुरूपदिष्टेन दण्डेन रिपौ सुतेऽपिवा धर्म्मविप्लवं निहन्ति।

वाच्यान्तरम्

वशिना तेन......वाञ्छता......निवृत्त कारणेन......धर्मविप्लवः निहन्यते।

व्याख्या

वशी जितेन्द्रियः *सः* दुर्योधनः *वसूनि* धनानि

"वसु तोये घने मणौ" इति वैजयन्ती। "द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थंधनं वसु" इत्यमरः। * न वाञ्छन् * न इच्छन् धनलुब्धो न भवन् इत्यर्थः धनलोभादर्थसंग्रहाय न इति भावः *न मन्युना* क्रोधेन नच। मन्युर्दैन्ये क्रतौ युधि" इत्यमरः धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः इति स्मरणात् निर्लोभत्वेऽपि *निवृत्तकारणः* निवृत्तं अपगतं कारणं हेतुर्यस्य सः बहुव्रीहिः समासः हेतुं विना प्रवृत्त इत्यर्थः *स्वधर्म्मः* स्वस्य राज्ञो धर्म्मः षष्ठीतत्पुरुषः समासः एतदनुष्ठानं राजधर्म्मः *इत्येव* अनेनैव हेतुना *गुरुभिः* मन्वादिभिः शास्त्रकारैः *उपदिष्टेन* आदिष्टेन विहितेन इत्यर्थः *दण्डेन* दण्डविधिना *अरपौ* शत्रौ *सुते* पुत्रे *अपिवा* स्थितमित्यर्थः *धर्म्म विप्लवं* धर्म्मस्य विप्लवं व्यतिक्रमं अधर्म्ममिति यावत् *निहन्ति* निवारयति। "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति निरयं चाधिगच्छति" इति शास्त्रवाक्यात् सम्बन्धनिबन्धनपक्षपातरहितः सन् क्रोधलोभादीनामवशीभूतो दण्डविधानं करोतीति भावः।

सरलार्थः

जितेन्द्रियः स सुयोधनः क्रोधलोभादीनां अवशीभूतः राजधर्मोहि अपराधिनां दण्डविधानमनेनैव हेतुना शास्त्रविधानानुसारेण शत्रून् मित्राणिच तुल्यतया दण्डविधानेन शास्ति यथा प्रजासु कोपिजना धर्म्मं विरुद्धाचरणं न कुर्यात्।

कौमुदी

निवृत्तकारणः स्वधर्म्मः गुरूपदिष्टेन धर्म्मविप्लवम् इत्येषां पदानां समासा व्याख्यातो वेदितव्याः। मन्युना इत्यत्र हेतौ तृतीया दण्डेन इति करणे तृतीया रिपौ सुते इत्यनयोर्विषये सप्तमी। स्थितमिति अध्याहार्य्यस्य आधारेसप्तमी इतिवा।

-✲-

भेद प्रयोगं दर्शयति विधाय रक्षान् इत्यादि।

विधाय रक्षान्परितः परेतरा
नशङ्किताकारमुपैति शङ्कितः।
क्रियापवर्गेष्वनुजीविसात्कृताः,
कृतज्ञतामस्य वदन्ति सम्पदः ॥१४॥

अन्वयः

सः परितः परेतरान् रक्षान् विधाय शङ्कितः (सन्नपि) अशङ्किताकारम् उपैति। क्रियापवर्गेषु अनुजीविसात्कृताः सम्पदः अस्य कृतज्ञतां वदन्ति।

वाच्यान्तरम्

तेन......शङ्कितेन (सतापि) अशङ्किताकारः उपेयते। क्रिया...... अनुजीविसात् कृताभिः सम्पद्भिः......कृतज्ञता उद्यते।

व्याख्या

***सः* सुयोधनः *परितः* सर्वत्र सर्वासु दिक्ष स्वपरराष्ट्रेषु इत्यर्थः *परेतरान्* परेभ्यः शत्रुभ्यः इतरान् अन्यान्**

अवञ्चकानात्मीयान् इत्यर्थः यद्वा परान् शत्रून् इतरयन्ति भेदनीत्या आत्मसात् कुर्वन्ति इति भेदनीतिकुशलान् आत्मीयान् इत्यर्थः *रक्षान्* रक्षन्ति गुप्तमन्त्रणादिकं ये तान् मन्त्रगुप्तिं कर्त्तुं समर्थान् इत्यर्थः। *विधाय* कृत्वा नियुज्येति यावत् *शङ्कितः* शङ्का संशयः जाता अस्य इति संशयान्वितः सन्नपि *अशङ्किताकारम्* अशङ्कितः न शङ्कितः आकारः तम् *उपैति* प्राप्नोति। संशयान्वितोऽपि आत्मीय चरप्रयोगेण भेदनीत्या सर्वान् स्ववश मानीय असन्दिग्धो भवति इत्यर्थः। आत्मीयान् अपि न उपेक्षते येन तेऽपि आत्मीयाः विकृत चित्तवृत्तयः अनिष्टं कुर्युः इत्याह *क्रियापवर्गेषु* क्रियायाः आदिष्टकर्म्मणः अपवर्गेषु समाप्तिषु *अनुजीविसात् कृताः* अनुजीविनां भृत्यानां आयत्तीकृताः भृत्येभ्यो दत्ताः इत्यर्थः *सम्पदः* *अस्य* राज्ञः *कृतज्ञतां* कृतं जानन्ति इति कृतज्ञाः कृतवेदिनः कृतोपकारस्मारका इत्यर्थः तेषां भावः तां *वदन्ति* कथयन्ति।

सरलार्थः

स राजा सुयोधनः विश्वस्तान् आत्मीयान् सुदक्षान् मन्त्रगुप्तिपरान् चारान् स्वराष्ट्रे परराष्ट्रेषु च प्रयुज्य भेदनीत्या सर्वान् स्ववशे संस्थाप्य सर्वकार्याणि सम्पाद्य निश्चिन्तो भवति। तेषु तेषु आदिष्टकर्म्मसु भृत्यैः सम्पादितेषु सत्सु भृत्येभ्यः प्रभूतं धनसम्पदं दत्त्वा आत्मनः कृतोपकारस्मरणम् प्रकटयन्ति। अतः सर्व एव परितुष्टाः तस्मिन् सुदृढमनुरक्ताः।

रक्षन्ति इति रक्षाः पचाद्यच् तान् रक्षान्। परान् इतरयन्ति इति कर्म्मण्यन् तत् करोति इत्यर्थे णि प्रत्ययान्तात् इतरि इति धातोः। उपपदसमासः। परेभ्यः इतरे इति पञ्चमी तत्पुरुषः समासः तान्। परेशत्रवः इतरे येभ्यः इति बहुब्रीहिः समासो वा। शङ्काजाता यस्येति इतच् प्रत्ययः। परितः इति अभिपरि सर्वोभयेभ्यस्तसिल् इति तसिल् प्रत्ययः। क्रियाणाम् अपवर्गेषु इति षष्ठी तत्पुरुषः समासः। यस्थ च भावेनभाव लक्षणमिति सप्तमी। अनुजीविसात् इति देये अर्थे आयत्तार्थे ५ साति प्रत्ययः अनुज्ञोविषुसात् कृता इति "सहसुपा" इति समासः। कृतं जानन्तीति ज्ञाधातोः क प्रत्ययः तस्य भावः इति तल् प्रत्ययः।

-✱-

सामाद्युपाय प्रयोग फलं विवृणोति अनारतमित्यादि।

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः।
फलन्त्युपायाः परिबृंहितायती
रुपेत्य सङ्घर्षमिवार्थसम्पदः ॥१५॥

अन्वयः

तेन पदेषु सम्यग् विभज्य लम्भिताः विनियोगसत्क्रियाः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति।

वाच्यपरिवर्तनं

तेन......लम्भितैः विनियोग सत्क्रियैः उपायैः......परिबृंहिताय-तयः अर्थसम्पदः......फल्यन्ते।

व्याख्या

तेन दुर्योधनेन *पदेषु* स्थानेषु सन्धिविग्रहादिकार्यस्थानेषु इत्यर्थः *सम्यक्* यथानियमं *विभज्य* विचारेण विभागं कृत्वा सुविविच्य इत्यर्थः *विनियोगसत्क्रियाः* विनियोगः व्यवहारः नियोग इत्यर्थः स एव सत्क्रिया सत्कारः येषां ते बहुब्रीहिः समासः *उपायाः* सामादयः *सङ्घर्षं* परस्परस्पर्द्धाम् *उपेत्य* प्राप्य इव *परिवृंहितायतीः* परिवृंहिता वृद्धिंगता आयतिः उत्तरकालः भविष्यत्कालः यासाम् ताः बहुब्रीहिः समासः स्थिरा इत्यर्थः *अर्थसम्पदः* धनसम्पत्तीः *अनारतं* सततं *फलन्ति* प्रसुवते ।

सरलार्थः

स राजा सुविविच्य सामादीन् उपायान् प्रयुनक्ति तेन यथोचितस्थानेषु यथोचितं प्रयुक्ताः ते सामादयः अन्यान् विहाय आत्मनः प्रयोगमेव सत्कारमिव मन्यमानाः अन्येषां स्पर्द्धया इव सततमेव तथा धनसम्पदः उत्पादयन्ति यथाताः उत्तरोत्तरं वर्धन्ते अहमेवास्मिन् कर्म्मणि राज्ञा नियुक्त इति महान् मे आदरः कृतः इति यथा भृत्यानां चेतसि भवति सच तत् कार्यं अपरभृत्यापेक्षया सुष्ठु सम्पादयितुं यतते तद्वत् तस्य राज्ञः सामादयः उपायाः कार्यसिद्धिं विदधते तेन सम्पदश्च उत्तरोत्तरं वधन्ते इति भावः । संघर्ष मुपेत्य इव इत्युत्प्रेक्षालङ्कारः तल्लक्षणंतु प्रागेवोक्तम् ।

कौमुदी

तेनेति, लम्भिताः इतिक्तप्रत्ययान्तस्य कर्त्तरि तृतीया । लम्भिताः

इति लभ् धातोर्णिच् ततः कर्म्मणि क्त प्रत्ययः। विभज्येति विपूर्वक भज् धातोर्ल्यप् प्रत्ययः। सम्यक् इति समम् अञ्चतीति क्विप् प्रत्ययः। उपेत्य इति उपपूर्वकात् इधातोर्ल्यप् प्रत्ययः। उपायाः इति उपपूर्वकात् इधातोर्घञ् प्रत्ययः। उपायाः इति कर्तृपदम् फलन्तीति क्रियापदस्य। अर्थसम्पद इति कर्म्मकारकम् तस्यैव क्रियापदस्य।

-※-

अर्थसम्पदो वर्णयति अनेकराजन्येत्यादि।

अनेकराजन्यरथाश्वसंकुलं,
तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां,
भृशं नृपोपायनदन्तिनां मदः ॥१६॥

अन्वयः

अयुग्मच्छद्गन्धिः नृपोपायनदन्तिनां मदः अनेक राजन्य रथाश्व संकुलं तदीयं आस्थान निकेतना जिरं भृशम् आर्द्रतां नयति।

वाच्यान्तरम्

अयुग्मच्छद्गन्धिना......मदेन......आर्द्रता नीयते।

व्याख्या

***अयुग्मच्छदगन्धिः* न युग्माः अयुग्माः विषमाः सप्तसंख्यका इतियावत् नञ्तत्पुरुषः समासः अयुग्माः छदाः दलानि यस्य बहुव्रीहिः समासः तस्य गन्ध इव गन्धो यस्य इति बहुव्रीहिः समासः सप्तपर्णकुसुमगन्धिरित्यर्थः। *नृपोपायनदन्ति-**

नाम्* नृपाणां उपायनानि षष्ठीतत्पुरुषः समासः उपढौकनानि दन्तिनो गजा उपाहारीकृत्य राजभिः प्रदत्ताः इत्यर्थः तेषां *मदो* दानजलं *अनेकराजन्य रथाश्वसंकुलं। न एके अनेके बहवो राजन्याः क्षत्रियाः तेषाम् रथाश्च अश्वाश्च इति रथाश्वम् सेनाङ्गत्वादेक वद्भावस्तेन सङ्कुलं व्याप्तम् *नदीयं* तस्य राज्ञइदम् * आस्थाननिकेतनाजिरम् * आस्थानं सभा तस्य निकेतनं भवनं तस्य अजिरं "अङ्गनं चत्वराजिरे" इत्यमरः। *भृशं* निरन्तरं *आर्द्रतां* सिक्ततां *नयति* प्रापयति सिक्तं करोति इत्यर्थः।

सरलार्थः

बहवो राजानः तस्मै राज्ञे बहून् मदमत्तान् गजान् प्रभूतान् अश्वांश्च प्रीत्या ददति। तै स्तस्य राज्ञः सभामण्डपप्राङ्गणम् प्रतिक्षणं परिपूर्यते। दन्तिनां मदवारिस्रावैश्च सिक्तं भवति। अत्रसमृद्धिमद्वस्तु वर्णनादुदात्तालङ्कारः। तल्लक्षणं "लोकातिशयसम्पत्तिवर्णनोदात्त-मुच्यते"। इति।

कौमुदी

समासा व्याख्यातोऽवगन्तव्याः राज्ञामपत्यानि इति "राजश्वशुरा-द्यः" इति य प्रत्ययः। अयुग्मच्छदगन्धि रिति उपमान पूर्वात् गन्धाद बहुव्रीहौ इप्रत्ययः पाक्षिकः तेन अयुग्मच्छदगन्ध इत्यपि।

-x-

एवं राज्ञः सुखसमृद्धिं वर्णयित्वा राज्यस्य सुखसमृद्धिं दर्शयति सुखेनेत्यादि।

सुखेन लभ्या दधतः कृषीवलै
रकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृका
श्चिराय तस्मिन्कुरवश्चकासति ॥१७॥

अन्वयः

चिराय तस्मिन् क्षेमं वितन्वति अदेवमातृकाः कुरवः कृषीवलैः सुखेनलभ्याः अकृष्टपच्याः इवशस्यसम्पदः दधतः चकासति ।

वाच्यान्तरम्

चिराय......अदेवमातृकैः कुरुभिः......दधद्भिः चकास्यते ।

व्याख्या

चिराय बहुकालं यावत् *तस्मिन्* राजनि दुर्योधने *क्षेमं* मङ्गलं *वितन्वति* कुर्वति सति कूपकुल्यादिकं खनित्वा प्रजानां शस्यसम्पद्वृद्धये नितरां यतमाने सति इत्यर्थः *अदेव मातृकाः* देवः पर्जन्यः माता जननी येषां ते बहुव्रीहिः समासः वृष्टिजलजीविनो देशाः ते न भवन्ति इति अदेवमातृकाः नदीमातृकाः इत्यर्थः । "देशो नद्यम्बु वृष्ट्यम्बु सम्पन्नव्रीहिपालितः । स्यान्नदीमातृको देव मातृकश्च यथाक्रमम् ।" इत्यमरः । राज्ञो कुल्यादि खननेनात्र शस्योत्पत्ते रदेवमातृकत्वं कुरुजनपदस्येति भावः *कुरवः* कुरूणां निवासाः जनपदविशेषाः *अकृष्टपच्याः* *इव* कृष्टेक्षेत्रे स्वयं पच्यन्ते इति कृष्टपच्याः कृष्टपच्याः न भवन्ति इति अकृष्टपच्याः इव "राजसय" इत्या-

दिनाक्यप् प्रत्ययः। *कृषिवलैः* कृषिः कर्षणकार्यम् अस्ति येषाम् ते कृषीवलाः कृषकाः तैः कृषकैरित्यर्थः "रजः कृषि" इत्यादिना वलच् "वले" इतिदीर्घः। *सुखेन* अनायासेन स्वल्पपरि श्रमेणेत्यर्थः *लभ्याः* लब्धुं शक्याः *शस्यसम्पदः* शस्यसमृद्धीः *दधतः* धारयन्तः *चकासति* शोभन्ते।

सरलार्थः

स राजा प्रजानां कृष्यादेः सौकर्य्यार्थम् सर्वत्र कूपकुल्यादिखननं विधाय प्रभूतं कल्याणं सम्पादितवान्। कुरुजनपदवासिनोजना वृष्ट्यभावेऽपि अनायासेन कृषिकार्यं सम्पाद्य प्रभूतानि शस्यानि सदैव प्राप्य मुदिताः सन्ति। अकृष्टपच्याइवेत्युत्प्रेक्षालङ्कारः।

कौमुदी

चिराय इत्यव्ययम् चिरकालार्थकम् अत्यन्त संयोगे द्वितीया। लभ्याः इति "शकि सहिपवर्गान्तात्" इत्यनेन कर्म्मणियत् प्रत्ययः। वितन्वति इति तन धातोः शतृप्रत्ययः ततो "यस्य च भावेन भाव लक्षणम" इत्यनेनभावे सप्तमी। दधतः इति धा धातु शतृ ततः प्रथमा बहुवचने "नाभ्यस्तच्छतुः" इति नकारागम प्रतिषेधः। अदेवमातृकाः इत्यत्र बहुव्रीहौ "नद्यृतश्च" इति क प्रत्ययः। चकासति इति अदादि गणीय चकास् धातोः लटि प्रथमपुरुष बहुवचनरूपम्। अन्यत् समास प्रत्ययादिकं व्याख्यायामेवावलोकनीयम्।

-x-

एवं धनव्ययेन प्रजानां कल्याणं विदधत स्तस्य कथ मर्थागमः स्या दित्यत आह उदारकीर्त्ते रिति।

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥१८॥

अन्वयः

उदारकीर्तेः दयावतः प्रशान्तबाधं उदयं दिशतः वसूपमानस्य अस्य गुणैः उपस्नुता मेदिनी वसूनि स्वयं प्रदुग्धे ।

वाच्यान्तरम्

प्रदुग्धे इति कर्म्मकर्त्तरि तेनात्र वाच्यान्तरं न सम्भवति ।

व्याख्या

उदारा महती सर्वजनप्रिया सर्वैः गीयमानेति भावः कीर्त्तिः यशः यस्य तस्येति बहुव्रीहिः समासः सर्वजनगीयमानयशसः इत्यर्थः दयावतः दया करुणा विद्यते यस्य तस्य अस्त्यर्थे वतुप् प्रत्ययः परदुःखनिवारकस्येत्यर्थः प्रशान्तबाधं प्रशान्ता निवारिता बाधा अन्तरायः यस्मिन् तत् बहुव्रीहिः समासः क्रिया विशेषणमेतत् तेनास्य क्लीवत्वं द्वितीयैकवचनान्तत्वं च निवारितोपद्रवमित्यर्थः । अभिरक्षया प्रतिपालनेन सर्वतः परित्राणेनेत्यर्थः *उदयं* वृद्धिं *दिशतः* कुर्वतः *वसूपमानस्य* वसुः धनाधिपः कुवेर इति यावत् उपमानं यस्य तस्येति बहुव्रीहिः समासः कुवेरसदृशस्य इत्यर्थः । वसुर्मयूखाग्निधनाधिपेषु इत्यमरः । *अस्य* दुर्योधनस्य *गुणैः* दयादाक्षिण्यशौर्य वीर्या

दिभिः *उपस्नुता* सिक्ता क्षरणवती इति यावत् *मेदिनी* पृथिवी *वसूनि* धनानि "वसु तोये धने मणौ" इति वैजयन्ती *स्वयम्* आत्मेच्छया स्वतः प्रवृत्ता *दुग्धे* क्षरति ददाति इत्यर्थः। दुहेः कर्म्मकर्त्तरि लट्। प्रजाः तस्य सुपालनेन तुष्टाः स्वेच्छया बहूनि रत्नानि तस्मै ददति इति भावः।

सरलार्थः

स राजा प्रजानामनुरञ्जनाय श्रीवृद्धिलाभाय च सर्वदैव सम्यगवधानपरः सन् सुपालनेन तथा प्रजाः आवर्जितवान् यथा ताः स्वेच्छयैव प्रभूतानि धनरत्नानि तस्मै उपाहरन्ति। वसूपमानस्येति उपमालङ्कारः। तथा मेदिन्या अप्रस्तुतया गवा साम्यात् समासोक्तिः। "समासोक्तिः समैर्यत्र कार्यलिङ्ग विशेषणैः। व्यवहार समारोपः प्रस्तुतेऽन्यस्य वस्तुनः।" इति।

कौमुदी

प्रशान्तबाधमिति "क्रियाविशेषणे च" इति द्वितीया। अभिरक्तया इति करणे तृतीया। दिशतः इति शतृ प्रत्ययः। गुणैः इति हेतौ तृतीया उपस्नुता इति क्त प्रत्ययः कर्त्तरि।

-x-

अथ वीराणां सुयोधने राज्ञि गाढानुरागं वर्णयति महौजस इत्यादि।

महौजसो मानधना धनार्चिता,
　　　धनुर्भृतः संयति लब्धकीर्तयः।

नसंहतास्तस्य नभिन्नवृत्तयः,
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥१९॥

अन्वयः

महौजसः मानधनाः धनार्चिताः संयति लब्धकीर्त्तयः नसंहताः न भिन्नवृत्तयः धनुर्भृतः तस्य प्रियाणि असुभिः समीहितुं वाञ्छन्ति ।

वाच्यान्तरम्

महौजोभिः मानधनैः धनार्चितैः संयति लब्धकीर्त्तिभिः न संहतैः न भिन्नवृत्तिभिः धनुर्भृद्भिः......वाञ्छ्यन्ते ।

व्याख्या

महौजसः महत् असाधारणं ओजः तेजः बलमितियावत् येषां ते बहुब्रीहिः समासः । महातेजसो महाबला इत्यर्थः । *मानधनाः* मानम् सम्मानम् धनम् येषां ते आत्मसम्मान रक्षका इत्यर्थः । बहुब्रीहिः समासः *धनार्च्चिताः* धनैः राज प्रदत्तैरर्थैः अर्च्चिताः सम्मानिताः अन्यथा कथं तदुपकाराय यतन्ते इति विशेषणमिदम् । *संयति* युद्धे *लब्धकीर्त्तयः* लब्धाप्राप्ता कीर्त्तिर्यशो यै स्ते बहुब्रीहिः समासः प्राप्तयशस इत्यर्थः बहुषु युद्धेषु नानाविधं युद्ध कौशलं प्रदर्श्य जयलाभेन यशस्विनस्ते कथञ्चन युद्धात् न पलायन्ते इति भावः । *नसंहताः* संहताः निर्जने एकत्र मिलिता न भवन्ति इति न संहताः न स्वार्थान्वेषिणो भवन्ति इति भावः । नञर्थस्य न शब्दस्य

सुप् सुपेति समासः। भिन्नवृत्तयः। भिन्ना परस्परं पृथक् वृत्ति-र्मनोवृत्ति येषां ते पृथक् पृथक् मतावलम्बिन ते न भवन्ति इति न भिन्नवृत्तयः। ऐकमत्येन स्वामिकार्यसम्पादका इत्यर्थः। कदापि मतद्वैध माश्रित्य स्वामिकार्यविघातं नकुर्वन्ति इति भावः। *धनुर्भृतः* धनूंषि बिभ्रतीति क्विप् धनुर्धारिण-स्तस्य दुर्योधनस्य *प्रियाणि* मङ्गलानि *असुभिः* प्राणैः *समीहितुं* सम्पादयितुं *वाञ्छन्ति* अभिलषन्ति। अकृ-तज्ञता परिहारार्थं जीवनदानेनापि तस्य उपकारं कुर्वन्ति इति भावः।

सरलार्थः

महाबलाः बहुषु संग्रामेषु शत्रून् जित्वा जयकीर्त्तिशोभिनो बहवो वीराः आत्मसम्मान रक्षकाः स्नत् प्रदत्तेन धनेन तस्मिन् गाढमनु-रक्ताः कृतज्ञाः सर्वे एकमतावलम्बिनः, सर्वदैव स्वप्राण व्ययेनापि प्रभोरभिलषितानि सम्पादयितुं यतन्ते। अत्र महौजसः प्रभृति पदा-र्थानां वाक्यार्थहेतुकतया काव्यलिङ्गमलङ्कारः। तथा विशेषण पदानां साभिप्रायतया परिकरालङ्कारः इत्यनयोरेकाश्रयस्थितिसङ्करः। तयोर्लक्षणे प्रागुक्ते।

कौमुदी

समास प्रत्ययादिकं सर्वमेव व्याख्यातो ज्ञातव्यम्।

राजासौ चरप्रयोगेण सर्वेषां राज्ञां रहस्यान्यपिवेत्ति न च केचन तद्वृत्तं विदन्तीत्याह महीभृतामिति।

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ॥ २० ॥

अन्वयः

अशेषितक्रियः सः सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद धातुः इव तस्य महोदयैः हितानुबन्धिभिः फलैः ईहितं प्रतीयते ।

वाच्यान्तरम्

अशेषितक्रियेण तेन......क्रियाः विद्यन्ते ।......ईहितं प्रतियन्ति जनाः

व्याकरणा

अशेषितक्रियः न शेषिताः न असमापिताः क्रियाः राजकर्त्तव्याणि येन सः बहुव्रीहिः समासः । समापित समस्तराजकार्य इत्यर्थः *सः* दुर्योधनः *सच्चरितैः* सत् साधु चरितं स्वभावः येषां तैः बहुव्रीहिः समासः प्रतारणाशून्यैरिति तात्पर्यं *चरैः* गूढपुरुषैः प्रतिनिधिभिः भृत्यवर्गैरित्यर्थः *महीभृतां* राज्ञाम् अन्येषां नरपतीना मिति यावत *क्रियाः* कार्योद्योगं *निःशेषं* निःनास्ति शेषः अवशिष्टंयस्मिन् कर्मणीति बहुव्रीहिः अवशिष्टरहितं यथा स्यात् तथा *वेद* जानाति । निजमन्त्रणादिकं अन्ये न विदन्तीत्याह *महोदयै* रिति *धातुः* इवविधातुरिव *तस्य* महाराज दुर्योधनस्य

ईहितं प्रारम्भः उद्योग इति यावत् *महोदयैः* महान् उन्नतिः येषां तैः बहुव्रीहिः समासः *हितानुबन्धिभिः* हितं अनुबध्नन्ति ये तैः उपपदसमासः हितकारिभिः *फलैः* कर्म्मसाफल्यैः *प्रतीयते* निश्चीयते ज्ञायते इत्यर्थः। तस्य कर्म्मारम्भः कीदृशः इति फलैरेव लोकैरनुमीयते इति भावः।

सरलार्थः

स राजा स्वपरराष्ट्रेषु सर्वेषां भूपतीनां चेष्टितानि चरान् प्रयुज्य साकल्येनैव ज्ञानाति आत्मनश्चेष्टितानि च आफलनिष्पत्तेः मन्त्रगुप्तिप्रभावेण न कैरपि ज्ञायन्ते यथाहि विधातुरभिप्रेतफलं दृष्ट्वा लोकैः ज्ञायते तथा तस्यापि कर्म्मारम्भः फलं दृष्ट्वावगम्यते अत्र धातुरिव तस्येत्युपमालङ्कारः।

कौमुदी

महीभृताम् इति महीं बिभ्रतीति क्विप् कर्त्तरि उपपदसमास. "ह्रस्वस्यपितिकृतितुक् इति।" कर्तृकर्म्मणोः कृतितीकर्त्तरिषष्ठी शेषेर्वा। चरैः इति चरन्ति इति पचाद्यच् ततः करणे तृतीया। निःशेष मिति नास्ति शेषः यस्मिन् तत् बहुव्रीहिः समासः क्रियाविशेषणेद्वितीया। वेदेति वेत्तेः कर्त्तरि लट्। प्रतीयते इति प्रतिपूर्वकात् इधातोः कर्म्मणि-लट्। फलैरिति करणे तृतीया। हितानुबन्धिभि रिति णिनि प्रत्ययः।

-*-

गुणिन स्तस्य सर्व एव बन्धुता मापद्यन्ते इत्याह न तेनेत्यादि।

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥२१॥

अन्वयः

तेन सज्यं धनुः क्वचिदपि न उद्यतं न वा आननं कोपविजिह्मं कृतं गुणानुरागेण नराधिपैः शिरोभिः माल्यमिव अस्य शासनं उह्यते ।

वाच्यान्तरम्

स......उद्यतवान् .....कृतवान् नराधिपा......वहन्ति ।

व्याख्या

तेन राज्ञा दुर्योधनेन *क्वचित्* कुत्रापिकाले *सज्यं* सहज्यया गुणेन वर्त्तमानं "मौर्वीज्या शिञ्जिनी गुणः" इत्यमरः तेन सहेति तुल्ययोगे बहुव्रीहिः समासः गुणयुक्तं *धनुः* कार्म्मुकं "धनुश्चापौ धन्वशरासन कोदण्ड कार्म्मकं" इत्यमरः । उद्यतं न उत्तोलितम् न आकृष्टमित्यर्थः नवा *आननं* मुखं *कोपविजिह्म* कोपेन क्रोधेन विजिह्मं वक्रं क्रोधकौटिल्य पूर्णं "आरालं वृजिनंजिह्म मूर्त्तिमत् कुञ्चितं नतं । आविद्धं कुटिलं भुग्नं वेल्लितं वक्र मित्यपि" इत्यमरः । नकृतं । क्रोधं विनायुद्धस्पृहाकथं सम्भवेत् इति भावः । तर्हि कथं राजान स्तस्य आदेशं प्रतिपालयन्तीत्याह *गुणानुरागेणेति* गुणेषु दयादाक्षिण्यादिषु अनुरागः प्रेम सप्तमी तत्पुरुषः तेन राजानं

नानाविध सद् गुणयुक्तं दृष्ट्वा तद् गुण प्रीत्या इत्यर्थः माल्य-पक्षेऽपि गुणेषु सौरभ्यादिषु अनुरागेण आसक्त्या माल्यस्य सौरभ्यादिगुणप्रीत्या इत्यर्थः यद्वा गुणे सूत्रे अनुरागेण अविच्छिन्न ग्रन्थिपारिपाट्येन इत्यर्थः *नराधिपैः* अन्यभूपालैः विभिन्नदेशराजभिरित्यर्थः *शिरोभिः* अवनत मस्तकैरितिभावः *माल्यमिव* माला एवेति माल्यम् चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः *अस्य* राज्ञो दुर्योधनस्य *शासनं* अनुज्ञा *उह्यते* धार्यते ।

सरलार्थः

सर्वे नरपतय स्तस्य राज्ञः सुयोधनस्य गुणवत्तया वशीभूताः सादरं तदाज्ञां प्रतिपालयन्ति अतः कोप कारणाभावात् तेन क्रोध-कुटिलं मुखं नकृतं दण्डविधान प्रयोजनाभावात् कार्म्मुकं वा समौर्वीकं न गृहीतम् । श्लोकेऽस्मिन् माल्यमिवशासनमिति द्वयोः साम्य प्रतिपादनादुपमालङ्कारः । स च गुण इति श्लिष्टपदसहायः श्लेष-सङ्कीर्णः ।

कौमुदी

उद्यतम् इति उत् पूर्वक यम् धातो इति कर्म्मणि क्त प्रत्ययः । गुणानुरागेणेति "हेतौ" तृतीया । शिरोभिरिति नराधिपै रिति च "कर्तृकरणयोस्तृतीये" ति सूत्रेण क्रमेण करणे कर्त्तरिच तृतीया । अस्येति शासनमिति पदस्य प्रयोगे कर्त्तरि षष्ठी "कर्तृकर्म्मणोः कृति" इतिसूत्रेण । सम्बन्धमात्र विवक्षया "शेषे" इति सूत्रेण वा षष्ठी ।

-x-

शास्त्रानुमोदितं धर्म्मं प्रतिपालयत स्तस्य धार्म्मिकत्वमाह स यौवराज्ये इति ।

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥२२॥

अन्वयः

इद्धशासनः सः नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय पुरोधसा अनुमतः अखिन्नः मखेषु हिरण्य रेतसं हव्येन धिनोति ।

वाच्यान्तरम्

इद्धशासनेन तेन......अनुमतेन अखिन्नेन......हिरण्यरेताः...... धिन्व्यते ।

व्याख्या

इद्धशासनः इद्धं प्रदीप्तं शासनं निग्रहानुग्रहरूपं कर्म्म यस्य सः इति बहुव्रीहिः दुष्टान् निगृह्णाति शिष्टान् अनुगृह्णाति इति तात्पर्यम् *सः* दुर्योधनः *नवयौवनोद्धतं* नवं नूतनं यद् यौवनं तारुण्यम् तेन उद्धतं उद्रिक्त' क्षिप्रकारिणमित्यर्थः *दुःशासनं* दुःखेन अतिक्लेशेन शिष्यते वशीक्रियते इति तम् *यौवराज्ये* युवराजकर्म्मणि *निधाय* संस्थाप्य *पुरोधसा* पुरोहितेन "पुरोधास्तु पुरोहितः" इत्यमरः । *अनुमतः* अनुज्ञातः *अखिन्नः* आलस्यरहितः पुरोहितस्य वागु-

पेक्षायां दोषश्रवणात् *मखेषु* यज्ञेषु "यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इत्यमरः। * हिरण्यरेतसं * हिरण्यं सुवर्णं रेतः यस्य तं अग्निं अग्निर्वैश्वानरोवह्निः......हिरण्य रेता हुतभुग् दहनोहव्यवाहनः इत्यमरः। *हव्येन* घृतादिना *धिनोति* प्रीणयति।

सरलार्थः

सामादिना राज्यं सुदृढं कृत्वा इदानीं यागादि धर्मकर्मणा राज्यं दृढ़तरं कर्त्तुं देवसहायलाभाय राजकार्यपरिचालनभारं स्वभ्रातरि दुःशासने निक्षिप्य पुरोहितस्यानुमत्या यागादीन्यनुष्ठानानि आरभते।

कौमुदी

यौवराज्ये इति युवा चासौ राजा चेति युवराजः कर्मधारयसमासः "राजाह सखिभ्यष्टच्" इति समासान्तष्टच् प्रत्ययः। तस्य भावः इति ष्यञ् प्रत्ययः। दुःशासनमिति "भाषायां शासि युधी" त्यादिना खलर्थे युच्प्रत्ययः पुरोधसेति पुरः अग्रे धीयते संस्थाप्यते असौ इति असुन् प्रत्ययः। ततः कर्त्तरि तृतीया। अनुमत इति भूते निष्ठाक्तस्य प्रयोगात्। अतः षष्ठी नाशङ्कनीया।

-*-

सर्वं जगद् वशीकृत्यापि स नितरां भवद्भ्यि या चिन्ताकुल आस्ते इत्याह प्रत्याह प्रलीनेति। ननु गुप्तमन्त्रणाततपरस्य तस्य दुर्योधनस्यापिमत्तो भयमिति कथं त्वया निर्धारितमित्याह कथाप्रसङ्गेनेति।

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

अन्वयः

सः प्रलीनभूपालं स्थिरायति आवारिधि भुवः मण्डलं प्रशासत् अपि त्वत् एष्यतीः भियः चिन्तयति एव अहो बलवद्विरोधिता दुरन्ता (भवति) ।

वाच्यान्तरम्

तेन......प्रशासता......एष्यत्यः भियः चिन्त्यन्ते एव,...... बलवद्विरोधितया दुरन्तया भूयते ।

व्याख्या

सः राजा दुर्योधनः *प्रलीनभूपालं* प्रलीनाः पराभूताः निर्वीर्यतया तूष्णीं स्थिता इत्यर्थः । भूपालाः राजानो यस्मिन् तत् बहुव्रीहिः । प्रतिपक्षराजोपद्रवशून्यमितिभावः *स्थिरायति* स्थिरा चिरस्थायिनी आयतिः उत्तरकालो यस्य तत बहुव्रीहिः *आवारिधि* वारिधिः समुद्रस्तत् पर्यन्तम् आसमुद्रमित्यर्थः आशब्देनात्र मर्यादा द्योत्यते । *भुवः* पृथिव्याः मण्डलं समग्रां पृथिवीमित्यथः *प्रशासत्* सामदानादिभिः पालयन् अपि *त्वत्* भवतः *एष्यतीः* उत्पत्स्यमानाः *भियः* भयानि पराभवादि विघ्नानित्यर्थः *चिन्तयति एव*

आशङ्कते एव *अहो* आश्चर्यं *बलवद्भिर्विरोधिता* बलवद्भिः प्रबलैर्विरोधिता शत्रुता *दुरन्ता* दुः दुःखेन अन्तः अवसानं यस्याः सा बहुव्रीहिः विपन्मात्रावसाना इत्यर्थः ।

सरलार्थः

सामदानादिभिः सर्वान् नृपतीन् वशीकृत्य निःसपत्नं राज्यमधिष्ठायापि स राजा सर्वदैव केवलं भवत एव भयमाशङ्कते तथाहि बलवद्भिः सह वैरमुत्पाद्य चिरं निश्चिन्ततया सुखेनावस्थातुं नार्हति । अत्र चतुर्थपादेन पादत्रयगतस्यार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

प्रशसत् इति प्रपूर्वकशास् धातोः शतृप्रत्यये "नाभ्यस्ताच्छतु" रिति नकारागम प्रतिषेधः । आवारिधि इति वारि धीयते अस्मिन्निति अधिकरणे कि प्रत्ययः ततः वारिधिभ्य आ इति "आङ् मर्यादाभिविध्यो" रित्यव्ययीभावः समासः । बलवद्भिर्विरोधिता इति बलवद्भि विरोधिता इति सह सुपेति समासः दुरन्ता इति "प्रादिभ्यो धातुजस्य" इति बहुव्रीहिः "मण्डलं परिधौ" इति मेदिनी ।

-x-

ननु गुप्तमन्त्रणातत्परस्य तस्य दुर्योधनस्यापि मत्तो भयमिति कथं त्वया निर्धारितमित्याह कथाप्रसङ्गेनेति ।

कथाप्रसङ्गेन-जनैरुदाहृता-

दनुस्मृताखण्डलसूनुविक्रमः ।

तवाभिधानाद्व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥

अन्वयः

कथाप्रसङ्गेन जनैः उदाहृतात् तव अभिधानात् अनुस्मृताखण्डल सूनुविक्रमः सः सुदुःसहात् मन्त्रपदात् नताननः उरग इव व्यथते ।

वाच्यान्तरम्

कथा......अनुस्मृताखण्डलसूनु विक्रमेण तेन......नताननेन उरगेण इव व्यथ्यते ।

व्याख्या

कथाप्रसङ्गेन जनानामालोचनाप्रसङ्गेन *जनैः* पुरवासिभिः सेवकादिभिश्च *उदाहृतात* उच्चारितात् कर्मान्ते विश्रान्तानां भवदनुरागिणां परस्परालोचनया इत्यर्थः *तव* भवतः *अभिधानात्* नामकथनात् "आख्याह्वे चाभिधेयं च नामधेयं च नाम च" इत्यमरः *अनुस्मृताखण्डलसूनुविक्रमः* आखण्डलस्य इन्द्रस्य "इन्द्रो मरुत्वान् मघवा आखण्डलः सहस्राक्षः ऋभुक्षाः" इत्यमरः सूनुः पुत्रः "सूनुः पुत्रेऽनुजेरवौ" इति विश्वः अर्जुनः इत्यर्थः तस्य विक्रमो वीर्यं अनुस्मृतः मनसा चिन्तितः आखण्डलसूनुविक्रमः अर्जुनवीर्यं येन सः बहुव्रीहिः समासः अर्जुनवीर्यं स्मरन्नित्यर्थः *सः* दुर्योधनः *नताननः* नतं नम्रं आननं मुखं यस्य सः बहुव्रीहिः समासः अवनतशिराः इत्यर्थः *सुदुःसहात्* अतिदुःसहात् *मन्त्रपदात्*

मन्त्रवर्णात् मन्त्रवर्णं श्रुत्वा इत्यर्थः *उरगः* सर्पः इव "सर्पः पृदाकुर्भुजग......उरगः पन्नगो भोगी जिह्मगः पवनाशनः।" इत्यमरः *व्यथते* दुःखितो भवति। उरगेऽपि एतत् सर्व मर्थान्तरेण योजनीयं तद् यथा *कथाप्रसङ्गेन* विषवैद्येन "कथाप्रसङ्गोवार्त्तायां विषवैद्येऽपि वाच्यवत्" इति विश्वः अथवा *कथाप्रसङ्गेनजनैः* इत्येकंपदम् तत्र कथाप्रसङ्गे इति विषयसप्तमी। इनाश्चते जनाश्चेति इनजनाः श्रेष्ठजनाः तैः श्रेष्ठविषवैद्यैरित्यर्थः *उदाहृतात्* पठितात् *तवाभिधानात्* तश्च वश्च तवौ गरुड्वासुकी तयोरभिधानं नामकथनं यस्मिन् मन्त्रपदे बहुव्रीहिः समासः तस्मात् गरुडवासुकि नामयुक्तात् इत्यर्थः *सुदुःसहात्* अतिकठोरात् पराक्रमापहारिणः इतिभावः *मन्त्रपदात्* क्रमोच्चारितमन्त्राक्षरात् *अनुस्मृताखण्डलसनुविक्रमः* आखण्डलस्य इन्द्रस्य सूनोः अनुजस्य भ्रातुः उपेन्द्रस्य नारायणस्येत्यर्थः विः पक्षी वाहन भूतोगरुडः तस्य क्रमः पादविक्षेपः सः अनुस्मृतः मनसि चिन्तितः येन बहुव्रीहिः समासः गरुड महिमानं विभावयन्नित्यर्थः *नताननः* हतप्रभावतया भूपतितः सन्। एतादृशः सर्पो यथा व्यथते तादृशो राजापि तथा व्यथते इत्यर्थः।

सरलार्थः

विषवैद्यैः पठितं गरुडवासुकिनामयुक्तं मन्त्रमाकर्ण्य यथा सर्पो गरुडप्रभावं मनसि चिन्तयित्वा हतवीर्यः सन् नताननस्तिष्ठति तथा सदसि कथाप्रसङ्गेन केनापि उच्चारितं तवनाम श्रुत्वा स राजा अर्जुन

विक्रमं स्मृत्वा भयेन व्याकुलः सन् अधोवदनो भवति भय विकारं निह्नोतुं न शक्नोति। "सर्वतो जय मन्विच्छेत् पुत्रादिच्छेत् पराजयम्" इति न्यायात् अर्जुनस्य उत्कर्षकथनं युधिष्ठिरस्य भूषणमेव। अत्र श्लोके उपमालङ्कारः उरग इव सः इति साम्य प्रतिपादनात्। तच्च साम्यं श्लेषनिर्वाह्यमिति श्लेषानुप्राणिता पूर्णोपमेयम्।

कौमुदी

जनै रिति उदाहृतात् इन्यस्य कर्त्तरि "कर्त्तृ करणयो स्तृतीया" इत्यनेन तृतीया। तवाभिधानादिति मन्त्रपदादिति पदस्य विशेषणम्, मन्त्रपदादित्यत्र हेत्वर्थे पञ्चमी "विभाषा गुणेऽस्त्रियाम्" इतिसूत्रेण, यद्वा मन्त्रपदमाकर्ण्य इत्यर्थे "ल्यब्लोपे कर्म्मण्यधि करणेचे" ति सूत्रेण ल्यव् लोपे पञ्चमी। कथाप्रसङ्गेन इति कथायाः प्रसङ्गः कथाप्रसङ्गः तेन इति षष्ठी तत्पुरुषः समासः "प्रकृत्यादिभ्यश्चे" ति तृतीया कथाप्रसङ्गेन जनै रिति कथाप्रसङ्गेषु इनाः इति कथाप्रसङ्गेनाः सप्तमी तत्पुरुषः समासः, कथाप्रसङ्गेनाश्च ते जना श्चेति कथाप्रसङ्गेनजनाः इति कर्म्मधारयःसमासः तैः तृतीयातु कर्त्तरि। दुःसहादिति दुःखेन सह्यते इति "ईषद्दुः सुषु" इत्यादिना कर्म्मणि खल्। उरग इति उरसा गच्छति इति "गमेर्ड:" प्रत्यये उरसो लोपश्चेति अन्त्यस्य लोपः।

इदानीं प्रतिकारायोपदिशति तदाशु इति।

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम्।

परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥२५॥

अन्वयः

तत् त्वयि जिह्मं कर्त्तुं उद्यते तत्र विधेयम् उत्तरम् आशु विधीयताम् परप्रणीतानि वचांसि चिन्वताम् मादृशाम् गिरः खलु प्रवृत्तिसाराः भवन्ति ।

वाच्यान्तरम्

तत्..... विदधातु......गीर्भिः प्रवृत्तिसाराभिः भूयते ।

व्याख्या

तत् तस्माद् हेतोः *त्वयि* भवति *जिह्मं* कुटिलं कपटमित्यर्थः "आरालंवृजिनं जिह्मम्" इत्यमरः। *कर्त्तुम्* आचरितुम् *उद्यते* कृतोद्यमे त्वां हन्तुं कृतनिश्चये इत्यर्थः *तस्मिन्* राजनि दुर्योधने *विधेयम्* विधातुं योग्यम् *उत्तरं* प्रतिविधानं *आशु* शीघ्रं *विधीयताम्* क्रियताम अपकारी कदाचिदपि राज्ञा हेलया न उपेक्षणीयः। अतो भवान् अधुनैव तत् प्रतिकाराय यततामिति भावः। नन्वेतत् प्रतिकाराय किं मे कर्त्तव्य मिति त्वयैव वाच्य मित्याशयेनाह *परप्रणीतानि* परैः अन्यैः प्रणीतानि कथितानि तृतीया तत् पुरुषः समासः वचांसि वाक्यानि *चिन्वतां* अनुसन्दधताम् *मादृशाम* मत् सदृशजनानाम् वार्त्तावहानामित्यर्थः *गिरः* वाक्यानि *प्रवृत्तिसाराः* प्रवृत्तिः वार्त्ता एव सारः अवलम्बनं

यासां ताः बहुव्रीहिः समासः वार्त्तामात्रफलाः भवन्तीति शेषः वयं तु केवलं वार्त्तावाहकाः नतु कर्त्तव्यनिर्णायकाः अतस्त्वयैव कर्त्तव्याकर्त्तव्यं निर्णीय यद् युक्तं तद् विधीयतामिति भावः।

सरलार्थः

एवं कपटं व्यवहरन् सः कदाचिदपि भवता नोपेक्षणीयः अतः सत्वरमेव यथोचितं प्रतिविधानं क्रियताम् न कदाचिदपि वयं कर्त्तव्यमुपदेष्टुं शक्नुमः यतो वयं वार्त्तावाहकाः मादृशानां वाक्यानि तु केवलं कर्म्मसु जनान् प्रवर्त्तयितुमर्हन्ति। अर्थान्तरन्यासोऽलङ्कारः।

कौमुदी

तत् इत्यव्ययं "यत्तद्यतस्ततो हेतौ" इत्यमरः। आशु इति "क्रिया विशेषणेचे" ति द्वितीया "सत्वरं चपलं तूर्णमविलम्बितमाशु च" इत्यमरः। त्वयि इति विषयसप्तमी। 'उद्यते इति उत् पूर्वकयम् धातोः क्तप्रत्ययः ततः सप्तमी। चिन्वतामिति चि धातोः शतृप्रत्यये चिन्वदिति ततः षष्ठी बहुवचनम्। मादृशामिति "दृशेरनालोचने कञ् च" इति सूत्रेण चकारात् क्विन् प्रत्ययः ततः षष्ठीबहुवचनम्।

-✡-

अनुचरेण यद् ज्ञातं तद् राज्ञे निवेदितं ततः किं वृत्तम् इति कविः प्रस्तौति। इतीरयित्वेति।

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम्।

प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ॥२६॥

अन्वयः

वनसन्निवासिनां पत्यौ इतिगिरं ईरयित्वा आत्तसत् क्रिये गते (सति) अथ महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तद् वचः आचचक्षे।

वाच्यान्तरम्

वन......महीभुक्......वचः आचचक्षौ अथवा महीभुक् कृष्णां वचः आचचक्षे।

व्याख्या

वनसन्निवासिनाम् वने अरण्ये "अटव्यरण्यंविपिनं गहनं काननं वनमि" त्यमरः सम् सम्यक निवसन्ति ये तेषां वनेचराणां *पत्यौ* अधिपतौ *इति* पूर्वोक्ताम् "इति हेतु प्रकरण प्रकाशादि समाप्तिषु इत्यमरः। *गिरं* वाचम् "ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती" त्यमरः *ईरयित्वा* कथयित्वा *आत्तसत्क्रिये* आत्ता गृहीता सत्क्रिया उपहारादिकं येन तस्मिन् बहुव्रीहिः समासः उपहारादिकं गृहीत्वा इत्यर्थः *गते* स्वभवनं प्रतियाते सति पारितोषिकमेव भृत्यानां वेतनं तदाशया ते शीघ्रं कार्यं कुर्वन्ति *अथ* ततः परम् *महीभुजा* राज्ञा युधिष्ठिरेण *कृष्णासदनं* कृष्णायाः द्रौपद्याः "पाञ्चाली द्रौपदी कृष्णा" इत्यमरः सदनं गृहं षष्ठी तत्पुरुषः समासः प्रविश्य *अनुजसन्निधौ* अनुजानां भीमा-

दीनां भ्रातॄणां सन्निधौ समीपे षष्ठी तत्पुरुषः समासः *तद्* वनेचरेण कथितं सर्वं *वचः* वचनं *आचचक्षे* ऊचे कथित मित्यर्थः अथवा कृष्णा सदन मित्यत्र कृष्णा, सदनं चेति पद-द्वयम् महीभुजा सदनं प्रविश्य अनुजसन्निधौ तद् वचः कृष्णा आचचक्षे कथिता।

सरलार्थः

वनेचरो विदितं सर्वं वृत्तं राज्ञे निवेद्य राजप्रदत्तं उपहारादिकं गृहीत्वा वनं प्रतिगतवान् अथ राजा द्रौपदीगृहं प्रविश्य आनुपूर्विकं सर्वं वनेचरकथितं वृत्तम् अनुजेभ्यः कथयामास।

कौमुदी

पत्यौ इति "यस्य च भावेन भावलक्षणम्" इति सूत्रेण भावे सप्तमी। वचः इति उक्तकर्म्मणि प्रथमा, पक्षे अनुक्तकर्म्मणि द्वितीया, कृष्णा इति आचचक्षे इत्यस्य गौणे कर्म्मणि प्रथमा दुहादे गौणकं कर्म्मेतिन्यायात्। "व्याहार उक्तिर्लपितं भाषितं वचनं वचः" इत्यमरः।

-x-

द्रौपदी स्वामिमुखात् शत्रो रभ्युदयं श्रुत्वा आत्मानं नियन्तु मक्षमेत्याह निशम्येति।

निशम्य सिद्धिं द्विषतामपाकृती
स्ततस्ततस्त्या विनियन्तुमक्षमा।
नृपस्य मन्युव्यवसायदीपिनी
रुदाजहार द्रुपदात्मजा गिरः॥ २७॥

अन्वयः

अथद्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततः ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा नृपस्य मन्युव्यवसायदीपिनीः गिरः उदाजहार ।

वाच्यान्तरम्

अथ द्रुपदात्मजया......अक्षमया.. ...मन्युव्यवसायदीपिन्यः गिरः उदाजह्रिरे ।

व्याख्या

अथ अनुजसन्निधाने युधिष्ठिरमुखात् वनेचरोक्तं श्रुत्वा *द्रुपदात्मजा* द्रुपदराजपुत्री *द्विषतां* शत्रूणां *सिद्धिं* उत्कर्षं *निशम्य* श्रुत्वा *ततः* तदनन्तरम् श्रवणानन्तरमित्यर्थः *ततस्त्याः* ततस्तेभ्यः शत्रुभ्य आगताः शत्रुभिर्जनिताः इत्यर्थः *अपाकृतीः* अपकारान् *विनियन्तुम्* रोद्धुम् *अक्षमा *अशक्ता *नृपस्य* राज्ञो युधिष्ठिरस्य *मन्युव्यवसायदीपिनीः* मन्युः क्रोधः "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । व्यवसायः शत्रुवधादावुद्यमः तयोः क्रोधोत्साहयोरित्यर्थः दीपिनीः समुत्पादिकाः उद्बोधकारिणी रित्यर्थः *गिरः* वचांसि *उदाजहार* कथितवती ।

सरलार्थः

द्रुपदराजनन्दिनी स्वामिमुखात् शत्रो रसाधारण मभ्युदयं श्रुत्वा आत्मनः चाञ्चल्यं संवरीतुम् असमर्था धैर्यलोपात् राज्ञः क्रोधोद्बोधिनीं वाचं वक्तुमुपक्रमतेस्म ।

कौमुदी

ततस्त्या इति ततः आगताः इति "अव्ययात् त्यप्" इति त्यप् प्रत्ययः । अक्षमेतिक्षमते इति क्षमा पचाद्यच् ततो नक्षमा इति न शब्देन समासः । दीपिनीरिति दीपयतेर्णिनि प्रत्ययः । आत्मजेति आत्मनोजायते इति जनेर्ड प्रत्ययः ।

-※-

व्यथितायाः शालीनता कुत इत्याह भवादृशेषु इति ।

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥२८॥

अन्वयः

भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेपइव भवति तथापि निरस्तनारीसमया दुराधयः माम् वक्तुम् व्यवसाययन्ति ।

वाच्यान्तरम्

भवादृशेषु प्रमदाजनोदितेन अनुशासनेन अधिक्षेपेण इव भूयते . निरस्तनारीसमयैः दुराधिभिः अहम् ...व्यवसाये ।

व्याख्या

भवादृशेषु त्वत्तुल्यविज्ञजनेषु *प्रमदाजनोदितम्* प्रमदाः कामिन्यः एव जनाः "विशेषास्त्वङ्गनाभीरुकामिनीवामलो-

चना: । प्रमदा भाविनी कान्ता ललना च नितम्बिनी" त्यमर: तैः उदितं कथितं नारीविशेषोपदिष्टमित्यर्थ: । *अनुशासनम्* कर्त्तव्येषु सदुपदेशवाक्यम् *अधिक्षेप:* अवमानना इव भवति तर्हि निरस्ता एव आस्ताम् भवती त्यत आह तथापीति *तथापि* मम वचनानौचित्येऽपि *निरस्तनारी समया:* निरस्ता: निराकृता: अपसारिता इत्यर्थ: नारीणां स्त्रीणाम् समया: आचारा: "समया: शपथाचारकालसिद्धान्तसंविद: " इत्यमर: यै: ते निराकृतलज्जारूपस्त्रीस्वभावा: इत्यर्थ: *दुराधय:* दु: दुष्टा: आधय: मनोदु:खानि "पुंस्याधिर्मानसीव्यथा" इत्यमर: माम् *वक्तुम्* कथयितुम् व्यवसाययन्ति प्रेरयन्ति दु:खेषु सर्वं युज्यते इति भाव: ।

सरलार्थः

भवन्तो राजनीतिनिपुणा: सर्वशास्त्रज्ञा:, अहं च स्वल्पबुद्धि; मम भवद्विधेषु नीत्युपदेशकथनम् धृष्टतैव, अतो मम कथन मनुचित मिति जानामि तथापि मनोदु:खेन भृशं पर्याकुलास्मीति शालीनता-मुल्लङ्घ्य वक्तुं प्रवृत्तास्मि किं करोमि दु:ख मेवात्रापराध्यति न मे दोष: । अत्र दुराधयो मां वक्तुं व्यवसाययन्ति इति वाक्यार्थस्य निष्पादकहेतुतया निरस्तनारी समया इति विशेषण पदोपन्यासात् काव्यलिङ्गमलङ्कार: । पूर्वार्धे च अनुशासनम् अधिक्षेप इवेति साम्य प्रतिपादनादुपमालङ्कारः इति द्वयोर्मिथोऽनपेक्षयावस्थानात् संसृष्टिः ।

कौमुदी

भवादृशेषु इति भवन्त इव दृश्यन्ते ये तेषु "दृशेरनालोचने कञ

चे" ति चकारात् क्विन् प्रत्ययः। दुराधय इति दुष्टाः आधयः इत्यर्थे दुःशब्देन प्रादिसमासः।

-x-

भवद्द्वापादेवायमनर्थो जात इति राजानम् कटाक्षाक्षिप्तम् करोति अखण्डमिति।

अखण्डमाखण्डलतुल्यधामभि
श्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥२९॥

अन्वयः

आखण्डलतुल्यधामभिः स्ववंशजैः भूपतिभिः चिरम् अखण्डम् धृता मही त्वया मदच्युता मतङ्गजेन स्रक् इव आत्महस्तेन अपवर्जिता।

वाच्यान्तरम्

आखण्डल......धृतां महीं त्वं मदच्युत् मतङ्गजः स्रजमिव...... अपवर्जितवान्।

व्याख्या

आखण्डलतुल्यधामभिः आखण्डलस्य इन्द्रस्य तुल्यं समानं धाम तेजः प्रभाव इत्यर्थः येषां तैः बहुब्रीहिः समासः "धाम रश्मौ गृहे देहे स्थाने जन्म प्रभावयो" रिति हेमः। इन्द्रतुल्य पराक्रमशालिभिरित्यर्थः *स्ववंशजैः* स्वस्य आत्मनः वंशः कुलं तस्मात् जायन्ते उतपद्यन्ते ये तैः स्वकुलोत् पन्नै-

रित्यर्थः *भूपतिभिः* भुवः पृथिव्याः पतयः स्वामिनः तैर्भरता दिभिर्नृपतिभिः *चिरं* चिरकालात् "चिरायचिररात्राय चिरस्याद्याश्चिरार्थकाः" इत्यमरः *अखण्डं* अविच्छिन्नं *धृता* प्रतिपालिता *मही* पृथिवी राज्यमिति यावत् *त्वया* भवता *मदच्युता* मदं दानजलं च्योतति क्षरति इति मदच्युत् तेन मदस्राविणा *मतङ्गजेन* हस्तिना "दन्ती दन्तावलोहस्ती द्विरदोऽनेकपोद्विपः। मतङ्गजो गजो नागः" इत्यमरः *स्रगिव* माला इव *आत्महस्तेन* स्वहस्तेन *अपवर्जिता* त्यक्ता। भवतोऽनवधानतैव अस्यानर्थस्य कारणमिति भावः।

सरलार्थः

इन्द्रतुल्यप्रतापशालिनो भवतः पूर्वपुरुषाः क्रमतो यद्राज्यं प्रतिपालयामासुः तद्राज्य मिदानीं त्वं स्वहस्तेन मदमत्तः गजोयथा प्राप्तां मालिकां हेलया दूरे निक्षिपति तथा अनवधानतया शत्रुहस्ते निक्षिप्तवान्। अत्र मतङ्गजेनेव त्वया स्रगिव मही अपवर्जितेति साम्य प्रतिपादनात् पूर्णोपमालङ्कारः।

कौमुदी

भूपतिभिरिति त्वयेतिच कर्त्तरितृतीया। आत्महस्तेनेति करणे तृतीया। मदच्युतेति च्युतधातोः क्विप्। मतङ्गजेनेति कर्त्तरि तृतीया।

-x-

"शठे शाठ्यं समाचरेत्" इति न्यायानुवर्त्तिता विरह एव विपत् कारण मित्याह व्रजन्तीति।

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा
न संवृताङ्गान्निशिता इवेषवः ॥३०॥

अन्वयः

ये मायाविषुमायिनः न भवन्तिते मूढधियः पराभवंव्रजन्ति निशिताः इषवः असंवृताङ्गान् इव शठाः तथाविधान् प्रविश्य घ्नन्ति ।

वाच्यपरिवर्तनं

येः......मायिभिः न भूयते तैः मूढधीभिः पराभवः व्रज्यते निशितैः इषुभिः असंवृताङ्गाः इव शठैः तथा विधाः प्रविश्य हन्यन्ते ।

व्याख्या

ये जनाः भवादृशाः निग्रहानु ग्रहकर्त्तार इत्यर्थः *मायाविषु* माया कापट्यं विद्यते येषां तेषु कपटता परायणेषु इत्यर्थः *मायिनः* कपटाचारपरायणाः *न भवन्ति* *ते मूढधियः* मूढा मुग्धा विचारहीना धीर्बुद्धि र्येषां ते अविवेकिन इत्यर्थः पराभवं *पराजयं* *व्रजन्ति* गच्छन्ति प्राप्नुवन्ति इत्यर्थः । अर्थान्तरं दर्शयति निशिताः इति *निशिताः* तेजिताः तीक्ष्णाः इत्यर्थः "निशितक्ष्णुतशातानितेजिते" इत्यमरः *इषवः* वाणाः पृषत्क वाण विशिखा अजिह्मग खगाशुगाः कलम्ब मार्गणशराः पत्री रोप इषुर्द्वयोः" इत्यमरः । *असंवृताङ्गान्* असंवृतं अनाच्छादितं अङ्गं शरीरं येषां तान् बहुव्रीहिः समासः वर्म्मणा

अनाच्छादितदेहान् इत्यर्थः *इव* *शठाः* वञ्चकाः *तथा-विधान्* तादृशान् भवादृशान् कपटाचारपरायणेषु कौटिल्य शून्यानित्यर्थः * प्रविश्य * *घ्नन्ति* विनाशयन्ति * हि * अवश्यम्। यथावाणाः अवर्मितं शरीरं प्रविश्य विनाशयन्ति तथा शठाः कुटिलनीत्या साधून् आत्मीयान् कुर्वन्तो घ्नन्तीति भावः। "शठे शाठ्यं समाचरेत्" इति हि नीतिः।

सरलार्थः

प्रतारकेषु प्रतारणा एव युज्यते अन्यथा तादृशाः विचारहीनाः पराभूता भवन्ति प्रतारकास्तु शाठ्येन ऋजुस्वभावान् साधून् आत्मीयान् कुर्वन्तः अवर्म्मितदेहान् बाणाः इव निर्बाधं प्रविश्य नाशयन्ति। अत्र पराद्धगतवाक्यार्थेन पूर्वार्द्धगतवाक्यार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः। तथोत्तरार्धे शराः निशिता इषव इवेति साम्य प्रतिपादनादुपमालङ्कारः। ततश्च तयो रेकाश्रयस्थितया सङ्करः। अलङ्कारयोलक्षणेतु प्रागेवोक्ते। सङ्करलक्षणम् यथा "अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ। सन्दिग्धत्वे च भवति सङ्कर स्त्रिविधः पुनः।"

कौमुदी

मायाविषु इति 'अस् मायामेधास्रजोविनि" इति सूत्रेण माया शब्दाद् विनिप्रत्ययः। पराभवमिति "ऋदोरप्" इति सूत्रेण परापूर्वकाद् भूधातो रप् प्रत्ययः।

-x-

अनवहितश्चेदुपेक्षते तर्हि चञ्चला लक्ष्मीः भवन्तं परित्यजेदित्याशयेनाह गुणानुरक्तामिति।

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥३१॥

अन्वयः

अनुरक्तसाधनः कुलाभिमानी त्वदन्यः कः इव नराधिपः गुणानुरक्तां कुलजाम् मनोरमाम् श्रियम् आत्मवधूमिव परैः अपहारयेत् ।

वाच्यान्तरम्

अनुरक्तसाधनेन कुलाभिमानिनात्वदन्येन केनइव नराधिपेन गुणानुरक्ता कुलजा मनोरमा श्रीः आत्मवधूः इव परैः अपहार्य्येत ।

व्याख्या

अनुरक्तसाधनः अनुरक्तं अनुकूलं साधनं सहायो यस्य सः बहुव्रीहिः समासः अनुकूलसहायसमन्वित इत्यर्थः । *कुलाभिमानी* कुलस्य आत्मनः सत्कुलमर्यादायाः अभिमानः गर्वः विद्यते यस्य सः "गर्वोऽभिमानोऽहङ्कारः" इत्यमरः *त्वदन्यः* त्वत्तः भवतो अन्यः अपरः *कः इव नराधिपः* को राजा *गुणानुरक्ताम्* गुणैः सन्धिविग्रहादिभिः मनोहरत्वादिभिश्च अनुरक्तां आसक्ति सम्पन्नां *कुलजां* कुलक्रमतः समागतां कुलीनां च *मनोरमां* मनोज्ञां *श्रियं* लक्ष्मीम् *आत्मवधूमिव* आत्मनः स्वस्य वधूम् भार्यामिव "वधूर्जायास्नुषा स्त्रीच" इत्यमरः *परैः* शत्रुभिः अन्यैश्च *अपहारयेत्* स्वय-

मपहारं कारयेदित्यर्थः। भार्यापहारे राज्ञां यादृक् दोषो लक्ष्म्यपहारेऽपि तादृगेवेति सर्वथा भवताहेलया शत्रुर्नोपेक्षणीय इति भावः।

सरलार्थः

उद्योगिनं पुरुषसिंह मुपैति लक्ष्मीः उद्यमहीनानां तु लक्ष्मीः हीनाश्रयत्वात् तानाश्रित्य न तिष्ठति अतः उपयुक्तसहायेन क्षत्रियेण भवता महाराजेन कुलक्रमागतालक्ष्मी मिदानीमनुद्योगिना सता यत् परेषु हेलया निक्षिप्यते स्वभार्येव इतोऽधिकं राज्ञां मानहानिकरं किमस्ति। अत्रश्लोके आत्मवधूमिव श्रियमिति साम्य प्रतिपादनादुपमालङ्कारः। स च गुणानुरक्ताम्, अनुरक्तसाधनः कुलाभिमानी कुलजां मनोरमां इत्येतैः श्लिष्टैः पदैरनुप्राणितः।

कौमुदी

त्वदिति अन्यरादित्यादिना पञ्चमी। परैरिति "हृक्रोरन्यतरस्याम्" इति सूत्रेण प्रयोज्ये कर्त्तरि तृतीया। अन्यत्र परानिति पराः श्रियमपहरेयु रिति अणिजन्तप्रयोगः णिजन्त प्रयोगस्तु कः परैः परान् वा श्रियमपहारयेत्।

-x-

इतः प्रभृति दशभिः श्लोकैः राज्ञः क्रोध मुद्दीपयति भवन्त मित्यादिभिः।

भवन्तमेतर्हि मनस्विगर्हिते
विवर्त्तमानं नरदेव वर्त्मनि।

कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥३२॥

अन्वयः

हे नरदेव एतर्हि मनस्विगर्हिते वर्त्मनि विवर्त्तमानं भवन्तम् उदीरितः मन्युः उच्छिखः अग्निः शुष्कं शमीतरुम् इव कथम् न ज्वलयति ।

वाच्यान्तरम्

हे .....विवर्त्तमानः भवान् उदीरितेन मन्युना उच्छिखेन अग्निना शुष्कः शमीतरुः इव......ज्वल्यते ।

व्याख्या

हे नरदेव "महती देवता ह्येषा नररूपेण तिष्ठति" इति वाक्यात् नरदेव इति राजनि साधुसङ्गच्छते हे राजन् एतर्हि अधुना विपत्कालागमे इत्यर्थः "एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा" इत्यमरः *मनस्विगर्हिते* मनस्विभिः प्रशस्तमनोभिः *गर्हिते* निन्दिते *वर्त्मनि* पथि वीरजननिन्दितमार्ग इत्यर्थः *विवर्त्तमानं* पतितं दुर्दशाग्रस्तमित्यर्थः *भवन्तं* त्वाम् *उदीरितः* क्षोभादुद्दीपितः सन्धुक्षितः इति यावत् *मन्युः* क्रोधः *उच्छिखः* उत् उद्गता ऊर्ध्वंगता शिखा ज्वाला यस्य ज्वलन्नित्यर्थः *अग्निः* *शुष्कं* रसहीनं *शमीतरुं* शमीवृक्षं "वृक्षो महीरुहः शाखी विटपी पादपस्तरुः" इत्यमरः *कथं* केन हेतुना *न ज्वलयति* न दाहयति । अत्र शुष्कमिति राजपक्षे शौर्याभावेन तथाविध दुरवस्थया नीरसम्

इति क्रोधस्य तथा शमीतरुपक्षे रसहीनतया अग्नेर्ज्वलन सम्भवत्वबोधायोपयुज्यते ।

सरलार्थः

अग्निर्यथा शुष्कं शमीतरुं प्राप्यैवज्वलयति तथा एतादृशदुरवस्थया खिद्यमानं भवन्तं प्राप्यैव क्रोधो न कथं ज्वलयति । अत्र शमीतरुमिव भवन्तम् अग्निरिव क्रोधो न कथं ज्वलयतीति वाक्येन साम्य प्रतिपादनादुपमालङ्कारः ।

कौमुदी

नरदेवेति नरेषुदेवेति सप्तमी तत्पुरुषः एतर्हीति ''इदमोर्हिल्'' इति हिल् प्रत्ययः । मनस्वीति प्रशस्तं मनो विद्यतेऽस्येतिविनिप्रत्ययः प्रशस्तार्थे मनस्विभिर्गर्हिते इति तृतीया तत्पुरुषः समासः ।

-※-

क्रोधादिरिपुवशीभूतोनश्यति अतः सर्वथा क्रोधः परिहरणीय एवेति चे दुच्यते अवन्ध्यकोपस्येति ।

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥३३॥

अन्वयः

अवन्ध्य कोपस्य आपदां विहन्तुः देहिनः स्वयम् एव वश्याः भवन्ति

अमर्ष शून्येन जन्तुना जातहार्देन (सता) जनस्य न आदरः (भवति) विद्विषा (सता) न दरः (भवति) अथवा आदरः न (भवति)

वाच्यान्तरम्

देहिभिः......वश्यैः भूयते......आदरेण भूयते ।

व्याख्या

अवन्ध्य कोपस्य अवन्ध्यः न बन्ध्यः सफलः इत्यर्थः "बन्ध्योऽफलोऽवकेशोच" इत्यमरः कोपः क्रोधः यस्य तस्य बहुव्रीहिः समासः निग्रहीतुं समर्थस्येतिभावः * आपदां * विपदां *विहन्तुः* विनाशकस्य विपद्भ्यः स्त्रातुं समर्थस्येत्यर्थः *देहिनः* प्राणिनः *स्वयमेव* स्वेच्छयैव भिया त्रातृत्वेनच *वश्याः* आयत्ताः *भवन्ति* अक्रोधस्य दोषमाह *अमर्ष-शून्येन* अमर्षः क्रोधः "कोपः क्रोधामर्षरोषप्रतिघारुट् क्रुधौ स्त्रियाः" मित्यमरः। तेन शून्यः रहितः तेन तृतीयातत्पुरुषः समासः। क्रोधविरहितेन *जन्तुना* जीवेन *जातहार्देन* जातं उत्पन्नं हार्दं स्नेहः यस्य तेन बहुव्रीहिः स्नेहवता सता "प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथदोहदः" इत्यमरः *जनस्य* लोकस्य *आदरः* आसक्तिः न भवति तथा *विद्विषा* शत्रुताचरणपरायणेन वा सता आदरः न भवति यद्वा *दरः* भयं न भवति "दरोऽस्त्रियां भये श्वभ्रे" इत्यमरः। रागद्वेष विरहितस्य स्नेहकोपौ तुल्यावेवाकिञ्चित्करौ इति भावः।

सरलार्थः

यस्य क्रोधो महाबाधः प्रसादस्तु महाफलः कस्तस्य मनसापीच्छेद्

निष्टं प्राज्ञसम्मतः इति वाक्यात् क्रोधिन एव जना वश्यतामापद्यन्ते अक्रोधस्य आदरानादरा वकिञ्चित्करौ अतो जनास्तं हेलया उपेक्षन्ते। अत्र अमर्षशून्येनेत्यादि सामान्येनाप्रस्तुतेन विशेषस्य प्रस्तुतस्य गाढ़ः प्रतीति रित्यप्रस्तुतंप्रशंसालङ्कारः। तल्लक्षणं यथा "क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः। कार्यान्निमित्तं कार्यञ्च हेतोरथ समात् समम्। अप्रस्तुनात् प्रस्तुतञ्चेद् गम्यते पञ्चधाततः। अप्रस्तुत प्रशंसा स्यात्। अत्र जन्तुपदस्य मानवार्थेऽ वाचकतया अवाचकत्वदोषः। "प्राणी तु चेतनोजन्मी जन्तुजन्यु शरीरिणः" इत्यमरः।

कौमुदी

आपदामिति कर्म्मणि षष्ठी विहन्तुरितिकृत्प्रयोगेण "कर्त्तृ क-र्म्मणोः कृती" तिसूत्रेण स्वयमिति तृतीयान्तमव्ययम् "प्रकृत्यादिभ्यश्चे" ति सूत्रेणतृतीया। जनस्येति कर्त्तरिषष्ठी आदर इति कृत् प्रयोगेण। सम्बन्ध विवक्षया वा।

*

जन्तुनेति कन्यया शोकः इतिवत् "हेतौ" इति तृतीया अनुक्त सहार्थे वा तथा च क्रोधशून्येन जनेन सह लोकस्य प्रीतिर्नभवतीति। इदानी मनुजानां दुर्दशां वर्णयति परिभ्रमन्निति।

परिभ्रमँल्लोहितचन्दनोचितः

पदातिरन्तर्गिरि रेणुरूषितः।

महारथः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः ॥३४॥

अन्वयः

लोहितचन्दनोचितः पदातिः रेणुरूषितः महारथः अन्तर्गिरि परिभ्रमन् अयं वृकोदरः सत्य धनस्य (तव) मानसं न दुनोति कच्चित् ।

वाच्यान्तरम्

लोहित चन्दनो चितेन पदातिना रेणुरूषितेन महारथेन...परिभ्रमता अनेन वृकोदरेण .....न दूयते ।

व्याख्या

लोहित चन्दनोचितः लोहितं रक्तं चन्दनं इति कर्मधारयः तस्मिन् उचितः अभ्यस्तः सप्तमी तत्पुरुषः व्यवहृत रक्तचन्दन इत्यर्थः "अभ्यस्तेऽप्युचितंन्याय्यम्" इति यादवः *पदातिः* पद्भ्यां चरणाभ्याम् गच्छति इति पादचारी *रेणुरूषितः* रेणुभिः धूलिभिः रूषितः सम्पृक्तः तृतीया तत्पुरुषः *महारथः* "एको दशसहस्त्राणि योधयेद् यस्तु धन्विनाम् । स महारथ संज्ञः स्यादित्याहुर्नीति कोविदः" एतादृग् लक्षणो वीरः *अन्तर्गिरि* गिरिषु पर्वतेषु अन्तः इत्यव्ययीभावः पर्वतात् पर्वते *परिभ्रमन्* विचरन् *अयं वृकोदरः* भीमः *सत्यधनस्य* सत्यमेव धनं यस्येति बहुब्रीहिः तव *मानसं* चित्तं "चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः *नोदूनोति कच्चित्* न परितापयति किम् । सत्यं रिरक्षिषुणा

भवता अनुजाः परित्यज्यन्ते तदपि ते न दुःखकारणमिति भावः ।

सरलार्थः

इतः पूर्वं यः नानाविधैः सुवासितैश्चन्दनादिभिः शरीरं विलिम्पतिस्म स एवायं महारथो भीमः पद्भ्यां पर्वतात् पर्वतं गच्छन् यत् क्लेश मनुभवति तद्विलोक्यापि भवता सत्यमेव परिगृहीता न दूयते । अहो इदानीमपि सत्यमेव ते प्रधानं न भ्रातरः ।

कौमुदी

पदातिरिति औणादिकः इण् प्रत्ययः । "पादस्य पदाज्यातिगोपहतेषु" इति पदादेशः । अन्तर्गिरि इतितु "गिरेः सेनकस्य" इत्यनेन टच् प्रत्ययस्य पाक्षिक त्वात् टच् प्रत्यय पक्षेतु अन्तर्गिरमिति वृकोदर इति वृकोनाम तीक्ष्णोऽग्निः उदरे यस्येति बहुव्रीहिः तथा च मात्स्ये 'यस्य तीक्ष्णो वृकोनाम जठरे हव्यवाहनः । मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः ।" "गडवादेः परासप्तमी" ति सूत्रेण उदरस्य परनिपातः यद्वा वृकस्य व्याघ्रविशेषस्य उदरमिव उदरं यस्य स इति उपमान पूर्वपदो बहुव्रीहिः उत्तरपदलोपश्च ।

-x-

इदानीमर्जुनस्यावस्थां वर्णयति विजित्येति ।

विजित्य यः प्राज्यमयच्छदुत्तरा
न्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुना हरन्
करोति मन्युं न कथं धनञ्जयः ॥३५॥

अन्वयः

वासवोपमः यः उत्तरान् कुरून् विजित्य प्राज्यं अकुप्यं वसु अयच्छत् सः धनञ्जयः अधुना तव वल्कवासांसि आहरन् कथं (तव) मन्युं न करोति ।

वाच्यान्तरम्

वासवोपमेन येन......अदीयत तेनधनञ्जयेन......आहरता...... मन्युः न क्रियते ।

व्याख्या

वासवोपमः वासवः इन्द्रः "इन्द्रो मरुत्वान्मघवा...... वासवोवृत्रहा वृषा" इत्यमरः उपमा उपमानं यस्येति बहुव्रीहिः इन्द्रतुल्यः *यः* योऽर्ज्जुनः *उत्तरान्* सुमेरोरुत्तरदिग् वर्त्तिनः *कुरून्* देशविशेषान् *विजित्य* पराभूय *प्राज्यं* प्रचुरम् "प्रभूतं प्रचुरं प्राज्य" मित्यमरः । *अकुप्यं* सुवर्ण रजाताभ्यामन्यत् यत् तत् कुप्यं तत् न भवतीति अकुप्यं सुवर्ण रजतादिकं "स्यात् कोपश्च हिरण्यञ्च हेमरूप्ये कृताकृते ताभ्यां यदन्यत्तत् कुप्य" मित्यमरः *वसु* धनम् *अयच्छत्* दत्तवान् *स धनञ्जयः* धनं जयतीति धनञ्जयः अर्ज्जुनः *अधुना* सम्प्रति *तव* भवतः । वल्कवासांसिवल्कान्येव वृक्षत्वचएव वासांसि वस्त्राणि कर्म्मधारयः *आहरन्* उपानयन् *मन्युं* शोकं क्रोधं वा *नकथं करोति* केन हेतुना न जनयति ।

सरलार्थः

यस्तावदर्जुनो युद्धे असीमवीर्यं दर्शयन् पुरा उत्तरान् कुरून् जित्वा प्रचुरं सुवर्णरत्नादिकं तुभ्यं दत्तवान् स एवाय मिदानीं भवत् परिधानार्थं वृक्षवल्कलान्याहरति एतद् दृष्ट्वापि भवतश्चेतः किं न दुःखायते।

कौमुदी

कुप्य मिति "राजसूय सूर्ये" त्यादिना क्यप्प्रत्यये "गुपेरादेः कुत्वं च संज्ञाया" मिति निपातनात् सिद्धम् धनञ्जय इति धनं जयतीति "संज्ञायां भृतॄवृजी" त्यादिना खच् प्रत्ययः।

इदानीं नकुल सहदेवयोर्दुर्दशां वर्णयति वनान्त शय्येति।

वनान्तशय्या कठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥३६॥

अन्वयः

वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अगजौ गजौ इव एतौ यमौ विलोकयन् धृतिसंयमौ बाधितुं कथं न उत् सहसे।

वाच्यान्तरम्

......विलोकयता......न उत्सह्यते।

व्याख्या

वनान्तशय्या कठिनीकृताकृती वनस्य अरण्यस्य अन्तः

अवयवः वनभूमि रित्यर्थः षष्ठी तत्पुरुषः स एव शय्या शयनम् कर्म्मधारयः तया कठिनीकृता कठोरीकृता आकृतिः देहो ययो स्तौ तृतीया तत्पुरुषगर्भ वहुब्रीहिः "आकारो देह आकृति" रिति वैजयन्ती वनभूमिशयनाभ्यासेन कर्कशशरीरौ इत्यर्थः *विष्वक्* समन्तात् सर्वासुदिक्षु "समन्ततस्तु परितः सर्वतो विष्वगित्यपि" इत्यमरः *कचाचितौ* कचैः केशैः कचः केशः शिरोरुहः" इत्यमरः। आचितौ व्याप्तौ तृतीया तत्पुरुषः अत-एव *अगजौ* अगात् पर्वतात् "शैलवृक्षौ नगावगौ" इत्यमरः जायेते इति उपपदसमासः पर्वत जातौ इत्यर्थः गजौ हस्तिनौ इव *एतौयमौ* युग्मजातौ माद्रीपुत्रौ नकुलसहदेवा वित्यर्थः. "यमोदण्डधरे ध्वाङ्क्षे संयमे यमजेऽपिच" इति विश्वः *वि-लोकयन्* पश्यन् *धृतिसंयमौ* धृतिः तुष्टिः "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्वः। संयमो नियमः तौ इति द्वन्द्वः तु। *बाधितुं* पीडयितुं त्यक्तुमित्यर्थः *कथं* केन हेतुना *न उत्सहसे* न प्रवर्त्तसे। अहो ते महद् धैर्यमिति भावः।

सरलार्थः

इमौ राजपुत्रौ नकुल सहदेवौ माद्रीपुत्रौ तव भ्रातरौ सुकोमल-शरीरौ यत्नेन पालितौ राजोचित शय्यायां शयनोचितावपि निरन्तर मसंस्कृतवनभूमिमधिशयाते तेन एतयोः आकृतिर्मलिना कर्कशा च संवृत्ता संस्काराभावेण एतयोः केशाः समन्तात् विलम्बन्ते पर्वतजातौ लोमाच्छादितौ धूलिधूसरितौ गजौ इव दृश्येते एनयो रेतादृशीं दुरव-

स्यां विलोक्यापि त्वं धैर्यं न जहासि नवा क्रोधं करोषि अहो अद्भुतं तवधैर्यम् गजौगजौ यमौ यमौ इति स्वरव्यञ्जनसंहतेस्तेनैव क्रमेणा-वृत्तेर्यमकालङ्कारः कृताकृतीतिस्वरभेदे व्यञ्जन संघस्य तेनैव क्रमेणा वृत्तेः छेकानुप्रासोऽलङ्कारः तथा गजौ इव एनौ इति साम्य प्रतिपादना-दुपमालङ्कारः इति शब्दार्थालङ्काराणां संसृष्टिः यमक लक्षणम्–"सत्यर्थे पृथगर्थायाः स्वरव्यञ्जन संहतेः। क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।" छेकानुप्रासलक्षणम्–"छेका व्यञ्जन संघस्य सकृत् साम्य मनेकधा।"

कौमुदी

शय्येति शय्यते अस्यामिति संज्ञायां "समज निषदे" त्यादिनाक्यप् प्रत्ययः। अगजौ इति अगात् जायते इति "पञ्चम्यामजातौ" इतिजनेर्डः।

-x-

भ्रातृचतुष्टयस्य दुर्दशां वर्णयित्वा इदानीं राज्ञो दशां वर्ण-यति इमामिति।

इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥३७॥

अन्वयः

इमां तावकीं धियं अहं न वेद चित्तवृत्तयः विचित्ररूपाः खलु (भवन्ति) परां भवदापदं विचिन्तयन्त्या मम आधयः चेतः प्रसभं रुजन्ति।

वाच्यान्तरम्

इयं तावकी धीः मया न विद्यते चित्तवृत्तिभिः विचित्ररूपाभिः खलु भूयते......आधिभिः......रुज्यते ।

व्याख्या

इमां परिदृश्यमानां *तावकीं* तव इमां भवत् सम्बन्धिनीमित्यर्थः *धियं* बुद्धिं *अहं न वेद* अहं न जानामि न बोद्धुं शक्नोमीत्यर्थः अहं स्त्रीजन इति भवतः सुगभीरां चित्तवृत्तिं अवगन्तुं नार्हामीति भावः। *चित्तवृत्तयः* चित्तस्य मनसो वृत्तयो भावाः *विचित्ररूपाः* विचित्रं विभिन्नं रूपं यासां ताः भवन्ति खलु *परां* महतीं *भवदापदं* भवतः आपदं विपदं *विचिन्तयन्त्याः* *मम* *आधयः* मनोदुःखानि *चेतः* चित्तं *प्रसभं* वलात् *रुजन्ति* पीडयन्ति भ्रातृणामेवं सुदुःसहं दुःखमनुभवन्तमपि भवन्त मियं दुर्दशा न दुःखयतीतोऽधिकं किमाश्चर्यमितिभावः।

सरलार्थः

संसारेऽस्मिन् मनुजानां चित्तवृत्तयो विभिन्नाः सर्वेऽपि विपत्पाते मुह्यन्ति अहमपि भवता मेतादृशीं दुरवस्थां विलोक्य नितरां शोकसंतप्तास्मि भवांस्तु सुदुःसहमपि भ्रातृणां मम आत्मनश्च दुःखं निरन्तर मनुभूयापि यद् धैर्यमवलम्ब्य वर्त्तते तन्महदाश्चर्यमिव मन्ये। अत्र प्रथमार्धे विचित्ररूपा इत्यादिना कारणेन इमामहंवेदेत्यादि कार्यस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः।

कौमुदी

तावकीमिति तव इमामित्यर्थे "तस्येदमि" तिसूत्रेण अण् प्रत्ययः "तवकममकावेकवचन" इति तवकादेशः।, वेदेति "विदोलटोवे" ति सूत्रेण णलादेशः। आधयः इति "उपसर्गे घोः कि" रिति सूत्रेण आङ् पूर्वकधाधातोः कि प्रत्ययः। "रुजार्थानां भाववचनानामज्वरे" इति सूत्रे भाववचनस्य कर्त्तृत्व एव कर्म्मणि षष्ठी विधानादत्त आधयः इतिपदस्य तथात्वाभावात् चेतः इति कर्म्मणि न षष्ठी।

*

इदानीं युधिष्ठिरस्यदुर्दशां श्लोकत्रयेनाहपुरेति।

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः॥३८॥

अन्वयः

यः पुरा महाधनं शयनम् अधिरूढः स्तुतिगीतिमङ्गलैः विबोध्यसे सः त्वम् अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रांजहासि।

वाच्यपरिवर्तनं

यं......अधिरूढं स्तुतिगीतिमङ्गलानि (मङ्गलैः वा वैतालिकाः) विबोधयन्ति तेन त्वया......निद्रा हीयते।

व्याख्या

***यः* त्वं महाराजो भवान् पुरा सिंहासनावस्थितकाले**

महाधनं महत् प्रचुरं धनं मूल्यं यस्य तत् इति वहुव्रीहिः समासः "महाधनं महामूल्यमितिविश्वः" *शयनं* शय्यते अस्मिन्निति शयनम् अधिकरणेल्युट् प्रत्ययः। शय्यां अधिरूढः शय्यायां शयितः सन् *स्तुतिगीतिमङ्गलैः* स्तुतयः राजप्रशस्ति वर्णनात्मकचारणकृतस्तोत्राणि गीतयः तत्कालोपयोगीनि सङ्गीतानि तयार्द्वन्द्वे स्तुतिगीतयः वैतालिकप्रवन्धाः ताएवमङ्ग-लानि तैः विबोध्यसे जागर्य्यसे स त्वं महाराजः अदभ्राः प्रचुराः दभ्राः कुशाः यस्यां सा तां बहुकुशां "कुशमात्रावृतामित्यर्थः अस्त्रीकुशं कुशोदर्भ" इत्यमरः 'अदभ्रं बहुलंबहु' इत्यमरः *स्थलीं* स्थानं दुःसहस्पर्शां वनभूमिम् अधिशय्य शयित्वा *अशिवैः* अमङ्गलैः शिवारुतैः शृगालध्वनिभिः "शिवाहरीतकी क्रोष्टा शमीनद्यामलक्युभे इति वैजयन्ती" *निद्रां* "स्यान्निद्राशयनं" स्वापः स्वप्नः सम्वेश इत्यपि इत्यमरः इदानीं कर्णरुजाकरैः शिवाध्वनिभिः विगतनिद्रो भवसि किमितो दुःखं राजनि सम्भाव्यते इतिभावः।

सरलार्थः

पृथिवीश्वरो भवान् कुशसूचिसमाकीर्णायां भूमौ शयित्वा निशां नयति अति सुकुमारं महार्हं शयनीयं ते इदानीं कागतम्। कनुते ललितो दारपदवन्धं गीतं गायन्तो मागधा ये प्रभातेत्वां प्राबोधयन् इदानीं यथा-कथञ्चिन्निद्रास्मः प्रभाते भीमैः रशुभैर्गोमायुरुतैर्निद्राभङ्गमवाप्नोषि अहोदुर्ललितस्य विधेर्विलसितम्।

कौमुदी

अधिरुढः इति अधिरुहेः क्तप्रत्ययः कर्त्तरि अधिशय्य इति अधिपूर्व-कस्यशी धातोर्ल्यप । प्रत्ययः शयनमिति "अधिसीङ् स्थासां कर्म्मेति" सूत्रेण कर्म्मत्वात् द्वितीया अन्यत्सर्वं व्याख्यायां द्रष्टव्यम् ।

*

इदानीं यशस्तया देहश्च क्षयंयातीत्याह पुरेत्यादि ।

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥३९॥

अन्वय

हे नृप पुराद्विजाति शेषेण अन्धसा यत् एतत् ते वपुः रामणीयकम् उपनीतं अद्य वन्यफलाशिनः ते तत् (वपुः) यशसा समं परं कार्श्यम् परैति ।

वाच्यान्तरम्

हे......द्विजातिशेषमन्धः ...... उपनीतवत्......तेनवपुषा...... परेयते ।

व्याख्या

हे *नृप* महाराज *पुरा* राज्यशासनकाले * यत् * * एतत् * शरीरं * द्विजातिशेषेण * द्वेजाती जन्मनी येषां ते द्विजातयः ब्राह्मणाः बहुव्रीहिः समासः । तेषां शेषः भुक्तावशिष्टं

तेन ब्राह्मणभुक्तावशिष्ठेनेत्यर्थः *अन्धसा* अन्नेन "भिस्साऽस्त्री भक्तमन्धोऽन्न" मित्यमरः । *यत्* *एतत्* राजकीयं *वपुः* शरीरं *रामणीयकं* रमणीयस्य मनोहरस्य भावः सुदृश्यत्वं *उपनीतं प्रापितं* *अद्य* *वन्यफलाशिनः* वने जातानि वन्यानि वनोत् पन्नानीत्यर्थः । फलानि कर्म्मधारयः समासः तानि अश्नातीति वन्यफलाशी उपपदसमासः । तस्य वन्य फलमात्रमेवजीवनधारणोपायं स्वीकुर्वतः इत्यर्थः *ते* भवतः *तत्* वपुः शरीरं *यशसासमम्* कीर्त्यासमम् *परं* अत्यर्थं अतिमात्रं *कार्श्यं* क्षीणतां परैति आप्नोति इदानीं ते शरीरं यथा क्षयं प्राप्तं तथा यशोऽपि क्षयं याति ।

सरलार्थः

पुरा नानाविधैः उपादेयैः खाद्यैः ब्राह्मणान् भोजयित्वा तदवशिष्टं भुञ्जानस्य ते यादृक् शरीरस्यपुष्टिरासीत् इदानीन्तु वन्यफल मात्रेण जीवतो भवतः शरीरं यशश्चक्षीणतामापद्यते इतोऽधिकं दुःखकारणं किमस्ति अत्र यशसा समं वपुः कार्श्यं परैति इति सहार्थस्य बलात् यशसः वपुषश्च कार्श्यप्रतीतेः सहोक्तिरलङ्कारः । तल्लक्षणम्–सहार्थस्य बलादेकं यत्रस्यात् वाचकं द्वयोः सासहोक्तिमूलभूतातिशयोक्तिर्यदा-भवेत् ।"

कौमुदी

अन्धसेति उपनीतमिति निष्ठाप्रत्ययस्य कर्म्मणि विहितस्य कर्त्तरि तृतीया । प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मकानिति वचनात् प्रधान

कर्म्मणो वपुषः उक्तत्वम् । रामणीयकमित्यत्रतु अनुक्ते कर्म्मणि द्वितीया ।

-४-

अनेनापि राज्ञो दुरवस्थां वर्णयति अनारतमिति ।

अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥४०॥

अन्वयः

अनारतं मणिपीठशायिनौ यौ चरणौ राजशिरःस्रजांरजः अरञ्जयत् तौ ते चरणौ मृगद्विजालूनशिखेषु बर्हिषां वनेषु निषीदतः ।

वाच्यान्तरम्

अनारतं......रजसा अरज्येताम् ताभ्यां......चरणाभ्याम्...... निषद्यते ।

व्याख्या

अनारतं निरन्तरं "सततेऽनारताश्रान्तसन्तताविरतानिश" मित्यमरः *मणिपीठशायिनौ* मणिनाभूषितं पीठं आसनं "पीठमासन" मित्यमरः मध्यपदलोपी समासः तस्मिन् शायिनौ *यौ चरणौ* पादौ *राजशिरः स्रजाम्* राज्ञां प्रणत नरपतीनाम् शिरांसि मस्तकानि तेषु याः स्रजः मालिकाः तासाम् *रजः* परागः *अरञ्जयत्* अभूषयत् प्रणमतां राज्ञां

शिरः कुसुमपरागैः विभूषितावित्यर्थः *तौ ते चरणौ* *मृगद्विजालूनशिखेषु* मृगाः हरिणाः द्विजा ब्राह्मणाः इति द्वन्द्वः तैः आलूनाः छिन्नाः शिखाः अग्राणि येषु तेषु बहुव्रीहिः *बर्हिषां* कुशानां "बर्हिः कुशहुताशयो" रितिविश्वः। वनेषु अरण्येषु निषीदतः तिष्ठतः।

सरलार्थः

पुरा मणिमयपीठे स्थितौ यौ ते सुकोमलौ चरणौ प्रणतानां राज्ञां शिरोमालापरागैः विभूषितौ ताविदानीं वनेषु छिन्नानां कुशानामुपरि विन्यासाद् रुधिरक्तौ जातौ अहोते दुर्दैवम्।

कौमुदी

अनारतमिति "क्रिया विशेषणेचे" ति द्वितीया। रजः इति रञ्ज् धातो रसुन् प्रत्ययः। रञ्जयतीति "रञ्जेर्णौ मृगरमणे न लोपोवक्तव्य." इति नियमेन मृगरमणार्था भावात् न नलोपः। चरणाविति चर्यतेऽनेनेति करणेल्युटि "पदोङ्घ्रिश्चरणोऽस्त्रिया" मित्यनेन पाक्षिक पुंस्त्वम्।

-x-

विपत्तु सर्वेषां सम्भवत्येव ततः किन्ते दुःखमित्यत आह द्विषन्निमित्तेति।

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥

अन्वयः

यदियं दशा द्विषन्निमित्ता ततः मे मनः समूलम् उन्मूलयति इव परैः अपर्यासितवीर्यसम्पदां मानिनां पराभवः अपि उत्सव एव (भवतीतिशेषः)

वाच्यान्तरम्

यत् अनया दशया द्विषन्निमित्तया भूयते ततः..... उन्मूल्यते... पराभवेण उत्सवेन भूयते ।

व्याख्या

यत् यस्मात् *इयम्* *दशा* कठोरीभूता अवस्था "दशावत्तावववस्थाया" मिति विश्वः *द्विषन्निमित्ता* द्विषन्तः शत्रवः निमित्तं कारणं यस्याः सा बहुव्रीहिः शत्रुकृतेत्यर्थः *ततः* तस्मात् कारणात् *मे* मम *मनः* चित्तं *समूलं* सशेषं *उन्मूलयति इव* उत्खातयतीव दैवीविपत् न दुःखाय किन्तु *परैः* शत्रुभिः *अपर्यासितवीर्यसम्पदां* न पर्यासिता अपर्यासिता अमलिनीकृता वीर्यसम्पत् तेजः समृद्धिः येषां तेषां बहुव्रीहिः *मानिनाम्* मानधनानां भवादृशां *पराभवः* पराजयरूपाविपत् *उत्सव एव* आनन्दहेतुत्वादुत्सवतुल्य एवेत्यर्थः ।

सरलार्थः

मानिनस्तु शत्रुकृतं पराजयं सोढुं न शक्नुवन्ति दैवकृतं तु अप्रतिविधेयतया सोढुमर्हन्ति । अयं तु भवतः पराभवः शत्रुकृत एव अतोऽसहनीय एव । अत्र वैधर्म्येण परार्धवाक्यार्थेन पूर्वार्धगत वाक्यार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

द्विषन्निति द्वेष्टि इति द्विष् धातोः "द्विषोऽमित्रे" इति शतृप्रत्ययः। यदित्यव्ययं हेत्वर्थे पञ्चमी ततः इति च। मानिनामिति "कर्त्तृकर्म्मणोः कृती" ति सूत्रेण कर्म्मणि षष्ठी।

-x-

राज्ञां मुनिवृत्तिर्न युज्यते इत्यत आह विहायेति।

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥४२॥

अन्वयः

हे नृप शान्तिं विहाय तत् धाम विद्विषां वधाय पुनः सन्धेहि प्रसीद निःस्पृहाः मुनयः शत्रून् शमेन अवधूय सिद्धिं व्रजन्ति न भूभृतः।

वाच्यान्तरम्

हे..... सन्धीयताम् प्रसद्यताम् निःस्पृहैः मुनिभिः ...... सिद्धिः व्रज्यते न भूभृद्भिः।

व्याख्या

हे नृप महाराज *शान्तिं* क्रोधं विहाय निरुत्साहतयावस्थानं *विहाय* परित्यज्य *तत्* विख्यातं *धाम* क्षत्रियतेजः "धाम देहे गृहे रश्मौ स्थाने जन्म प्रभावयो" रिति मेदिनी *विद्विषां* शत्रूणां *वधाय* हननाय *पुनः* भूयोऽपि

सन्धेहि अङ्गीकुरु अवलम्बस्वेत्यर्थः *प्रसीद* प्रसन्नो भव शान्त्या यदि कार्य सिद्धिः स्यात् तर्हि अलं कोपेन इत्यत आह *निःस्पृहाः* अकामाः *मुनयः* तपस्विनः *शत्रून्* अन्तः शत्रून् कामादीन् रिपून् *अवधूय* पराभूय *शमेन* शान्त्या क्रोधादिपरिहारेणेत्यर्थः * सिद्धि * मोक्षरूपां * व्रजन्ति * न *भूभृतः* राजानः । शमेन मुक्तिः सिध्यति नतु राजकार्य मिति भावः ।

सरलार्थः

तपस्विनो हि मोक्षसिद्धये शमदमादिना कामक्रोधादीन् विजित्य सिद्धिं लभन्ते अतस्तेषां शम एव सिद्ध्युपायः नृपाणां तु शत्रुनिर्जयेनाभ्युदयलाभ एव प्रयोजनम् तदर्थं क्रोध आश्रयितव्य एव । प्रसीद शत्रुवधाय क्षात्रं तेजोऽवलम्बस्व । अत्र परार्धेन पूर्वार्धगत वाक्यार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

विद्विषामिति वधाय इति कृत् प्रत्ययान्तस्य कर्म्मणि षष्ठी । वधायेति "तुमर्थाच्च भाववचनादिति सूत्रेण चतुर्थी ।

-*-

मनस्विता सर्वथा रक्षणीया इत्यत आह पुरः सरा इत्यादि ।

पुरःसरा धामवतां यशोधनाः

सुदुःसहं प्राप्य निकारमीदृशम् ।

भवादृशाश्चेदधिकुर्वते रतिं

निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

अन्वयः

धामवतां पुरः सराः यशोधनाः भवादृशाः ईदृशं सुदुःसहं निकारं प्राप्य रतिं अधिकुर्वते चेत् हन्त निराश्रया मनस्विता हता ।

वाच्यान्तरम्

(धामवतां) पुरः सरैः यशोधनैः भवादृशैः रतिः अधिक्रियते (यदि) निराश्रयया मनस्वितया हतया भूयते ।

व्याख्या

धामवतां धाम तेजः विद्यते येषाम् तेषाम् पराक्रमिणां तेजस्विनामित्यर्थः *पुरः सराः* पुरः अग्रे सरन्ति ये ते उपपदसमासः अग्रे सराः तेजस्विनां प्रधाना इति भावः । *यशोधनाः* यशः कीर्तिरेव धनं वित्तं येषां ते इति बहुव्रीहिः समासः कीर्तिरक्षका *भवादृशाः* भवन्तइव दृश्यन्ते इति भवादृशाः उपपदसमासः । *ईदृशं* एवम्विधं सुदुः सहं अतिदुःखेन सोढुं शक्यं ईषद्दुःसुषु इत्यादिना खल् प्रत्ययः *निकारं* अवमाननां "निकारो विप्रकारःस्यादित्यमरः" *रतिं* आरामं *अधिकुर्वते* प्राप्नुवन्ति *चेत्* *हन्त* इत्यव्ययं विषादे "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरित्यमरः" *निराश्रया* नास्ति आश्रयो यस्याः सा अवलम्बन शून्या इति बहुव्रीहिः समासः *मनस्वि-

ता* अभिमानिता हता नष्टा यतः मनस्विता सर्वथा पराक्रमिण माश्रित्यैव तिष्ठति इति भावः।

सरलार्थः

शत्रुकृतापमानेऽपि तत्प्रतिकाराय भवन्तमनिच्छन्तं दृष्ट्वा मन्ये जगति अभिमानवत्ता अस्तमिता। पृथिवीश्वरा भवन्तः क्षत्रियाभिमानवतां पुरोगामिनः एवं शत्रुकृते पराभवे यदि भवतां प्रतिचिकीर्षा नोत् पद्यते तर्हि केनाम मानं रक्षेयुः निश्चितमेव अवलम्बनाभावात् अभिमानिता विलयं गच्छेत्।

कौमुदी

पुरः सराः इत्यत्र ट प्रत्ययः भवादृशाः इत्यत्र 'त्यदादिषु दृशेरनालोचनेकञ् च'' इति कञ् प्रत्ययः ''आ सर्वनाम्नः'' इति भवच्छब्दस्य आकारोऽन्तादेशः। अधिकुर्वते इत्यत्र यदि प्रसहनस्य असंगतेः अधिपूर्वात् करोते अधेः प्रसहने इति काशिका तथाप्यस्याः कर्त्तृभिप्राय विवक्षायामेव प्रयोजकत्वात् कर्त्तृभिप्राये स्वरितञित इति आत्मने पदं प्रसिद्धम्।

-x-

एवञ्चेत् प्रव्रज्याएव श्रेयसीत्याशङ्क्याह अथेति।

अथ क्षमामेव निरस्तविक्रम-

श्चिरायपर्येषि सुखस्य साधनम्।

विहाय लक्ष्मीपतिलक्ष्म कार्मुकं

जटाधरः सञ्जुहुधीह पावकम् ॥४४॥

अन्वयः

अथ निरस्तविक्रमः चिराय क्षमां एव सुखस्य साधनं पर्य्येषि लक्ष्मीपतिलक्ष्म कार्मुकं विहाय जटाधरः सन् इह पावकं जुहुधि ।

वाच्यान्तरम्

निरस्तविक्रमेण त्वया क्षमा एव........परीयते जटाधरेण सता पावकः हूयताम् ।

व्याख्या

अथ पक्षान्तरे "अथाथो संशये स्याता मधिकारेचमङ्गले विकल्पान्तर प्रश्ने च कार्त्स्न्या रम्भसमुच्चये इति मेदिनी। *निरस्तविक्रमः* निरस्तः हीनतांगतः विक्रमः पराक्रमः तेज-इतियावत् यस्य सः। सन् *चिराय* आजीवनं *क्षमां* सहिष्णुतां *सुखस्य* शान्तेः *साधनं* निदानं हेतु मित्यर्थः। *पर्य्येषि* जानासि तर्हि *लक्ष्मीपतिलक्ष्म* लक्ष्म्याः सम्पदः पतिः स्वामी इति षष्ठीतत्पुरुषः समासः राजाइत्यर्थः तस्य लक्ष्म चिह्नं राजचिह्नमित्यर्थः "लक्ष्मचिह्नप्रधानयो" रित्यमरः। *कार्मुकं* धनुः "धनुश्चापौ धन्वशरासन कोदण्डकार्मुक" मित्यमरः *विहाय* त्यक्त्वा *जटाधरः सन्* धरतीति धरः पचाद्यच् जटानां धरः जटाधरः इति षष्ठी तत्पुरुषः समासः *इह* अरण्ये *पावकं* अनलं "कृशानुः पावकोऽनलः" इत्यमरः *जुहुधि* अग्नौ होमं कुरु अधिकरणे कर्मत्वोपचारः विरक्तस्य किं धनुषा इत्यर्थः।

सरलार्थः

यदि भवान् निर्वाणमेव सुखस्य कारणं मन्यते तदा वृथैव किं वहति राजचिह्नं। धनुः शरादिकं दूरे निक्षिपतु तपस्विना माचार मेव परिगृह्य घृतादिना होम मेवाचरतु।

कौमुदी

कार्म्मकमिति कर्म्मणे प्रभवति इति उकञ् प्रत्ययः।

कर्त्तव्यस्य विलम्बे विपत् सम्भविष्यतीत्याह न समयेति।

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ॥४५॥

अन्वयः

परेषु निकृति परेषु (सत्सु) भूरिधाम्नः ते समयपरिरक्षणं न क्षमम् (भवति) विजयार्थिनः क्षितीशा अरिषु सन्धिदूषणानि सोपधि विदधति हि।

वाच्यान्तरम्

समयपरिरक्षणेन नक्षमेण भूयते विजयार्थिभिः क्षितीशैः..... सन्धि दूषणानि......विधीयन्ते हि।

व्याख्या

परेषु विपक्षेषु शत्रुषु इत्यर्थः *निकृतिपरेषु* निकृतिः

प्रतारणा परं प्रधानं येषां तेषु बहुव्रीहिः। अतिशठेष्वित्यर्थः *भूरिधाम्नः* भूरि महत् धाम तेजः यस्य तस्य बहुव्रीहिः। प्रति-कर्त्तुं समर्थस्येति भावः *ते* तव *समयपरिरक्षणम्* समयः प्रतिज्ञा त्रयोदश वर्षाणि वनेवत्स्यामि इत्येवंरूपेत्यर्थः समयाः शपथाचार काल सिद्धान्त संविदः" इत्यमरः तस्य परिरक्षणं प्रतिपालनम् *नक्षमम्* न योग्यम् भवतीतिशेषः "युक्ते क्षमं शक्ते हिते त्रिष्वि" त्यमरः * विजयार्थिनः * जयाभिलाषिणः *क्षितीशाः* पृथिवीश्वराः राजान इत्यर्थः *अरिषु* शत्रुषु *सोपधि* उपधिना छलेन सह वर्त्तते यत् तत् यथा स्यात् तथा बहुव्रीहिः सकपटमित्यर्थः। "कपटोऽस्त्री व्याज दम्भोप-धयश्छद्म कैतवे" इत्यमरः। *सन्धिदूषणानि* सन्धिषु दूषणानि *हि* अवश्यम् *विदधति* आविष्कुर्वन्ति। अत्र सन्धौ ते ते बहवो दोषा वर्त्तन्ते अतः सन्धिरयं न युज्यते इत्येवं प्रकारेण कंचन छलं प्रदर्श्य सन्धिभङ्गं कुर्वन्तीति भावः।

सरलार्थः

त्रयोदश वर्षाणि वने वत्स्यामीत्येवं रूपो यः समयो भवता पुराकृतः तस्य समयस्य उल्लङ्घने न कश्चिद् दोषोऽस्ति इति अहं मन्ये। शठेषु शत्रुषु शठाचरणं न दोषाय। शत्रूणामुत्सादनेन आत्मोदय एव नृपाणां साधनीयः तदर्थं सर्वेऽपि विजयाभिलाषिणः सन्धि-भङ्गं मङ्गीकुर्वन्ति। अत्र परार्धेन पूर्वार्धस्य समर्थनात् सामान्येनविशेष समर्थन रूपोऽर्थान्तरन्यासोऽलङ्कारः अत्र श्लोके पुष्पिताग्रा वृत्तम् तल्ल-क्षणम् "अयुजिनयुग रेफतोयकारो युजिच नजौ जरगाश्च पुष्पिताग्रा।"

कौमुदी

परेषु इति "यस्य च भावेन भावलक्षण" मिति सूत्रेण भावे सप्तमी सोपधि इति " क्रियाविशेषणेच " इत्यनेन द्वितीया। अरिष्विति विषयाधिकरणे सप्तमी।

-*-

इदानीमाशीर्वचनेनोपसंहरति विधि समयेति।

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥४६॥

अन्वयः

विधि समय नियोगात् अगाधे आपत् पयोधौ मग्नं दीप्ति संहारजिह्मं शिथिलवसुं रिपुतिमिरम् उदस्य उदीयमानं त्वां दिनादौ दिनकृतम् इव लक्ष्मीः भूयः समभ्येतु।

वाच्यान्तरम्

मग्नः दीप्तिसंहारजिह्मः शिथिलवसुः......उदीयमानः त्वम्...... दिनकृत् इव लक्ष्म्या भूयः समभीयस्व।

व्याख्या

***विधिसमयनियोगात्* विधिः नियतिः "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधि" रित्यमरः सूर्यपक्षे च विधिः**

विधानम् "विधिर्विधाने दैवेचे" त्यमरः समयः कालः तयोः नियोगः नियमनं तस्मात् उभयोरपि दुर्वारत्वादिति भावः *दीप्तिसंहारजिह्मं* दीप्तिः पराक्रमः सूर्यपक्षे आतपः तस्याः संहारेण नाशेन जिह्मं मलिनं *शिथिलवसुम्* शिथिलानि अपगतानि वसूनि धनानि यस्य तं बहुब्रीहिः धनहीनमित्यर्थः सूर्यपक्षे शिथिलाः अस्तगामित्वात् क्षीणाः वसवो रश्मयो यस्य तं "वसुर्देवेऽग्नौ रश्मौच वसुतोयेधने मणौ।" इति वैजयन्ती। *अगाधे* दुस्तरे *आपत् पयोधौ* आपत् विपत् पयोधिः इव समुद्र इव तस्मिन् उपमित समासः समुद्रवत् दुस्तरायामापदीत्यर्थः सूर्यपक्षे तु आपत् तुल्यः पयोधिः तस्मिन् कर्म्मधारयः आपत् सदृशदुस्तरे सागरे इत्यर्थः। *मग्नम्* पतितम् सूर्योपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः *रिपुतिमिरं* रिपुः शत्रुः तिमिरमिव अन्धकारमिव अन्धकारतुल्यशत्रुमित्यर्थः सूर्यपक्षे तु रिपुसदृशं तिमिरं *उदस्य* निरस्य दूरीकृत्येत्यर्थः *उदीयमानम्* अभ्युदयं लभमानम् सूर्यपक्षे तु प्रकाशमानम् *त्वाम्* भवन्तम् *दिनादौ* प्रभाते *दिनकृतमिव* सूर्यमिव *लक्ष्मीः* सम्पत् सूर्यपक्षेतु शोभा *भूयः* पुनरपि *समभ्येतु* प्राप्नोतु।

सरलार्थः

यथा सूर्यो विधातृ शासनबलेन सायं क्षीणरश्मिः सन् समुद्रे निमज्जति प्रातश्च पुनः नैशं तिमिरं दूरीकृत्य तेजोमण्डलेन युक्तः उदयं लभते तथा भवानपि नियतिबलेन प्रतापक्षयेण धनहीनतयाच आ-

यदि मग्नोऽसि सम्प्रति तेजसा शत्रून् पराजित्य राजश्रिया कोषेण च युक्तः सन् पुनरभ्युदयं लभताम् । अत्रश्लोके पूर्णोपमालङ्कारः सच श्लेषसङ्कीर्णः । श्लोकेऽस्मिन् मालिनीवृत्तम्- तल्लक्षणम्—" न न म य ययुतेयं मालिनी भोगि लोकैः ।"

कौमुदी

विधि-समय-नियोगादिति हेत्वर्थे पञ्चमी । उदीयमान मिति उत्पूर्वकात् दैवादिकात् इङ् धातोः कर्तरि शानच । दिनकृतमिति दिनं करोतीति क्विप् प्रत्ययः । समभ्येतु इति आशिषि लोट् ।

सर्गान्त्य श्लोके लक्ष्मीशब्दप्रयोगो मङ्गलार्थः तथाच भाष्ये
" मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि
शास्त्राणि प्रथन्ते" इत्यादि ।

इति श्रीभारविकृतौ किराताज्जुनीये महाकाव्ये प्रथमः सर्गः ।

द्वितीयः सर्गः

द्रौपदीवचनानन्तरं युधिष्ठिरं प्रति भीमसेन आह विहिता मित्यादि।

विहितां प्रियया मनः प्रिया-
मथ निश्चित्य गिरं गरोयसीम्।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥१॥

अन्वयः

अथ वृकोदरः प्रियया विहितां मनः प्रियां गिरं गरीयसीं निश्चित्य नृपं उपपत्तिमत् ऊर्जिताश्रयं वचनं ऊचे।

वाच्यान्तरम्

वृकोदरेण......नृपः ऊचे।

व्याख्या

अथ इत्यनन्तरार्थे अव्ययं द्रौपदी वाक्यानन्तरमित्यर्थः। *वृकोदरः* वृकस्य कुक्कुराकारव्याघ्रविशेषस्य उदरं जठरं

इव उदरं यस्य सः भीमसेनः "कोक ईहामृगोवृकः" इत्यमरः *प्रियया* पत्न्या द्रौपद्या अत्रप्रियाग्रहणं तदुपदेशः श्रवण योग्य एवेति सूचयति *विहितां* कथितां विपूर्वकस्यदधातेः क्त प्रत्ययः *मनःप्रियां* मनसः चित्तस्य प्रियां अनुकूलां एतद्विशेषणेन वाक्यस्य श्राव्यत्वमुक्तं *गिरं* वाक्यं *गरीयसीं* गुर्वर्थप्रतिपादिकां सारवतीमित्यर्थः *निश्चित्य* स्थिरीकृत्य *नृपं* युधिष्ठिरं *उपपत्तिमत्* उपपत्तिः युक्तिः विद्यते यस्मिन् तत् सयुक्तिकं *ऊर्जिताश्रयं* उदारार्थं *वचनं* वाक्यं *ऊचे* कथयामास।

सरलार्थः

द्रौपदी वाक्यावसाने भीमसेनद् वाक्यस्य-सारवत्तां निर्णीय राजानं युक्ति युक्तं वाक्यं कथयितुमारेभे।

कौमुदी

गरीयसीमित्यत्र उरुशब्दात् ईयसुन् प्रत्ययस्ततः "प्रियस्थिरोरु वहुले" त्यादि सूत्रेण गरादेशः निश्चित्येति नि पूर्वकचिधातोर्ल्यप् प्रत्ययः ऊचे इति कथनार्थत्वात् "ब्रुविशासी" त्यादिना द्विकर्मकत्वं "अकथितञ्चेति सूत्रेण नृपस्य कर्मत्वम्।

-x-

द्रौपदीवाक्यप्रशंसायामाह यदवोचतेति।

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा।

अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥२॥

अन्वयः

मानिनी स्नेहमयेन चक्षुषा परितः वीक्ष्य यत् अवोचत वागधिपस्य-अपि दुर्वचं तत् वचनं विस्मयं विदधीत ।

वाच्यान्तरम्

मानिन्या...यत् अवाचि...दुर्वचेन तेन वचनेन विस्मयः विधीयेत ।

व्याख्या

मानिनी आत्ममर्यादया अभिमानवती *द्रौपदी* स्नेहमयेन स्नेहातिशययुक्तेन *चक्षुषा* ज्ञाननेत्रेण । एतेन द्रौपदीवाक्यस्य आप्तत्वमुक्तं । *परितः* सर्वतः *वीक्ष्य* दोषादोषं विचार्य *यत्* वचनं *अवोचत* उक्तवती *वागधिपस्य* वाचां गिरामधिपस्य अधिपतेः बृहस्पतेः *अपि* काकथाअन्येषां *दुर्वचं* दुःखेन वक्तुं शक्यं बृहस्पतिरपि एतादृक् वाक्यं वक्तुं नार्हतीत्यर्थः । तत् वचनं *विस्मयं* चित्रम् "विस्मयोऽद्भुतमाश्चर्यं चित्रमपि" इत्यमरः *विदधीत* जनयेत् ।

सरलार्थः

कृष्णाया दोषगुणौ विचार्य अस्माकं हितकरं यदेतद् वचनमुक्तं तत् श्रुत्वा सर्वे विस्मिता भवेयुः का कथा अन्येषां बृहस्पतिरपि तादृग् युक्ति युक्त वचनं वक्तुं नार्हति ।

कौमुदी

स्नेहमयेनेति "तत्प्रकृत वचने मयट्" इति मयट् प्रत्ययः। चक्षुषेति करणे तृतीया। वागधिपस्येति "शेषे" इति षष्ठी। नतु कर्त्तरि दुर्वचमिति कृद्योगे "न लोकाव्यये" त्यादि सूत्रेण निषेधात्। दुर्वचमिति "ईषद्दुःसुषु" इत्यादिना खल् प्रत्ययः।

-x-

द्रौपदी वाक्यस्य विस्मय जनकत्वे कारणमाह विषमोऽपीति।

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥३॥

अन्वयः

विषमः अपि नयः पयसाम् आशयः इव कृततीर्थः (सन्) विगाह्यते तु तत्र सः विशेषदुर्लभः यः कृत्यवर्त्म सत् उपन्यस्यति।

वाच्यान्तरम्

विषमं...नयं......आशयमिव कृततीर्थं विगाहते......तेन विशेष दुर्लभेन भूयते येन कृत्यवर्त्म सत् उपन्यस्यते।

व्याख्या

*** विषमः * बुद्धेरगम्यः अपि अन्यत्र दुःखेनावतरणीयः *नयः* नीतिशास्त्रं *पयसां* जलानां *आशयः* आधारः इव**

हृद इवेत्यर्थः *कृततीर्थः* कृतं विहितम् तीर्थं उपायःयस्य सः बहुव्रीहिः कृताभ्यासाद्युपायः सन्नित्यर्थः अन्यत्र कृतं तीर्थं जलावतरणम् यत्र निर्म्मितजलावतरणमार्ग इत्यर्थः "तीर्थं शास्त्रेऽध्वरेक्षेत्रोपायोपाध्यायमन्त्रिषु यौनौ जलावतारेषु मन्त्राद्यष्टादशस्वपि" इति विश्वः। *विगाह्यते* बुद्धया अवगम्यते अन्यत्र प्रविश्यते। *तु* किन्तु *तत्र* तस्मिन् नये पयसामाशयेत्र *सः* तादृशोजनः *विशेषदुर्लभः* विशेषेण दुर्लभः दुष्प्राप्यः *यः* योजनः *कृत्यवर्त्म* कृत्यस्य सन्धि विग्रहादि कार्यस्य अन्यत्र स्नानादिकार्यस्य *वर्त्म* पन्थानम् *सत्* सम्यक् यथायथमित्यर्थः अन्यत्र सुखावगाहं *उपन्यस्यति* उदाहरति करोति च। दुर्गमो हृदइव दुर्बोधमपि नीति शास्त्रं सुगमश्चेदुपायो लभ्यते तदा सुगममेव स्यात् किन्तु उपाय निर्देशक एव दुर्लभ इति भावः।

सरलार्थः

यथा कृतसोपाने जलाशये सर्व एव सुखेन प्रवेष्टु मर्हन्ति तथा-सद्व्याख्यानादिभिः सुकृते नीति शास्त्रेऽपि सर्वेषां प्रवेशः सुकर एव। किन्तु यथा सोपाननिर्म्माता विरल एव तथा नीतिशास्त्रे सदुपदेशदाताऽपि विरल एव। अत्र श्लेषानु प्राणिता पूर्णोपमाऽलङ्कारः।

कौमुदी

दुर्लभ इति "ईषद्दुःसुषु" इत्यादिना कर्म्मणि खल्।

-✗-

कथं द्रौपद्या वाक्यं स्वीकार्यमित्यत आह परिणामेत्यादि।

परिणामसुखे गरीयसि
व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

अन्वयः

परिणामसुखे गरीयसि क्षतौजसां व्यथके अल्पीयसि अस्मिन् वचसि अतिवीर्यवति भेषजे इव बहुः गुणः दृश्यते ।

वाच्यान्तरम्

बहुं गुणं पश्यामि ।

व्याख्या

परिणामसुखे परिणामः परिणतिः कार्यस्य फलोदयकालः इति यावत् अन्यत्र भेषजपक्षे औषधस्य रोगोपशमनकालः तत्र सुखे मङ्गलकरे *गरीयसि* विशिष्टार्थप्रतिपादके अन्यत्र विशेषफलोपधायके * क्षतौजसां * क्षतानि क्षीणानि ओजांसि बलानि येषां तेषां बहुव्रीहिः दुर्बलानां *व्यथके* व्यथादायके भीतिप्रदे इत्यर्थः अन्यत्र सन्तापकरे * अल्पीयसि * अल्पाक्षरे अन्यत्र अल्पमात्रके उक्तञ्च "स्वल्पाच्चमात्रा बहुलोगुणश्च" *अस्मिन् वचसि* द्रौपदीवाक्ये *अतिवीर्यवति* अतिशक्तिशालिनि *भेषजेइव* औषधे इव 'भेषजौषधभैषज्य" मित्यमरः *बहुः* अधिकः * गुणः * मानत्राणराज्यलाभादिः अन्यत्र

आरोग्य वलवृद्धयादिलाभः *दृश्यते* अवलोक्यते। अत एव द्रौपदीवाक्यं कथं न भवता श्रोतव्य मिति भावः।

सरलार्थः

यथा समधिकवीर्यशालिनि अल्पमात्रेऽपिऔषधे दुर्वलस्य रोगिणः वलपुष्टिलाभादयो वहवो गुणा दृश्यन्ते तथैवास्मिन् द्रौपदी वाक्ये अस्माकं भविष्यत् सम्पद् वर्धनादयो बहवो गुणाः सन्ति अतो भवता आदरणीयमेतद् वचनम्। अत्र भेषजे इव वचसि इति द्वयोः साम्य प्रतिपादनादुपमालङ्कारः सच विशेषणानां श्लिष्टतया श्लेषानुप्राणितः।

कौमुदी

व्यथके इति णिजन्त व्यथ् धातोर्वुञ् प्रत्ययः। वचसि भेषजे चेत्युभयत्र सप्तम्यधि करणे। सुखे इति सुखहेतुभूते इत्यर्थे लक्षणया विशेषणत्वम् यद्वा सुखयतीतिसुखं पचाद्यचि सिद्धम् सुखं करोति इतिवाक्ये सुखीति नामधातोः पचाद्यचिवा सिद्धम्।

-x-

द्रौपदीवाक्यं युक्तियुक्तं यदि स्वीकार्य्यं कथंतत्मह्यं रोचते इत्याह।

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः॥ ५ ॥

अन्वयः

रुचिरार्था इयं भारती इष्टगुणाय भवते रोचतां । गुणगृह्या विपश्चितः वचने वक्तृविशेषनिष्पृहाः ननु ।

वाच्यान्तरम्

अनयारुचिरार्थयाभारत्या......रुच्यतां गुणगृह्यैः विपश्चिद्भिः वक्तृविशेषनिष्पृहैः भूयते ।

व्याख्या

* रुचिरार्था * रुचिरः मनोज्ञः हितकरः इतियावत् अर्थः यस्याः सा इति बहुव्रीहिः समासः *इयं भारती* द्रौपदीवाक् "ब्राह्मी तु भारती भाषागीर्वाक्वाणीसरस्वती" त्यमरः । *इष्टगुणाय* इष्टः मङ्गलकरः अनुकूलः इत्यर्थः गुणः यस्य तस्मै गुणपक्षपातिने भवते रोचतां स्वदतां द्रौपदीवाक्यं भवतोऽनुकूलमितिस्वीक्रियतामित्यर्थः । रोगीयथा अतितिक्तमप्यौषध मनिच्छन्नपि भविष्यन्मङ्गलाय वलात् सेवते तथाभवानप्यत्र आसक्तिं करोतुइति भावः । तथापिस्त्रीवुद्धिः प्रलयङ्करी इतिवाक्यात् स्त्रीणां वाक्यं कथं श्रोतव्यमित्यत आह *गुणगृह्याः* गुणानां गृह्याः गुणग्राहिणः विपश्चितः पण्डिताः "विद्वान्" विपश्चित् दोषज्ञः इत्यमरः । *वचने* वाक्यग्रहणविषये *वक्तृविशेषनिष्पृहाः* वक्तृणां स्त्रीपुंसादीनां विशेषः तस्मिन् स्त्रीपुंसादिभेदलक्षणे निष्पृहाः अनासक्ताः भवन्तीतिशेषः बालादपि सुभाषितं ग्राह्यमितिन्यायादितिभावः ।

सरलार्थः

द्रौपदीवाक्यमस्माकं ग्राह्यमेव किन्तु भवतस्तद्वाक्ये रुचिरेव नास्ति अत्याश्चर्य्यमेतत् यदिनामस्त्रीबुद्धिर्नग्राह्या इत्येवं भवतामन्यते तदपिन युज्यते यतो भवन्तः पण्डिताः सर्वथा गुणानेव गृह्णन्ति स्त्रीपुंसभेदबुद्धिर्भवतां नास्त्येव। अत्रप्रथमार्धे इष्टगुणायेति रुचिरार्थेति विशेषण द्वयस्य वाक्यार्थ प्रत्युपपादकहेतुतयोपन्यासात् काव्यलिङ्ग मलङ्कारः तथापरार्धेन पूर्वार्धस्य समर्थनादर्थान्तरन्यासोऽलङ्कारइतिद्वयो र्मिथोनिरपेक्षतयावस्थानात् संसृष्टिः।

कौमुदी

भवते इत्यत्र "रुच्यर्थानां प्रीयमाणः" इतिसूत्रणे चतुर्थी।

वचनेइत्यत्र विषयाधिकरणे सप्तमी इदानीं राजानं तिरस्करोति। चतसृष्वपीत्यादि।

चतसृष्वपि ते विवेकिनी
नृप विद्यासु निरूढिमागता।
कथमेत्य मतिर्विपर्ययं करिणी
पङ्कमिवावसीदति॥ ६॥

अन्वयः

हे नृप चतसृषु अपि विद्यासु निरूढिम् आगता ते विवेकिनी मतिः कथं करिणी पङ्कं इव विपर्ययं एत्य अवसीदति।

वाच्यान्तरम्

आगतया (ते) विवेकिन्यामत्या करिण्या...अवसद्यते।

व्याख्या

हे नृप महाराज *चतसृषु* शास्त्रोक्तासु चतुर्विधासु आन्वीक्षिक्यादिषु विद्यासु "आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चशाश्वती विद्याह्येताश्चतस्रस्तु लोकसंस्थितिहेतव इति कामन्दकः। * निरूढिं * प्रसिद्धिं * आगता * प्राप्ता अतएव * विवेकिनी * सदसद् विचारवती * ते * तव * मतिः * बुद्धिः *कथं* किमर्थं *करिणी* हस्तिनी *पङ्कं* कर्दमं इव *विपर्ययं* वैपरीत्यं "स्याद्व्यत्यासो विपर्यासो व्यत्ययश्च विपर्यये" इत्यमरः *एत्य* प्राप्य विवेकहीनत्व मित्यर्थः तथाहि भवान् पूर्वं विवेकवान् आसीत् सम्प्रति विवेकहीन इति तव बुद्धि वैपरीत्यंम्। *अवसीदति* नश्यति। नयुक्तमेतद् भवद्विधस्येतिभावः।

सरलार्थः

क्वेदानीं भवतस्तादृग् विचारवती (बुद्धिः) पङ्कपतिता उपायहीना हस्तिनीव इदानीं किमर्थमवसीदति नैतद् भवति उपयुज्यते। अत्रमतिकारिण्योः साम्यप्रतिपादनात् उपमालङ्कारः।

कौमुदी

ते इति "शेषे" इत्यनेनषष्ठी विद्यासु इत्यत्र विषये सप्तमी। निरूढिमित्यत्र निपूर्वकस्य रोहतेः भावेक्तिन्प्रत्ययः।

अनेन तिरस्कारेण नमे काचित्क्षतिरिति तत्राह विधुर मित्यादि।

विधुरं किमतःपरं परै
रवगीतांगमिते दशामिमाम्।
अवसीदति यत्सुरैरपि
त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

अन्वयः

त्वयि परैः अवगीतां इमां दशां गमिते सुरैः अपि सम्भावितवृत्ति पौरुषं अवसीदति यत् अतः परं किं विधुरं (अस्ति)

वाच्यान्तरम्

सम्भावितवृत्तिना पौरुषेण अवसद्यते परेण केन विधुरेण भूयते।

व्याख्या

त्वयि भवति *परैः* शत्रुभिः *इमां* उक्तरूपां *अवगीतां* निन्दितां "अवगीतं च निर्वादे मुहुर्दुष्टेच गर्हिते" इति विश्वः। *दशां* अवस्थां * गमिते * प्रापिते * सुरैः * देवैः अपि *सम्भावितवृत्ति* सम्भाविता बहुमता सम्मानिता इति यावत् वृत्तिः प्रसारः यस्मिन् तत् देवानामप्युल्लेखयोग्यमिति भावः। *पौरुषं* पुरुषकारः *अवसीदति* नाशं गच्छति *अतः* अस्मात् दुर्दशाभोगात् *परं* अधिकं *किं* *विधुरं* दुःखकारणं "विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि" इति

वैजयन्ती यदिमां शत्रुकृतां दुर्दशां प्रतिकर्त्तुं समर्थोऽपि भवान् हेलया उपेक्षते तदिदं महत् कष्टं। अतएवभवान् तिरस्कृत इतिभाव:।

सरलार्थः

यदिदानीं शत्रुकृतां दुर्दशां प्राप्तस्य भवतः देवैरपि सन्मानितं पौरुषं यन्नष्टं भवेदितोऽधिकं दुःखकारणं नान्यदस्ति।

कौमुदी

त्वयि इति "यस्य च भावेन भावलक्षण" मितिभावे सप्तमी, परैरिति एयन्तस्य गमिते इत्यस्य प्रयोजके कर्ज्जरि तृतीया, पौरुषमिति युवादित्वादनूप्रत्ययः।

यदिदंभवतामन्यते कालोऽयमुपेक्षणीयइति तदपिनेति द्वाभ्याम् श्लोकाभ्यां विवृणोति द्विपतामित्यादि।

द्विषतामुदयः सुमेधसा
गुरुरस्वन्ततरः सुमर्षणः।
न महानपि भूतिमिच्छता
फलसंपत्प्रवणः परिक्षयः॥ ८॥

अन्वयः

भूतिमिच्छता सुमेधसा गुरुः अस्वन्ततरः द्विषतां उदयः सुमर्षणः। महान् अपि फलसम्पत् प्रवणः परिक्षयः न (सुमर्षणः अस्ति)

वाच्यान्तरम्

गुरूणा अस्वन्ततरेण......उदयेन सुमर्षणेन भूयते। महताऽपि फलसम्पत्प्रवणेन परिक्षयेण नभूयते।

व्याख्या

* भूतिं * उन्नतिं *इच्छता* कामयता *सुमेधसा* सु-शोभना मेधा बुद्धिर्थस्य सः तेनेति बहुब्रीहिः समासः। बुद्धिमता इत्यर्थः। "धी धारणावती मेधा" इत्यमरः। नित्यमसिच् प्रजा-मेधयो रितिसूत्रेण बहुब्रीहि समासे असिच् प्रत्ययः। (गुरूः) अतिशयः (अस्वन्ततरः) सुशोभनः अन्तो यस्य सः स्वन्तः नस्वन्तः अस्वन्तः अति शयेन अस्वन्त इति अस्वन्ततरः क्षय मुख इत्यर्थः *द्विषतां* शत्रूणां *उदयः* उन्नतिः *सुमर्षणः* सुखेन अनायासेन (मृष्यते) क्षम्यते इति उपेक्षणीयः। भाषायां शाषीत्वादिनाखलर्थेयुच् *महानपि* अतिशयोऽपि *फल-सम्पत् प्रवणः* फलानां सम्पत् तस्यां प्रवणः भाविफलसम्पज्ज नकः *परिक्षयः* अवनतिः *नसुमर्षणः* नोपेक्षणीय इत्यर्थः। नहि केवलंशत्रूणामभ्युदयं दृष्ट्वा प्रतीकरणीयं नवा अवनतिं दृष्ट्वाउपेक्षणीयं समयं दृष्ट्वैव व्यवस्यातव्यमिति भावः।

सरलार्थः

यदियंशत्रुणां समृद्धिरवशयमेवक्षयायभविष्यतीति अवगम्यते तर्हिमहत्यपिउन्नति रुपेक्षणीया इदानींन्तनी अवनति भविष्यति महाफलेतिमन्यते न सा उपेक्षया इतिनीतिशास्त्रं दुर्योधनस्योन्नतिं परिणामिऽपिमहाफला अतः नेयमुपेक्षणीया इदानीमेव विचार्य्य

प्रतिकार्य्यं । अत्र सुमर्षणत्वे अस्त्रन्ततर इति विशेषणस्य हेतुतया काव्य लिङ्गमलंकारः ।

कौमुदी

फलसम्पत् प्रवणः प्रनिरन्तर इत्यादिसूत्रे ण णत्वं परीक्षय इति क्षि घातोर्भावे अल्प्रत्ययः ।

-x-

समकालमेव आत्मनः अपरस्यच अभ्युदयक्षययोः कर्त्तव्य-माह । अचिरेणेति ।

अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत्प्रतिकारमन्यथा ॥ ९ ॥

अन्वयः

कृती परस्य क्षययुक्तिम् अचिरेण भूयसीं आत्मनः विपरीतां च विगणय्य उपेक्षते अन्यथा तत् प्रतिकारं कुरुते ।

वाच्यान्तरम्

कृतिना......क्षययुक्तिः......भूयसी......विपरीता...उपेक्ष्यते... प्रतिकारः क्रियते ।

व्याख्या

कृती कृतमनेनेति "इष्टादिभ्यश्चेतीन् प्रत्ययः । कर्म्मठ इत्यर्थः *परस्य* शत्रोः *क्षययुक्तिं* क्षयस्य अवनते र्युक्तिं योगं

क्षयप्राप्तिमित्यर्थः *अचिरेण* शीघ्रं *भूयसीं* प्रभूतां दुरन्तामित्यर्थः *आत्मनः* स्वस्य *विपरीतां* अचिरभाविनीं तथा अल्पीयसीं च *विगणय्य* विविच्य *उपेक्षते* नाद्रियते अव्याकुलः सन् तिष्ठतीत्यर्थः *अन्यथा* वैपरीत्ये परस्य क्षययुक्तौ अचिरेण भूयस्याम् तथा स्वस्य चाल्पीयस्याम् इत्यर्थः *तत् प्रतिकारं* तस्याः क्षययुक्तेः प्रतिकारं प्रति विधानं *कुरुते* विदधाति।

सरलार्थः

यदि शत्रूणां क्षयः क्रमेण वर्धमान एव दृश्यते आत्मनो वा क्षयः क्रमेण क्षीयमाण एव दृश्यते तत्र नास्ति उद्वेगकारणम्। यदितु शत्रूणां क्षयः क्रमशोऽपगच्छतीति विलोक्यते आत्मनोवाक्षयः क्रमशोवर्धते तर्हि शीघ्रमेव तत् प्रतीकारः करणीयः। अतो भवता आत्मनः क्षयोऽधुना प्रतीकार्य एव।

कौमुदी

भूयसी मिति बहोरीयसुनि " बहोर्लोपो भू च बहो " रिति सूत्रेण भूरादेशः। अचिरेणेति प्रकृत्यादिभ्यश्चेति तृतीया।

-*-

आत्मनः क्षय योगस्य शत्रूणामभ्युदयस्य चोपेक्षायां दोषमाह अनुपालयता मित्यादि।

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया।

अपयान्त्यचिरान्महीभुजां
जननिर्वादभयादिव श्रियः ॥१०॥

अन्वयः

उदेष्यतीं द्विषतां प्रभुशक्तिम् अनीहया अनुपालयताम् महीभुजाम् श्रियः जन निर्वादभयात् इव अचिरात् अपयान्ति ।

वाच्यान्तरम्

श्रीभिः......अपयायते ।

व्याख्या

उदेष्यतीं क्रमवर्धमानाम् *द्विषतां* शत्रूणाम् *प्रभुशक्तिं* कोप दण्डजं तेजः "स प्रभावः प्रतापश्च यत् तेजः कोष दण्डज"मित्यमरः *अनीहया* निश्चेष्टतया *अनुपालयतां* हेलया उपेक्षमाणानां *महीभुजां* राज्ञांश्रियः राजलक्ष्म्यः सम्पदः इति यावत् *जननिर्वादभयात् इव* जनानां लोकानां निर्वादः अपवादः तस्मात् भयं तस्मात् हेत्वर्थे पञ्चमी लोकापवादभयादित्यर्थः । * अचिरात् * शीघ्रं *अपयान्ति* अपगच्छन्ति । लक्ष्मीः निकृष्टपुरुषं कदाचिदपि नाश्रित्य तिष्ठतीति भावः ।

सरलार्थः

ये नरपतयः शत्रूणां क्रम वर्धमानामपि प्रभुशक्तिं हेलया उपेक्षन्ते राजश्रीः "यदहमेतमाश्रित्य तिष्ठामि तदा निकृष्ट पुरुषाश्रयावस्थानान्मां लोका निन्दिष्यन्ती" ति मत्वा तान् अचिरेण परित्यजति ।

अतो भवान् शत्रून् मोपेक्षस्व। अत्र जननिर्वाद भयस्य श्रियोऽप-गमहेतुत्वेनोत् प्रेक्षणात् हेतूत्प्रेक्षालङ्कारः। तल्लक्षणम् "भवेत् सम्भावनोत् प्रेक्षा प्रकृतस्य परात्मना"

कौमुदी

उदेष्यती मिति उत् पूर्वकादिन् धातोः भविष्यदर्थे "लृटः सद्वेति" इतिशतृप्रत्ययः। ततः आच्छीनद्योर्नुम् इति विकल्पान्नुमभावपक्षे रूपम्। अनीहयेति 'हेतौ' इति तृतीया।

-x-

ननु दुर्वलः कथं सवलेन सह अभियुज्यते इतितत्राह।

क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये।
प्रणमन्त्यनपायमुत्थितं
प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥११॥

अन्वयः

क्षययुक्तं अपि स्वभावजं शिवं धाम दधतं समृद्धये उत्थितं अनपायं नृपं प्रजाः प्रतिपच्चन्द्रमिव प्रणमन्ति।

वाच्यान्तरम्

दधत् उत्थितः अनपायः नृपः प्रजाभिः प्रतिपच्चन्द्र इव प्रणम्यते।

व्याख्या

क्षययुक्तं क्षये क्षीणावस्थायां युक्तं उपपन्न उभयत्र तुल्यं क्षीणमपीत्यर्थः। सन्तं *स्वभावजं* स्वभावात् प्रकृतेः

जायते उत्पद्यते इति स्वभावजं सर्वलोकप्रीतिकरं *धाम* क्षात्रं तेज: चन्द्रपक्षे प्रकाशं *दधतं* धारयन्तं *समृद्धये* वृद्धिलाभाय अभ्युदयाय इतियावत् *उत्थितं* उद्दक्तं उत्साहसम्पन्नं अन्यत्र उदितं अतएव अनपायं अविनाशिनं क्रमवृद्धिं गच्छन्तं *नृपं* राजानं * प्रजा: * प्रकृतयः लोका: *प्रतिपच्चन्द्रं* द्वितीयाचन्द्रं प्रतिपदि तिथौ चन्द्रस्यदर्शनासम्भवादिति। प्रणमन्ति नमस्कुर्वन्ति दुर्वलोऽपि उद्योगेन कार्यसिद्धिं गमिष्यति। श्रियो हि सततोत्साहो दुर्वलोऽपि समश्नुते इतिकामन्दकः।

सरलार्थः

अभ्युदयोन्मुखं क्षीणं चन्द्रं दृष्ट्वा लोका यथा तस्यप्रकाशमपेक्षमाणाः हृष्टा भवन्ति तथा दैवात् दुर्वलोऽपि भवान् यदि पुनरभ्युदयलाभाय चेष्टते तर्हि प्रजा:सर्वतोभावेन भवदानुकूल्यं कुर्वन्ति। अत्र प्रतिपच्चन्द्र नृपयो: साम्यप्रतिपादनादुपमालङ्कारः सचश्लिष्टविशेषणतया श्लेषानुप्राणितः।

कौमुदी

स्वभावजमिति स्वभावात् जायते इति जनेर्डप्रत्ययः। समृद्धये इति "तादर्थ्ये चतुर्थी वाच्या" इति सूत्रेण तादर्थ्ये चतुर्थी।

-x-

ननु प्रभुशक्तिहीनः उत्साहः कथं कार्यकरी इत्यत आह प्रभवः खलु इत्यादि।

प्रभवः खलु कोशदण्डयोः
कृतपञ्चाङ्गविनिर्णयो नयः।

स विधेयपदेषु दक्षतां
नियतिं लोक इवानुरुध्यते ॥१२॥

अन्वयः

कृतपञ्चाङ्गविनिर्णयः नयः कोषदण्डयोः प्रभवः खलु स विधेयपदेषु लोकः नियतिं इव दक्षतां अनुरुध्यते ।

वाच्यान्तरम्

कृतपञ्चाङ्गविनिर्णयेन नयेन...प्रभवेण तेन लोकेन नियतिः दक्षता अनुरुध्यते ।

व्याख्या

कृतपञ्चाङ्गविनिर्णयः "सहायाः साधनोपायाः विभागो देशकालयोः । विनिपातः प्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते" । एवं भूतानां पञ्चानां अङ्गानां विनिर्णयः कृतो येन यस्य वा सः इति तद्धितार्थ इत्यादिना समासः *नयः* नीतिशास्त्रं मन्त्रणा इति-यावत् *कोषदण्डयोः* कोषः अर्थराशिः सुवर्णरजतादिकं "स्यात् कोषश्च हिरण्यञ्च हेमरूप्ये कृताकृते" "कोषोऽस्त्री कुड्-मले खड्गपिधानेऽर्थौघदिव्ययोः" इति च अमरः । दण्डः चतुर-ङ्गसैन्यं, "दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे । यात्रा-ज्ञायां सैन्यभेदे" इति वैजयन्ती । तयोरिति द्वन्द्वसमासः *प्रभवः* कारणं, *खलु* निश्चये, *सः* नयः, *विधेयपदेषु* कार्यवस्तुषु, "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः । *लोकः* कृष्यादिप्रवृत्तो जनः । नियतिं दैवं इव

"नियतिर्नियमे दैवे" इतिविश्वः *दक्षतां* पटुतां *अनुरुध्यते* अनुसरति रुधेर्दैवादिकात् कर्त्तरि लट् । मन्त्रस्य अपि मूलं उत्साहः तन्मूलायाः प्रभुशक्तेः मूलमिति किमु ! वक्तव्यं, अतः स एवाऽऽश्रणीयः, यतो नक्तन्दिवं मन्त्रणारतस्य प्रभोः निरुत्साहस्य न किञ्चित् सिध्यति ।

सरलार्थः

कृतपञ्चाङ्गविनिर्णयस्य जनस्य अर्थराशेः सैन्यादीनाञ्च संग्रहः अवश्यमेव भविष्यति । सा नीतिः सर्वथा पाटवमेव अपेक्षते एवं विविच्य इदानीं भवता यतितव्यम्, अत्र नयलोकयोस्तथा नियतिदक्षतयोः साम्यप्रतिपादनादुपमालङ्कारः ।

कौमुदी

प्रभव इति प्रभवत्यस्मादिति अपादाने "ऋदोरप्" इत्यनेन अप् प्रत्ययः । विधेयपदेषु इति विषयाधिकरणे सप्तमी ।

-x-

यस्य सहायो नास्ति तस्य अर्थसिद्धिः कथं सम्भवतीत्यत आह—अभिमानवत इत्यादि ।

अभिमानवतो मनस्विनः
प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं
तमवालम्बनमात्मपौरुषम् ॥१३॥

अन्वयः

अभिमानवतः प्रियं उच्चैः पदं आरुरुक्षतः मनस्विनः आत्मपौरुषं विनिपातनिवर्त्तनक्षमं आलम्बनं तमम् ।

वाच्यान्तरम्

आत्मपौरुषेण विनिपातनिवर्त्तनक्षमेण आलम्बनेन तमेन भूयते ।

व्याख्या

अभिमानवतः अभिमानं गर्वः विद्यते यस्य तस्य मानिनः *प्रियं* वाञ्छितं *उच्चैः पदं* उन्नतं पदं राज्यादिकं *आरुरुक्षतः* आरोढुं प्राप्तुं इच्छतः समृद्ध्याकाङ्क्षिणः इत्यर्थः *मनस्विनः* प्रशस्तचेतसः धीरस्येति यावत् *आत्मपौरुषं* आत्मनः स्वस्य पौरुषं पुरुषकारः *विनिपातनिवर्त्तनक्षमं* विनिपातस्य अधःपतनस्य ध्वंसस्येति यावत्, निवर्त्तने प्रतिरोधे क्षमं योग्यं विपत्प्रतिकारसमर्थमित्यर्थः । *आलम्बनं* अवलम्बनं सहकारितमम् इष्टतममित्यर्थः । शूराणां पुरुषकारं विना किमन्यैः सहायैरिति भावः ।

सरलार्थः

यथा कश्चित् अश्वादिकमारोढुमिच्छन् पतनभयात् अनुचरादिकं अवलम्बते तथैव राज्यं लब्धुमिच्छन् निजपुरुषकारमवलम्बते इयं नाम नीतिवेदिनां नीतिः अतः सर्वथा पौरुषमवलम्बनीयम् । अत्रश्लोके उन्नतस्थानमारुरुक्षोः सुहृत्करादिकं अलम्बनं पतननिवृत्तये भवति तद्वत् आत्मपौरुषं मनस्विन इति अभिधामूलो ध्वनिः ।

कौमुदी

अभिमानवतः इति अभिमानं विद्यते अस्येति मतुप् । मनस्विनः इत्यत्र प्रशस्तं मनो विद्यते अस्येति विन् प्रत्ययः आरुरुक्षत इति आरोढुमिच्छतेः इच्छार्थे सनन्तात् शतृप्रत्ययः ।

-x-

पौरुषहीने दोषं दर्शयितुमाह—विपद इत्यादि ।

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायते-
रगरीयान्न पदं नृपश्रियः ॥१४॥

अन्वयः

अविक्रमं विपदः अभिभवन्ति आपदुपेतं आयतिः रहयति निरायतेः लघुता नियता अगरीयान् नृपश्रियः पदं न ।

वाच्यान्तरम्

अविक्रमः विपद्भिः अभिभूयते आपदुपेतः आयत्या रह्यते लघुतया नियतया भूयते अगरीयसा पदेन न भूयते ।

व्याख्या

अविक्रमं नास्ति विक्रमः पराक्रमः शौर्यमिति यावत् यस्य सः तमिति बहुव्रीहिः समासः निर्वीर्यमित्यर्थः । *विपदः* विघ्नाः *अभिभवन्ति* आक्रामन्ति तिरस्कुर्वन्तीतियावत् । *आपदुपेतं* आपदम् विपदम् उपेतम् प्राप्तम् विपन्नमित्यर्थः

आयतिः उत्तरकालः "उत्तरः काल आयति"रित्यमरः। *रहयति* परिहरति त्यजतीत्यर्थः *निरायतेः* निः नास्ति आयतिर्यस्य तस्येति बहुव्रीहिः अदूरक्षायस्य *लघुता* अगौरवम् मानहीनतेति यावत् *नियता* निश्चिता अवश्यम्भाविनीत्यर्थः। न केचन तमाद्रियन्ते इति भावः। *अगरीयान्* लघीयान् *नृपश्रियः* नृपस्य राज्ञः श्रियः लक्ष्म्याः *पदं* आस्पदं न भवतीति शेषः।

सरलार्थः

पौरुषेण हीनः विपद्यते विपन्नः प्रभावहीनो भवति प्रभावहीनो निकृष्टो जायते लघुर्हि राज्यं नाप्नोति। अत्र अविक्रमत्वं विपदो विपत् आयतिक्षयस्य आयतिक्षयो लघुतायाः लघुता च राजश्रीनाशस्य हेतुरिति कारणमालाऽलङ्कारः। तल्लक्षणम्—"परं परं प्रति यदा पूर्वपूर्वस्य हेतुता तदा कारणमालास्यात्"।

कौमुदी

गरीयानिति गुरुशब्दादीयसुप्रत्यये "प्रियस्थिरे"त्यादिना गरादेशः। अविक्रममित्यत्र भवतेरकर्म्मकत्वेऽपि अभिपूर्वकस्य तस्य सकर्म्मकत्वात् कर्म्मत्वम्।

अतः पराक्रम आश्रयणीय इत्यत आह—तदलमित्यादि।

तदलं प्रतिपक्षमुन्नते-
रवलम्ब्य व्यवसायवन्ध्यताम्।

निवसन्ति पराक्रमाश्रया

न विषादेन समं समृद्धयः ॥१५॥

अन्वयः

तत् उन्नतेः प्रतिपक्षं व्यवसायवन्ध्यताम् अवलम्ब्य अलम् । पराक्रमाश्रयाः समृद्धयः विषादेन समम् न निवसन्ति ।

वाच्यान्तरम्

पराक्रमाश्रयाभिः समृद्धिभिः......न्युष्यते ।

व्याख्या

तत् तस्मात् पौरुषत्यागे दोषात् *उन्नतेः* अभ्युदयस्य *प्रतिपक्षम्* अन्तरायम् *व्यवसायवन्ध्यताम्* उद्यमहीनताम् *अवलम्ब्य* आश्रित्य *अलम्* न किंचित् फलमस्ति उद्यमेनैव कार्यसिद्धिर्नान्यैरुपायैरिति भावः *पराक्रमाश्रयाः* पराक्रमः शौर्यम् आश्रयः अवलम्बनं यासां ताः शौर्यमाश्रित्य-स्थिताः शौर्येणैव लभ्या इत्यर्थः *समृद्धयः* राजसम्पदः *विषादेन* अनुत्साहेन *समम्* सह *न निवसन्ति* न तिष्ठन्ति सर्वथा राज्यलक्ष्मीः पराक्रममेवापेक्षते इति भावः ।

सरलार्थः

पौरुषहीनस्य राज्यश्रीरचिरेणैव कालेनापगच्छति, अतो भवता उन्नतेः प्रतिकूलां उद्यमहीनतां परिहाय पराक्रम एवाश्रयणीयः । राज्यलक्ष्मीर्हि पराक्रमिणमाश्रित्यैव तिष्ठति अनुद्यमिनं तु सर्वथा परित्यजति । अत्र परार्धेन पूर्वार्धस्य समर्थनात् वैधर्म्येण कार्यकारणभावेनार्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

विषादेनेति सहार्थशब्दयोगे तृतीया। अवलम्ब्येति अवपूर्वलम्ब-धातोः "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति सूत्रेण विहितस्य क्त्वा-प्रत्ययस्य स्थाने ल्यप्प्रत्ययेन सिद्धम्।

-x-

ननु त्रयोदशवर्षकालोऽवधिः कृतोऽस्माभिः सोऽवश्यम् प्रतीक्षणीय इति चेत् तत्राह—अथेति।

अथ चेदवधिः प्रतीक्ष्यते
कथमाविष्कृतजिह्मवृत्तिना।
धृतराष्ट्रसुतेन सुत्यजा-
श्चिरमास्वाद्य नरेन्द्रसम्पदः ॥१६॥

अन्वयः

अथ अवधिः प्रतीक्ष्यते चेत् आविष्कृतजिह्मवृत्तिना धृतराष्ट्रसुतेन नरेन्द्रसम्पदः चिरम् आस्वाद्य कथम् सुत्यजाः।

वाच्यपरिवर्तनम्

अवधिं प्रतीक्षसे...नरेन्द्रसम्पद्भिः सुत्यजाभिः भूयते।

व्याख्या

अथ पक्षान्तरे विक्रमः श्रयणीयः इत्येकः पक्षः प्रदर्शितः। यदि इमं पक्षं विहाय वक्ष्यमाणरूपं पक्षान्तरमाश्रयसीत्यर्थः। यद्वा प्रश्ने इतीदं वक्ष्यमाणरूपं प्रश्नम् पृच्छामीत्यर्थः। "मङ्गला-नन्तरारम्भप्रश्नकात्स्न्येष्वथ अथ" इत्यमरः। * अवधिः *

समयः त्रयोदशवर्षात्मकः "अवधिस्त्ववधाने स्यात् सीम्नि काले बिलेऽपि चे"ति विश्वः *प्रतीक्ष्यते* परिपाल्यते *चेत्* यदि *आविष्कृतजिह्मवृत्तिना* आविष्कृता प्रकटीकृता जिह्मा सकपटा वृत्तिः व्यवहारो येन स तेनेति बहुव्रीहिः कपटाचरण-परायणेनेत्यर्थः *धृतराष्ट्रसुतेन* धृतराष्ट्रस्य सुतेन पुत्रेण दुर्योधनेन *नरेन्द्रसम्पदः* राज्यलक्ष्म्यः *चिरम्* बहुकालम् त्रयोदशवर्षाणि यावदित्यर्थः *आस्वाद्य* उपभुज्य *कथम्* केन प्रकारेण *सुत्यजाः* सुखेन अनायासेन त्यक्तुं शक्याः। राज्यसुखं सुचिरमनुभूय विना युद्धं कथं तत् त्यज्यते अतः कालप्रतीक्षणमयुक्तमिति भावः।

सरलार्थः

यदि वनवासावसाने राज्यलाभाय भवता यतिष्यते तर्हि राज्य-प्राप्तिर्दुष्करा यतः कपटी स धृतराष्ट्रनन्दनः स्वच्छन्दं दीर्घकालं राज्यमुपभुज्य स्वेच्छया कदाचिदपि तद्राज्यं न त्यक्ष्यति। अत्र आविष्कृतजिह्मवृत्तिनेति विशेषणपदस्य वाक्यार्थं प्रत्युपपादकहेतु-तयोपन्यासात् काव्यलिङ्गमलङ्कारः।

कौमुदी

सुत्यजाः इति सुखेन त्यज्यन्ते यास्ता इति "ईषद् दुःसुषु" इत्यादिना कर्म्मणि खल्प्रत्ययः।

-x-

दैवात् अनुग्रहबुद्ध्या वा दुर्योधनः राज्यं प्रत्यर्पयिष्यति चेत् तदपि अस्मभ्य न रोचते इत्यत आह—द्विषतेत्यादि।

द्विषता विहितं त्वयाऽथवा
यदि लब्धा पुनरात्मनः पदम् ।
जननाथ तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः ॥१७॥

अन्वयः

अथवा द्विषता पुनः विहितं आत्मनः पदं त्वया लब्धा यदि जननाथ तव अनुजन्मनां आविष्कृतपौरुषैः भुजैः कृतम् ।

वाच्यान्तरम्

त्वं लब्धासे ।

व्याख्या

अथवा पक्षान्तरे *द्विषता* शत्रुणा दुर्योधनेनेत्यर्थः । *विहितं* स्वयं दत्तमित्यर्थः *आत्मनः* स्वस्य *पदं* राज्यं *त्वया* भवता *लब्धा* प्राप्स्यते *यदि* *हे जननाथ* जनानां लोकानां नाथ प्रभो महाराज *तव* भवतः *अनुजन्मनां* अनु पश्चात् जन्म उत्पत्तिः येषां ते तेषां "पश्चात् सादृश्ययोरनु" इत्यमरः भ्रातृणां *आविष्कृतपौरुषैः* आविष्कृतं प्रकटीकृतं पौरुषं विक्रमः यैस्तैः बहुव्रीहिः समासः अस्माकं *भुजैः* बाहुभिः कृतम् व्यर्थम् अस्मद्भुजैर्न किञ्चित् साध्यमित्यर्थः राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्ये अस्मद्भुजवैफल्यात् "क्षत्रीयस्य विजितव्यं" इति शास्त्रात् क्षात्रेणैव राज्यं लभ्यमिति भावः ।

सरलार्थः

त्रयोदशवर्षेषु अतीतेषु दुर्योधनेन साऽनुग्रहं यदि राज्यं प्रत्यर्पितं स्यात् हे महाराज तदा अस्माकं एभिर्बाहुबलैः निष्प्रयोजनं परानुग्रह-भोजिनः वयं धिक्कृता भवामः ।

कौमुदी

लब्धा इति लभेः कर्म्मणि लुट् । कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते "कृतमिति निवारणनिषेधयोरिति गणव्याख्याने । भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात् तृतीया ।

-※-

यदि अनायासेन कार्यसिद्धिः स्यात् तर्हि किं वीर्येण यथाह मनुः 'साम्ना दानेन भेदेन समस्तैरथवा पृथक् । विजेतुं प्रयतेतारीन् न युद्धेन कदाचन' तत् किं युद्धार्थं उपदिश्यते इत्यत आह—मदसिक्तमुखैरिति ।

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः ।
लघयन्खलु तेजसा जग-
न्न महानिच्छति भूतिमन्यतः ॥१८॥

अन्वयः

मृगाधिपः मदसिक्तमुखैः स्वयं हतैः करिभिः वर्त्तयते । तेजसा जगत् लघयन् महान् अन्यतः भूतिं न इच्छति खलु ।

वाच्यान्तरम्

मृगाधिपेन..... वर्त्यते......लघयता महता भूतिः इष्यते ।

व्याख्या

मृगाधिपः मृगाणां पशूनां "पशवोऽपि मृगाः" इत्यमरः । अधिपः राजा सिंहः *मदसिक्तमुखैः* मदेन दानवारिणा "मदो दानं वमथुः करशीकरः" इत्यमरः । सिक्तानि आर्द्राणि मुखानि येषां तैः *स्वयं हतैः* आत्मना विनाशितैः *करिभिः* हस्तिभिः *वर्त्तयते* जीविकां करोति तथाहि * तेजसा * स्वप्रभावेण " तेजो बले प्रभावे च ज्योतिष्यर्च्चिषि रेतसि " इति वैजयन्ती * जगत् * भुवनं * लघयन् * लघूकुर्वन् * महान् * तेजस्वी * अन्यतः * अपरतः पुरुषात् * भूतिं * ऐश्वर्यम् "विभूतिर्भूतिरैश्वर्यमि"त्यमरः *न इच्छति खलु* न अभिलषति एव ।

सरलार्थः

पशुष्वपि एवं दृश्यते यत् सिंहः स्वयमेव गजान् व्यापाद्य भक्षयति तेजस्विनामयमेव नियमो यत् बलवता विगृह्य राज्यादिकमात्मसात् करोति न तु सानुग्रहं परप्रदत्तं किमपि ग्रहीतुमिच्छति ।

कौमुदी

स्वयमित्यव्ययम् तृतीयान्तम् । वर्त्तयते इति चौरादिकात् वृत्-धातोः कर्त्तरि लट् करिभिरिति करणे तृतीया । लघयन्निति लघु करोतीति लघुशब्दात् ण्यन्तात् शतृप्रत्ययः ।

-x-

ननु युद्धे प्राणहानिः सम्भवेत् तत् किं राज्यलाभेन इत्यत आह—अभिमानेत्यादि ।

अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम् ॥१९॥

अन्वयः

अभिमानधनस्य गत्वरैः असुभिः स्थास्नु यशश्चिचीषतः अचिरांशुविलासचञ्चला लक्ष्मीः आनुषङ्गिकं फलं ननु ।

वाच्यान्तरम्

चञ्चलया लक्ष्म्या आनुषङ्गिकेन फलेन भूयते ।

व्याख्या

अभिमानधनस्य अभिमानः गर्वः धनं यस्य तस्य केवलं वैरनिर्यातनमात्रनिष्ठस्य अत एव *गत्वरैः* चञ्चलैः अस्थिरैरित्यर्थः *असुभिः* प्राणैः "पुंसि भूम्न्यसवः प्राणाः" इत्यमरः *स्थास्नु* स्थायि स्थितिशीलमित्यर्थः *यशः* कीर्त्तिं *चिचीषतः* चेतुमाहर्त्तुम् इच्छतः अभिलषतः *अचिरांशुविलासचञ्चला* अचिरांशोः विद्युतः विलासः स्फुरणं तद्वत् चञ्चला क्षणस्थायिनी *लक्ष्मीः* सम्पत् *आनुषङ्गिकम्* अनुषङ्गात् प्रसङ्गात् आगतमुत्पन्नम् प्रासङ्गिकमित्यर्थः *फलं

ननु* मानिनां यश एव मुख्यं न तु सम्पत्, सम्पत्तु यशो लाभे स्वयमेवोत्पद्यते।

सरलार्थः

मानिनां यश एव साधनीयं वस्तु अतस्तैः प्राणव्ययेनापि यश एव साध्यते मानरक्षार्थं यश एव मुख्यं फलं नतु नश्वरी सम्पत्। सम्पत्तु गौणं फलं सा तु सिद्धे यशसि समुत्पद्यत एव। अत्र गत्वरासु व्ययेन स्थास्नुयशःसंग्रहात् अधिकेन यशसा न्यूनस्य जीवनस्य विनिमयात् परिवृत्तिरलङ्कारः। तल्लक्षणम्—"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्।"

कौमुदी

गत्वरैरिति "गत्वर" श्चेति सूत्रेण करप् प्रत्ययान्तो निपात्यते। स्थास्नु इति "ग्लाजिस्थश्च ग्स्नु" इति सूत्रेण ग्स्नु प्रत्ययः। असुभिरिति करणे तृतीया। चिचीषतः इति सनन्तात् चिनोतेः शतृप्रत्ययः।

*

ननु कथं अल्पस्य हेतोर्बहु हातुमिच्छसि ? जीवन्नरो भद्रशतानि पश्येत् इति चेत्! प्राणेभ्योऽपि तेजो गरीय इत्याह—ज्वलितमित्यादि।

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः।
अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥२०॥

अन्वयः

जनः भस्मनां चयं आस्कन्दति ज्वलितं हिरण्यरेतसं न (आस्कन्दति) अतः मानिनः अभिभूतिभयात् असून् सुखम् उज्झन्ति धाम न (उज्झन्ति)

वाच्यान्तरम्

जनेन......चयः आस्कद्यते ज्वलितः हिरण्यरेताः न (आस्कद्यते) मानिभिः......असवः उज्झ्यन्ते धाम न (उज्झ्यते)

व्याख्या

जनः लोकः। *भस्मनां* अङ्गाराणां। *चयं* राशिं। *आस्कन्दति* पद्भ्यामाहन्ति, भस्मनामदाहकत्वादिति भावः। *ज्वलितम्* उच्छिखं। *हिरण्यरेतसं* हिरण्यं "स्वर्णात्मकं रेतः" तेजो यस्य तम् दहनं। "हिरण्यरेता हुतभुग् दहनो हव्यवाहन इत्यमरः। न पद्भ्यामाहन्तीति शेषः, दाहभयात्। *अतः* अस्मात् हेतोः *मानिनः* मानधनाः *अभिभूतिभयात्* अभिभूतिः पराभवः ततो भयात्। *असून्* प्राणान्। *सुखं* अक्लेशं यथा तथा। *उज्झन्ति* त्यजन्ति। *धाम* तेजः। न उज्झन्तीति शेषः। प्राणत्राणाय युद्धत्यागे मानिनां पराभवो मानहानिश्चेति मनस्विनः प्राणत्यागमेव वरं मन्यन्ते इति भावः।

सरलार्थः

मनुष्यो दाहभयात् ज्वलन्तमग्निं पद्भ्यां नाक्रामति भस्मपुंजं तु निःशङ्कमाहन्ति। मानिनः परपरिभवात् प्राणान् त्यक्तुमर्हन्ति न तु

तेजः । अत्र पूर्वार्धगतविशेषार्थेन उत्तरार्धगतसामान्यार्थस्य समर्थनाद-र्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

अभिभूतिभयादिति हेतौ पञ्चमी । सुखमिति उज्झन्ति क्रियायाः विशेषणमिति द्वितीया ।

-x-

तेजस्विनः जिगीषवो भवन्तीत्यत आह—किमपेक्ष्येति ।

किमपेक्ष्य फलं पयोधरान्
ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

अन्वयः

मृगाधिपः किं फलं अपेक्ष्य ध्वनतः पयोधरान् प्रार्थयते । महीयसः सा प्रकृतिः खलु यया अन्यसमुन्नतिं न सहते ।

वाच्यान्तरम्

मृगाधिपेन......ध्वनन्तः पयोधराः प्रार्थ्यन्ते ।......तया प्रकृत्या भूयते......अन्यसमुन्नतिः न सह्यते ।

व्याख्या

***मृगाधिपः* मृगेषु पशुषु अधिपः अधिपतिः सिंह इत्यर्थः । *किं फलं* किं प्रयोजनं । *अपेक्ष्य* उद्दिश्य *ध्वनतः* शब्दाय-मानान् । *पयोधरान्* धरन्तीति धराः "पचाद्यच्" पयसां ज-**

लानां धरा· तान् मेघान् । "स्त्रीस्तनाब्दौ पयोधरौ" इत्यमरः । *प्रार्थयते* अभियाति, युद्धार्थं आह्वयते इत्यर्थः । *महीयसः* प्रधानस्य । *सा प्रकृतिः* स्वभावः खलु । *यया* प्रकृत्या स्वभावेन इति यावत् *अन्यसमुन्नतिं* अन्येषां तत्तुल्यानां अपरेषां समुन्नतिं न सहते न सोढुं अर्हति, महतां परजिघांसा एव पौरुषं न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते इत्यादि ।

सरलार्थः

सिंहः मेघगर्जनं श्रुत्वा असमर्थोऽपि सक्रोधं मेघमाक्रमितुं चेष्टते । तेजस्विनामयमेव स्वभावः यत् प्रतिपक्षान् दृष्ट्वा सर्वथा ईर्षन्त्येव । अत्र पूर्वार्द्धगतविशेषार्थेन परार्द्धगतसामान्यार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

"याञ्चायामभियाने च प्रार्थना कथ्यते बुधैः" इति केशवः । अथवा प्रार्थयते अवरुणद्धि इत्यर्थः "अभियाञ्चावरोधयोरि" त्यभिधानात् । यया इत्यत्र करणे तृतीया ।

-x-

क्षत्रियाणां पराक्रमाश्रयणं सर्वथा कर्त्तव्यमित्युक्त्वा उपसंहरन्नाह—कुरु इत्यादि ।

कुरु तन्मतिमेव विक्रमे

नृप ? निर्धूय तमः प्रमादजम् ।

ध्रुवमेतदवेहि विद्विषां

त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

अन्वयः

हे नृप ! तत् प्रमादजं तमो निर्धूय विक्रमे एवमतिं कुरु विद्विषां विपत्तयः त्वदनुत्साहहताः (भवन्ति) एतत् ध्रुवं अवेहि ।

वाच्यान्तरम्

मतिः क्रियतां.. ...विपत्तिभिः त्वदनुत्साहहताभिः भूयते ।...... अवेयताम् ।

व्याख्या

हे नृप ! महाराज ! तत् स्ववीर्यदर्शनावसरत्वात् "यद्यत-स्ततो हेतौ" इत्यमरः । *प्रमादजं*प्रमादात् अनवधानात् जायते इति जनेर्डप्रत्ययः "प्रमादोऽनवधानता" इत्यमरः । *तमः* मोहं *निर्धूय* दूरीकृत्य । *विक्रमे* पराक्रमे । *मतिं* बुद्धिं *कुरु* विधेहि । विक्रममेव अवलम्बतां न तु उपायान्तरमित्यर्थः । न च-विक्रमे वैफल्यं शङ्कतां इत्याह *विद्विषां* शत्रूणां *विपत्तयः* आपदः धनाद्यपकर्षाः इत्यर्थः "विपत्त्यां विपदापदौ" इत्यमरः । *त्वदनुत्साहहताः* तव भवतः अनुत्साहेन अनुद्योगेन हताः नष्टाः *एतत्* ध्रुवं निश्चितं "ध्रुवं नित्ये निश्चिते च" इति शाश्वतः ॥ *अवेहि* जानीहि ।

सरलार्थः

सोत्साहं शत्रुजये प्रवर्त्तताम् । एतावता कालेनापि यत् शत्रुजयो न जातस्तत् केवलं भवतः अनुद्योगस्य फलमित्यवगच्छ । भवादृशा-मनवधानता तु सुतरां न युज्यते ।

कौमुदी

'विक्रमे' इति विषयाधिकरणे सप्तमी। 'विद्विषामिति' षष्ठी शेषे ।इत्यनेन सम्बन्धे षष्ठी ।

अस्माकं सहायहीनतया पराजयो भविष्यतीति निरुत्साहोऽस्मि" इति चेत्! तत्राह—द्विरदानिवेत्यादि।

द्विरदानिव दिग्विभाविता-

श्चतुरस्तोयनिधीनिवायतः।

प्रसहेत रणे तवानुजान्-

द्विषतां कः शतमन्युतेजसः ॥२३॥

अन्वयः

दिग्विभावितान् आयतः चतुरः द्विरदान् इव तोयनिधीनिव रणे आयतः शतमन्युतेजसः तव अनुजान् द्विषतां कः प्रसहेत।

वाच्यान्तरम्

दिग्विभाविताः आयन्तः चत्वारः द्विरदाः इव तोयनिधय इव रणे आयन्तः शतमन्युतेजसः तव अनुजाः द्विषतां केन प्रसह्येरन्।

व्याख्या

***दिग्विभावितान्* दिक्षु विभाविताः प्रसिद्धाः तान् *आयतः* आगच्छतः *चतुरः* चतुःसंख्याकान् *द्विरदान् इव* गजान् इव दिग्गजानिवेत्यर्थः "दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः। मतङ्गजो गजो नागः" इत्यमरः। चतुरः *तोयनिधीन्**

इव* जलनिधीन् इव समुद्रानिवेत्यर्थः "समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः रत्नाकरो जलनिधिर्यादःपतिरपां पतिः" इत्यमरः। * रणे * युद्धे * शतमन्युतेजसः * शतं मन्यवो अश्वमेधयज्ञा यस्य तस्य इन्द्रस्य तेजः विक्रमः इव तेजः येषां तान् इन्द्रतुल्यपराक्रमशालिनः * तव * भवतः *अनुजान* भ्रातॄन् *द्विषतां* शत्रूणां मध्ये *कः प्रसहेत* सोढुं शक्नुयात् न कोऽपीत्यर्थः अतो निःसन्देहं शत्रुजये प्रवर्त्ततामिति भावः।

सरलार्थः

इन्द्रतुल्यपराक्रमशालिभिश्चतुर्भिर्दिग्गजैरिव। चतुर्भिः समुद्रैरिव चतुर्भिर्भ्रातृभिरस्माभिः सह यदि भवता युध्यते तदा शत्रूणां मध्ये एकोऽपि भवन्तमवरोद्धुं न शक्नुयादतो निःशङ्कं युद्धे प्रवर्त्तताम् अत्र द्विरदानिव अनुजान तथा तोयनिधीनिव अनुजानिति साम्य-प्रतिपादनात् उपमालङ्कारः एकस्योपमेयस्योपमानद्वयसन्निवेशान्मालोपमेति वा।" मालोपमा यदेकस्योपमानं बहु दृश्यते इति लक्षणात्।

कौमुदी

द्विरदानिति-द्वौ रदौ दन्तौ येषामिति बहुव्रीहिः समासः। तोयनिधीनिति-तोयानि निधीयन्ते एष्विति 'कर्म्मण्यधिकरणे चेति" 'कि' प्रत्ययः। द्विषतामिति-निर्धारणे षष्ठी। आयतः-इति 'आङ्' पूर्वकादिनधातोः शतृ-प्रत्ययान्तस्य द्वितीयाबहुवचनम्।

-x-

आशीर्वादव्याजेन फलितमाह—ज्वलत—इत्यादि॥

ज्वलतस्तव जातवेदसः-
सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा
रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

अन्वयः

तव चेतसि सततं ज्वलतः वैरिकृतस्य जातवेदसः शिवेतरा रिपुनारीनयनाम्बुसन्ततिः शमं विदधातु ।

वाच्यान्तरम्

शिवेतरया रिपुनारीनयनाम्बुसन्तत्या शमः विधीयताम् ।

व्याख्या

तव भवतः *चेतसि* चित्ते *सततं* निरन्तरं *ज्वलतः* प्रज्वलितस्य *वैरिकृतस्य* वैरिणा शत्रुणा दुर्योधनेन इत्यर्थः, कृतस्य विहितस्य *जातवेदसः* क्रोधाग्नेः "अग्निर्वैश्वानरो वह्निः......जातवेदास्तनूनपात्" इत्यमरः *शिवेतरा* अमङ्गला वैधव्यदुःखजनकत्वात् इति भावः *रिपुनारीनयनाम्बुसन्ततिः* रिपूणां शत्रूणां नार्यः तासां नयनानि तेषां अश्रूणि जलानि तेषां सन्ततिः समूहः शत्रुस्त्रीनयनजलप्रवाहः *शमं* शान्ति *विदधातु* करोतु । शत्रुकृतक्रोधस्य शत्रुवधं विना शान्तेरभावात् अवश्यमेव भवता शत्रुवधः कर्त्तव्यः ।

सरलार्थः

रिपवस्तावत् भवतो यादृग्वैरं आचरन्ति, तेषां वधं विना तत्प्रती-

कारः कदाचिदपि न सम्भवेत्, शत्रुकृतापमानेन तव चेतसि यस्तावत् क्रोधानलः प्रज्वलितः अद्य शत्रूणां वधेन तेषां स्त्रीणां स्वामिविरह-जनितेन शोकाश्रुणा सोऽयमनलः प्रशमं यातु। अत्र क्रोधस्य निगरणेन जातवेदसोऽभेदाध्यवसायरूपातिशयोक्तिरलङ्कारस्तया च यथा जल-प्रवाहेणानलस्य शान्तिर्भवति तथा शत्रुवधेन क्रोधस्येत्युपमा व्यज्यते।

कौमुदी

विदधातु इति आशिषि लोट्।

✱

भीमवचनावसाने युधिष्ठिरः किं प्रत्यपद्यत इत्याह—इति दर्शितविक्रियमित्यादि।

इति दर्शितविक्रियं सुतं-
मरुतः कोपपरीतमानसम्।
उपसान्त्वयितुं महीपति-
र्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

अन्वयः

इति दर्शितविक्रियं कोपपरीतमानसं मरुतः सुतं महीपतिः दुष्टं द्विरदम् इव उपसान्त्वयितुम् उपचक्रमे।

वाच्यान्तरम्

दर्शितविक्रियः कोपपरीतमानसः......सुतः महीपतिना दुष्टः द्विरदः इव......उपचक्रमे।—यद्वा—भावे महीपतिना उपचक्रमे, अन्यत् सर्वं मूलश्लोकवदेव, 'उपसान्त्वयितु'मित्यस्य कर्म, न तु 'उपचक्रमे' इत्यस्येति।

व्याख्या

इति पूर्वोक्तवचनजातैः *दर्शितविक्रियं* दर्शिता प्रकटिता विक्रिया विकारः क्रोधोपलक्षितवाग्विन्यास इत्यर्थः, येन तम् बहुव्रीहिः समासः *कोपपरीतमानसं* कोपेन क्रोधेन परीतं आक्रान्तं मानसं चित्तं यस्य तत् " स्वान्तं हृन्मानसं मनः " इत्यमरः। *मरुतः* वायोः "श्वसनः स्पर्शनो वायुः...समीरमारुतमरुज्जगत्प्राणसमीरणाः" इत्यमरः। * सुतं * पुत्रं भीमसेनमिति यावत् *महीपतिः* राजा युधिष्ठिरः। *दुष्टं* दुःखेन वारणीयं *द्विरदं* हस्तिनम् इव *उपसान्त्वयितुम्* उपदेशवाक्येन स्थिरीकर्त्तुम् *उपचक्रमे* आरब्धवान्। हस्तिपक्षेऽपि विशेषणद्वयं तुल्यमेव योजनीयम्।

सरलार्थः

यथा कश्चित् हस्तिचालकः दुष्टं हस्तिनं अंकुशेन ताड़यन् स्ववशमानयति तथा युधिष्ठिरः कोपाकुलं भीमं सान्त्ववाक्येन स्ववशमानेतुं चेष्टते स्म। अत्र मरुत्सुतद्विरदयोः साम्यप्रतिपादनादुपमालङ्कारः।

कौमुदी

उपचक्रमे इति "प्रोपाभ्यां समर्थाभ्या"मिति सूत्रेणात्मनेपदं कर्त्तरि।

-x-

भीमं सान्त्वनेन वशीकर्त्तुमादौ प्रशशंस—अपवर्जितविप्लवे इत्यादि।

अपवर्जितविप्लवे शुचौ-
हृदयग्राहिणि मंगलास्पदे।

विमला तव विस्तरे गिरां-
मतिरादर्श इवाभिदृश्यते ॥ २६

अन्वयः

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे तव गिरां विस्तरे मतिः आदर्श इव विमला अभिदृश्यते ।

वाच्यान्तरम्

विमलां मतिं अभिपश्यामि ।

व्याख्या

अपवर्जितविप्लवे अपवर्जितः प्रमाणेन दूरीकृतः विप्लवः अर्थबाधः यस्य तस्मिन् प्रमाणस्थिरीकृते इत्यर्थः आदर्शपक्षे तु अपवर्जितः मार्जनादिनापसारितः विप्लवः दर्शनबाधको बाह्य-मलादिः यस्य तस्मिन् मार्जनादिपरिष्कृते इत्यर्थः *शुचौ* सुष्ठुशब्दविन्यासे, अन्यत्र लौहादिशुद्धे *हृदयग्राहिणि* हृदयं गृह्णाति इति हृदयग्राही तस्मिन् मनोज्ञे, एकत्र हितार्थवाक्य-विन्यासादन्यत्र माङ्गलिकत्वात् मनोहारिणीत्यर्थः *मङ्गलास्पदे* मङ्गलस्य कल्याणस्य आस्पदे पात्रे, एकत्र हितार्थप्रतिपाद-कत्वात्, अन्यत्र-मङ्गलवस्तुत्वात् श्रेयस्करे, "रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम्। गुरुमग्निं तथा सूर्यं प्रातः पश्येत् सदा बुधः" इति स्मरणात् *तव* भवतः *गिरां* वाचां *विस्तरे* समूहे "विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः" इत्यमरः *मतिः* बुद्धिः *आदर्श इव* दर्पणे इव " दर्पणे मुकुरादर्शौ "

इत्यमरः * विमला * निर्मला * अभिदृश्यते * ज्ञायते लक्ष्यते इत्यर्थः।

सरलार्थः

यथा निर्म्मले माङ्गलिके मार्जनादिपरिष्कृते दर्पणे निर्म्मला प्रतिकृतिर्दृश्यते तथा प्रमाणैः स्थिरीकृतं हितार्थयुक्तं विशुद्धं ते वाक्यं श्रुत्वा बुद्धिस्ते निर्म्मलेति परिलक्ष्यते। अत्र गिरां विस्तरस्य आदर्शस्य च साम्यप्रतिपादनादुपमालङ्कारः स च गिरां विस्तरस्य आदर्शस्य च श्लिष्टविशेषणानुप्राणितः।

कौमुदी

"विस्तरे इति प्रथने वावशब्दे" इति घञ्—प्रतिषेधात् "ऋदोरप्" इत्यनेन विपूर्वकस्तृधातोरपप्रत्ययेन निष्पद्यते। गिरामिति-सम्बन्धे षष्ठी।

तव वचसि सर्वे वाक्यगुणाः सन्तीत्याह—स्फुटतेत्यादि॥

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवं।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित्॥ २७॥

अन्वयः

पदैः स्फुटता न अपाकृता, अर्थगौरवं च न स्वीकृतम् (इति) न, गिरां पृथगर्थता रचिता, क्वचित् सामर्थ्यं च न अपोहितम्।

वाच्यान्तरम्

पदानि स्फुटतां न अपाकृतवन्ति..... स्वीकृतवान.. ..पृथगर्थता रचितवान, अपोहितवान् ।

व्याख्या

पदैः सुप्तिङ्प्रत्ययनिष्पन्नैः शब्दैः *स्फुटता* स्पष्टता *न अपाकृता* न परित्यक्ता *अर्थगौरवं* अर्थभूयस्त्वम् अर्थबाहुल्यमित्यर्थः *न च न स्वीकृतम्* अपि तु स्वीकृतमेव । द्वौ नञौ प्रकृत्यर्थं गमयतः सम्भाव्यनिषेधनिवर्त्तने नञ्द्वयमिति नञ्द्वयेनोक्तम् । *गिरां* वाक्यानां *पृथगर्थता* पृथक् विभिन्नः अर्थः अभिधेयः यासां तासां भावः *अपुनरुक्तार्थतेत्यर्थः* *रचिता* विन्यस्ता *क्वचित्* कुत्रचिदपि पदे *सामर्थ्यं च* अर्थबोधयोग्यत्वं च वाक्यानां परस्परान्वयाबाधितत्वं च *न अपोहितम्* न परित्यक्तम् ।

सरलार्थः

भवत्प्रयुक्तेषु वाक्येषु यथा सारल्यं तथैवार्थगौरवं दृश्यते आपाततस्तुल्यार्थप्रतिपादकानामपि शब्दानां वस्तुतः पृथगर्थता अस्त्येव पदानां वाक्यानां च परस्परसबन्धः सर्वथा परिरक्षितश्चेत्यहो रमणीयं ते वचनम् ।

कौमुदी

पदैरिति कर्त्तरि तृतीया ।

-*-

अथ पुनर्युग्मेन वाक्यगुणानेव विशेषेण विवृणोति—उपपत्तिरित्यादि ॥

उपपत्तिरुदाहृता बलाद-
नुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

अन्वयः

बलात् उपपत्तिरुदाहृता, अनुमानेन आगमः च न क्षतः, अनीदृगाशयः कः ईदृक् इदं प्रसभं वक्तुम् उपक्रमेत ।

वाच्यान्तरम्

उपपत्तिम् उदाहृतवान्......आगमं न क्षतवान् अनीदृगाशयेन केन......उपक्रम्येत ।

व्याख्या

बलात् क्षात्रं वीर्यमाश्रित्य *उपपत्तिः* युक्तिः *उदाहृता* कथिता क्षात्रं तेज एव ग्राह्यमिति युक्तिरुक्तेत्यर्थः तथा *अनुमानेन* युक्त्या *आगमः* शास्त्रं *न क्षतः* न दूषितः प्रमाणित एवेत्यर्थः यद् यदुक्तं तत् सर्वं शास्त्रानुमोदितमन्यथा शास्त्रविरुद्धतया अनुमानस्य प्रामाण्यं न स्यादिति भावः *अनीदृगाशयः* न ईदृक् एवं आशयः क्षात्रयुक्ताभिप्रायो यस्य सः इति बहुव्रीहिः समासः "अभिप्रायश्छन्द आशयः" इत्यमरः । *कः* को जनः *प्रसभं* सहसा *वक्तुम्* कथयितुम् *उपक्रमेत*

आरभेत, त्वां विना न कोऽपि एवं वक्तुम् समर्थः इत्यर्थः। एवं वक्तुमुपक्रमितैव नास्ति का कथा वक्तुरिति भावः।

सरलार्थः

त्वया शास्त्रानुमोदिता क्षत्रियधर्मानुरूपा युक्तिः प्रदर्शिता। त्वां विना एवमन्यः कोऽपि नास्ति य एवं वक्तुं प्रवर्त्तते। प्रमाणैः शास्त्राविरुद्धयुक्तिभिश्च यद्वचनं स्थिरीकृतं तद्वचनमेव सहृदयानां विदुषां ग्राह्यं ततो भवद्वचनं सर्वथैव प्रशंसनीयं ग्रहणयोग्यञ्चेति मन्ये।

कौमुदी

बलादिति "ल्यब्लोपे कर्म्मण्यधिकरणे च" इति सूत्रेण ल्यब्लोपे पञ्चमी। ईदृगिति "दृशेरनालोचने" इति क्विप्प्रत्ययः।

-*-

यद्यतद् वाक्यं साधु मन्यते तदा तथैव क्रियतामित्यत आह—अवितृप्ततयेत्यादि॥

अवितृप्ततया तथापि मे,
हृदयं निर्णयमेव धावति।
अवसाययितुं क्षमाः सुखं,
न विधेयेषु विशेषसम्पदः॥ २९॥

अन्वयः

तथापि मे हृदयं अवितृप्ततया निर्णयमेव धावति विधेयपदेषु विशेषसम्पदः सुखम् अवसाययितुम् न क्षमाः।

वाच्यान्तरम्

हृदयेन ... निर्णयः धाव्यते ... विशेषसम्पद्भिः ... क्षमाभिः भूयते ।

व्याख्या

*तथापि*त्वया सम्यक् निर्णीतेऽपि *मे* मम*हृदयं*चित्तम् *अवितृप्ततया* विशेषेण तुष्टः सन्तुष्टः न वितृप्तः अवितृप्तः तस्य भावः तया अद्यापि संशयगतत्वेन असन्तुष्टतयेत्यर्थः *निर्णयं* निश्चयं *एव धावति* अनुसरति अपेक्षते इत्यर्थः*विधेयपदेषु* सन्धिविग्रहादिकर्त्तव्यार्थेषु *विशेषसम्पदः * अवान्तरभेदानां समृद्धयः *सुखम्* अक्लेशेन *अवसाययितुं* पुरुषान् प्रत्याययितुं *न क्षमाः* न शक्ताः "क्षमं शक्ते हिते त्रिषु" इत्यमरः । यद्यपि विधेयमात्रं सुगममेव भवता प्रदर्शितं, तथापि विधेयानां बहुलतया तथा सूक्ष्मतया च तन्निर्णयो न सुगम इति मे हृदयमद्यापि न तृप्तमिति भावः ।

सरलार्थः

तव वचनं यदि युक्तियुक्तमपि मन्यते तथापि मनो मे अधुनापि तृप्ति नाधिगच्छति इदानीमपि कर्त्तव्यनिर्णयमेवापेक्षते यतः स्वल्पेन कारणेन सन्धिविग्रहादिकं कर्त्तव्यत्वेन निर्दिष्टं परं तत्र यद् यद् बाहुल्यम् सौक्ष्म्यं चास्ति तदपि विशेषेण आलोचनीयम् । अत्र निर्णयधावनं प्रति वाक्यार्थस्योपपादकहेतुतयोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

कौमुदी

अवितृप्ततयेति हेत्वर्थे तृतीया । 'मे' इति शेषे षष्ठी ।

वस्तुविशेषावधारणं विना प्रवृत्तौ दोषमाह—सहसेत्यादि ।

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणते हि विमृष्यकारिणं,
गुणलुब्धाः स्वयमेव सम्पदः ॥ ३० ॥

अन्वयः

क्रियां सहसा न विदधीत, अविवेकः परमापदां पदम्, गुणलुब्धाः सम्पदः विमृष्यकारिणं स्वयमेव वृणते हि ।

वाच्यान्तरम्

क्रिया सहसा न विधीयताम् अविवेकेन...पदेन भूयते गुणलुब्धाभिः सम्पद्भिः विमृष्यकारी...व्रियते ।

व्याख्या

क्रियां कार्यम् *सहसा* हठात् अविचिन्त्येत्यर्थः *न विदधीत* न कुर्वीत कुतः ? *अविवेकः* अविमृष्यकारित्वं *परम्* अत्यन्तं *आपदां* विपदां *पदम्* स्थानम् विपत्-कारणमित्यर्थः। *गुणलुब्धाः* गुणेषु दयादाक्षिण्यादिषु लुब्धाः आकृष्टाः सम्पदः श्रियः *विमृष्यकारिणं* विमृष्य विचार्य करोति इति तम्, विचारपूर्वकं कर्म्म कुर्व्वाणम् *स्वयमेव* स्वेच्छयैव *वृणते* भजन्ते हि ।

सरलार्थः

ये कर्म्मानुष्ठानात् प्रागेव कर्म्मणो भावि शुभाशुभं पर्यालोच्य

कर्म्म कुर्वन्ति ते सर्वथा सम्पदं लभन्ते अतो वेगेन कार्यं कर्त्तुमनुचितम्। ये तु वेगेन कर्म्म कुर्वन्तितेऽचिरेणैव कालेन विपन्नाः खेदमुपयान्ति। ततश्च भवतापि अस्मिन् विषये सम्यक् पर्य्यालोच्यैव प्रवर्त्तितव्यम्। अत्र परार्धेन पूर्वार्धप्रतिपादितार्थस्य वैधर्म्येण समर्थनादर्थान्तरन्यासोऽलङ्कारः।

कौमुदी

क्रियामिति क्रियते इति भावे शच्। विमृष्यकारिणमिति विमृष्य करोति इति णिनि प्रत्ययः 'उपपदमतिङ्" इति उपपदसमासः।

-x-

विमृष्यकारिणां कार्यसिद्ध्या सम्पत्प्राप्तिमाह—अभिवर्षतीत्यादि।

अभिवर्षति योऽनुपालय-
न्विधिबीजानि विवेकवारिणा।
स सदा फलशालिनीं क्रियां,
शरदं लोक इवाधितिष्ठति॥ ३१॥

अन्वयः

विधिबीजानि अनुपालयन् विवेकवारिणा अभिवर्षति स फलशालिनीं क्रियां लोकः शरदम् इव सदा अधितिष्ठति।

वाच्यान्तरम्

येन......अनुपालयता अभिवृष्यते, तेन फलशालिनी क्रिया लोकेन शरद् इव सदा अधिष्ठीयते।

व्याख्या

य. यो जनः *विधिबीजानि* विधयः कार्याणि बीजानि इव उपमितसमासः शरदं लोक इवेति वाक्यगतोपमानानुसारात् तानि विधिबीजानि बीजोपमकार्याणीत्यर्थः विवेकवारिणा विवेकः कर्त्तव्याकर्त्तव्यविचारबुद्धिः वारीव जलमिव तेन जलोपमकर्त्तव्याकर्त्तव्यविचार बुद्ध्येत्यर्थः संरक्षन् सम्यक्प्रकारेण परिपोषयन्नित्यर्थः *अभिवर्षति* प्रयुनक्ति सन्धिविग्रहादिषु नियुनक्तीत्यर्थः *सः* स जनः *फलशालिनीं* फलेन कार्यसिद्धया शालते शोभते इति ताम् कार्यसिद्धिसम्पन्नामित्यर्थः *क्रियां* अनुष्ठानं * लोकः * कृषिकार्ये प्रवृत्तो जनः * विधिबीजानि * विधयः इव बीजानि धान्यादिबीजानि कार्योपमधान्यादिबीजानीत्यर्थः *विवेकवारिणा* विवेक इव वारि तेन विवेकोपमजलेनेत्यर्थः *अनुपालयन्* अपेक्षमाणः *अभिवर्षति* सिञ्चति सिञ्चन्निति भावः *फलशालिनीं* फलेन परिणतशस्येन शालते शोभते या ताम् परिणतशस्यसम्पन्नामित्यर्थः *शरदम् इव* शरदृतुमिव *सदा* *अधितिष्ठति* प्राप्नोति।

सरलार्थः

यथा निपुणः कृषकः क्षेत्रं कृष्ट्वा तत्र बीजानि उप्त्वा बुद्धिपूर्वकम् तृणकीटादिकृतान् विघ्नानुत्सार्य यथाप्रयोजनजलं सिञ्चन् शस्यपरिणामं प्रतिक्षमाणः शरदि प्रभूतानि परिणतशस्यानि प्राप्नोति तथैव यो नरपतिः कर्त्तव्याकर्त्तव्यविचारबुद्धया कर्त्तव्यं सम्यङ् निर्णीय मन्त्र-

गुप्त्यादिना सुगुप्तं रक्षन् सन्धिविग्रहादिषु सिद्धिमाकाङ्क्षन् समुचितावसरं प्रतीक्षते स ध्रुवमेव कार्यसिद्धिं लभते ।

अत्र वाक्यगतपूर्णोपमालङ्कारः लोक—यत्तत्पदप्रतिपाद्यार्थयोः साम्यप्रतिपादनात्। स च विवेकव्यापारिणा, विधिबीजानि, फलशालिनीं क्रियां शरदमिवेति चोपमात्रयैरङ्गभूतैः सङ्कीर्यते तथा अन्यत् फलं क्रियापक्षे अन्यत् शरत्पक्षे इति द्वयोः फलयोः भेदेऽप्यभेदाध्यवसानमूलयातिशयोक्त्या अङ्गभूतया सङ्कीर्यते अतिशयोक्तिरपि श्लेषमूलेत्यलङ्काराणामङ्गाङ्गिभावसङ्करः ।

कौमुदी

शरदं क्रियां चेत्यत्र अधितिष्ठतीति क्रियायाः "अधिशीङ्स्थासांकर्म्मे" ति सूत्रेणाधिकरणस्य कर्म्मतया "कर्म्मणि द्वितीये"ति सूत्रेण द्वितीया ।

-※-

विवेकवतां फलसिद्धिर्निश्चिता, अतः स एव पन्था अवलम्बनीय इत्यत आह—शुचीत्यादि ॥

शुचि भूषयति श्रुतं वपुः,
प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः,
स नयापादितसिद्धिभूषणः ॥ ३२ ॥

अन्वयः

शुचि श्रुतं वपुः भूषयति, तस्य प्रशमः अलङ्क्रिया (भवति), पराक्रमः प्रशमाभरणं (भवति), सः नयापादितसिद्धिभूषणः (भवति),

वाच्यान्तरम्

शुचिना श्रुतेन वपुः भूष्यते, प्रशमेन अलङ्क्रियया भूयते, पराक्रमेण प्रशमाभरणेन भूयते, तेन नयापादितसिद्धिभूषणेन भूयते।

व्याख्या

शुचि शुद्धं सम्प्रदायशुद्ध्या कुलक्रमप्रसिद्ध्या वा दोषरहिततयातिनिर्म्मलमित्यर्थः *श्रुतं* शास्त्रश्रवणं कर्त्तृ *वपुः* शरीरं "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः" इत्यमरः *भूषयति* गौरवान्वितं करोति *तस्य* श्रुतस्य शास्त्रज्ञानस्य *प्रशमः* क्रोधोपशान्तिः *अलङ्क्रिया* भूषणं *पराक्रमः* शौर्यं *प्रशमाभरणं* प्रशमस्य शान्तेः आभरणं भूषणं भवतीति शेषः *सः* पराक्रमः *नयापादितसिद्धिभूषणः* नयेन नीत्या आपादिता सम्पादिता या सिद्धिः सैव भूषणं अलङ्कारो यस्य स बहुव्रीहिसमासः तथाभूतो भवतीति शेषः।

सरलार्थः

विद्या शरीरस्य भूषणं, विद्याया भूषणमक्रोधता, क्रोधहीनताया भूषणं समये शौर्यप्रकाशः, पराक्रमस्य भूषणं विवेकपूर्विकया नीत्या सिद्धिलाभः। श्लोकेऽस्मिन्नेकावल्यलङ्कारः श्रुतादिकं पूर्वं पूर्वं प्रति विशेषणत्वेन परं परं प्रशमादिकमलङ्कारतया निर्देशात्। तदुक्तम्—"पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम्। स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदैकावली द्विधा।"

कौमुदी

अलङ्क्रियेति—अलमित्यव्ययपदेन करोतेर्भावे शप्रत्ययनिष्पन्न-'क्रिये'तिपदस्य समासेन निष्पत्तिः ।

*

विचार्य कर्त्तव्यमिति दर्शितं विचारोपायस्तु क इति चेच्छास्त्रमेवेत्याह—मतिभेदतम इत्यादि ।

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः,
कुरुते दीप इवार्थदर्शनम् ॥ ३२ ॥

अन्वयः

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्धः आगमः दीपः इव अर्थदर्शनं कुरुते ॥

वाच्यान्तरम्

सुकृतेन परिशुद्धेन आगमेन दीपेन इव अर्थदर्शनं क्रियते ।

व्याख्या

मतिभेदतमस्तिरोहिते मतेः भेदः मतिभेदः परस्परबुद्धिवैपरीत्यं मन्त्रणाभेद इत्यर्थः स एव तमः अज्ञानता तेन तिरोहिते आच्छन्ने अत एव *गहने* दुर्बोधे *कृत्यविधौ* कार्यानुष्ठाने *विवेकिनां* विवेकः विचारशक्तिः विद्यते येषां तेषां सदसद्विचारसमर्थानामित्यर्थः *सुकृतः* चिराभ्यस्तः आगम-

पक्षे तु सुनिर्म्मितः अत एव *परिशुद्धः* स्थिरीकृतः दीपपक्षे तु वाय्वादिदोषशून्यः * आगमः * शास्त्रं * दीप इव * प्रदीपवत् *अर्थदर्शनं*कर्त्तव्यनिर्णयं दीपपक्षे तु वस्तुप्रतिभासनं *कुरुते* विदधाति ।

सरलार्थः

यथा सुनिर्म्मितो वाय्वादिदोषरहितो दीपःअन्धकारावृते वस्तुस्वरूपमवबोधयति तथा परस्परमतभेदेन मन्त्रभेदसम्भवात् कर्त्तव्येषु बुद्धिमतामपि महान् संशयो यदा उत्पद्यते तदा तेषां सुशिक्षिता नीतिरेव कर्त्तव्येषु निर्णयं जनयति । अत्र वाक्यगतपूर्णोपमालङ्कारः दीपागमयोः साम्यप्रतिपादनात्, स च 'मतिभेदः तम इवे'तिसमासगतलुप्तोपमयाङ्गभूतया संकीर्यते, तथा 'सुकृत'इत्यादिविशेषणानां श्लिष्टतया श्लेषेणापि सङ्कीर्यते, इति तेषामलङ्काराणामङ्गाङ्गिभावः सङ्करः ।

कौमुदी

मतिभेदः तमइवेति—उपमितसमासः । कृत्यविधाविति विषयसप्तमी ।

-x-

विविच्य कार्यकारिणोऽपि यद्यप्यर्थनाशः स्यात्तर्हि नापराध इत्यत आह—स्पृहणीयेत्यादि ॥

स्पृहणीयगुणैर्महात्मभि-
श्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां,
विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

अन्वयः

स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनः यच्छतां विधिहेतुः आगसाम् अहेतुः विनिपातः अपि समुन्नतेः समः।

वाच्यान्तरम्

विधिहेतुना......अहेतुना विनिपातेन......समेन भूयते।

व्याख्या

स्पृहणीयगुणैः स्पृहणीयाः काम्याः श्लाघ्या इति यावत् गुणाः शौर्यादयः येषां तैः प्रशंसनीयचरितैः सज्जनैरित्यर्थः *महात्मभिः* महान् प्रशस्तः आत्मा चित्तं येषां तैः महानुभावैः *चरिते* आचरिते अनुष्ठिते इति यावत् *वर्त्मनि* आचारे *मनः* चित्तं *यच्छतां* निदधतां साधुपथेन विचरतामित्यर्थः। *विधिहेतुः* विधिः दैवम् हेतुः कारणं यस्य तथोक्तः, दैवनिमित्तकः। "विधिर्विधाने दैवे च"इत्यमरः। अत एव *आगसां* अपराधानां। "पापापराधयो रागः" इत्यमरः। *अहेतुः* अनिमित्तकः अपराधदोषेण न जातः इत्यर्थ। *विनिपातः अपि* दैविको विघ्नोऽपि "विनिपातोपपाते स्याद् दैवादिव्यसनेऽपि च" इति विश्वः॥ *समुन्नतेः* अतिवृद्धेः। *समः* तुल्यो भवतीति शेषः। दैवप्रातिकूल्येन पुरुषाणां पौरुषं यदि विफलं स्यात्तन्न तत्र पुरुषापराधः इति भावः।

सरलार्थः

सतामाचारमार्गेण चलतां प्रशस्तचरितानामपि दैवप्रातिकूल्येन पुरुषकारश्चेन्निष्फलो भवति, तदा ते न निन्दनीयाः, तेषां तथाविधं

असाफल्यमपि अभ्युदयतुल्यमेव मन्तव्यम् यथाह—कामन्दकः—"यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम्। पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः।" अत्र विनिपातोऽपि समुन्नतेः सम इवेत्युत्प्रेक्षणादुत्प्रेक्षालङ्कारः सा चोत्प्रेक्षा व्यञ्जके वादिप्रयोगाभावात् प्रतीयमाना। यदुक्तम् "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना वाच्ये वादिप्रयोगे स्यादप्रयोगेऽपरा पुनः"।

कौमुदी

समुन्नतेरिति " तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामिति षष्ठी। यच्छतामिति—दानधातोः शतृप्रत्ययसिद्धम्।

*

इदानीं यद् विमृश्यं तदाह—शिवमित्यादि।

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतिम्।
विगणय्य नयन्ति पौरुषं,
विजितक्रोधरया जिगीषवः॥ ३५॥

अन्वयः

जिगीषवः विजितक्रोधरयाः गरीयसीम् अदूषितायतीम् फलनिष्पत्तिं विगणय्य पौरुषम् शिवम् औपयिकं नयन्ति।

वाच्यान्तरम्

जिगीषुभिः विजितक्रोधरयैः ......नीयते।

व्याख्या

जिगीषवः जेतुं पराभवितुमिच्छन्ति, इति जयेच्छवः। *विजितक्रोधरयाः* विजितः क्रोधस्य कोपस्य रयः वेगो यैस्ते, संवृतक्रोधावेगाः। * गरीयसीं * प्रचुरां *अदूषितायतीं* न दूषिता न क्षता आयती उत्तरकालो यस्यास्ताम्, अक्षतोत्तर-कालाम्। *फलनिष्पत्तिं* फलस्य निष्पत्तिं सिद्धिं। *विगणय्य* निर्णीय। *पौरुषं* पुरुषकारं। *शिवम्* अनुकूलं। *औपयिकं* उपायं। *नयन्ति* प्रापयन्ति, पौरुषमुपायेन योजयन्तीत्यर्थः।

सरलार्थः

क्रोधवेगवशीभूताः सम्यङ् निर्णीय नयं प्रयोक्तुं न शक्नुवन्तीति शत्रुजयाभिलाषिणः क्रोधं परित्यज्य यथोपायप्रयोगं सुष्ठु फलनिष्पत्तिः स्यात् तद् विचार्य सामादिप्रयोगेण रिपून् जेतुं प्रवर्त्तन्ते अतो भवता सर्वथा क्रोधः परिहर्त्तव्यः। तथा च कामन्दकः "निष्फलं क्लेशबहुलं सन्दिग्धफलमेव च। न कर्म्म कुर्य्यान्मतिमान् सदा वैरानुबन्धि च।"

कौमुदी

औपयिकमिति—उपायशब्दात् विनयादित्वात्; स्वार्थे ढक् ह्रस्वश्च अत्र पौरुषस्य कर्म्मणः कर्त्तृस्थत्वेऽपि औपयिकस्याकर्त्तृस्थतया" कर्त्तृस्थे चाशरीरे कर्म्मणि" इत्यनुशासनबलेन आत्मनेपदं न भवति। यत्र नयतेः कर्म्म सर्वथा कर्त्तृस्थमशरीरं च तदैवात्मनेपदमिति विवेकः।

-✱-

पूर्वं 'क्रोधवेगो जेतव्यः' इति यदुक्तं तत् सोपपत्तिकं विशेषयन्नाह—अपनेयमित्यादि॥

अपनेयमुदेतुमिच्छता,
तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः,
प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

अन्वयः

उदेतुमिच्छता पुरः रोषमयं तिमिरं धिया अपनेयम्, अंशुमता अपि प्रभया निशाकृतं तमः अविभिद्य न उदीयते ।

वाच्यान्तरम्

इच्छन् अपनयेत्, अंशुमान् न उदेति ।

व्याख्या

उदेतुं उन्नतिं प्राप्तुं *इच्छता* अभिलषता *पुरुषेण* *पुरः* प्रथमं *रोषमयं* रोषात् क्रोधात् आगतं उत्पन्नं *तिमिरं* अज्ञानं *धिया* विवेकेन *अपनेयं* दूरीकार्यं ॥ तथाहि *अंशुमता* अंशवः किरणाः विद्यन्ते यस्य तेन सूर्येण *अपि* प्रभया स्वतेजसा *निशाकृतं* रात्रिसम्भूतं *तमः* अन्धकारं । *अविभिद्य* अनिराकृत्य *न उदीयते* न प्राप्तोदयेन भूयते । सूर्यस्यापि एवं, का कथा मनुजानां । अभ्युदयकामी सर्वथा क्रोधं परिहरेदिति भावः ।

सरलार्थः

यदि कश्चित् आत्मनः अभ्युदयं कामयेत तर्हि तस्य प्रथमं विवेकान्तरायस्वरूपं क्रोधात् समुत्पन्नं अज्ञानं सर्वथा अपनेतव्यम्,

अन्यथा तस्य उन्नतिः कदाचिदपि न सम्भवेत् । यथा सूर्योऽपि रात्रि-जातं स्वतेजसा तमः अनिराकृत्य प्रकाशितुं न समर्थः ।

अत्र अविभिद्येत्यादिना विशेषेण अपनेयमित्यादिसामान्यस्य वैधर्म्येण समर्थनादर्थान्तरन्यासोऽलङ्कारः ।

कौमुदी

रोषमयमित्यत्र रोषादुत्पन्नमित्यर्थे "मयट्च" इत्यनेन मयट्प्रत्ययः, 'धिया प्रभया'—इति द्वयोरपि करणे तृतीया, उदीयते—इति भावे लट् ।

-×-

ननु भवद्वाक्यं दुर्बलेष्वेव युज्यते, बलीयसां तु क्रोधादेव कार्यसिद्धिरित्यत आह—बलवानित्यादि ।

बलवानपि कोपजन्मन-
स्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः,
सकला हन्ति स शक्तिसम्पदः ॥ ३७ ॥

अन्वयः

बलवान् अपि यः कोपजन्मनः तमसः अभिभवम् न रुणद्धि, सः क्षय पक्षः ऐन्दवीः कलाः इव सकलाः शक्तिसम्पदः हन्ति ॥

वाच्यान्तरम्

बलवता...येन...अभिभवः न रुध्यते । तेन क्षयपक्षेण ऐन्दव्यः कलाः सकलाः शक्ति सम्पदः हन्यन्ते ॥

व्याख्या

बलवान् बलं शक्तिः विद्यते यस्य, सः शक्तिमान् शूर इत्यर्थः *अपि* *यः* जनः * कोपजन्मनः * कोपात् क्रोधात् जन्म उत्पत्तिर्यस्य तस्येति बहुव्रीहिः समासः । *तमसः* अज्ञानस्य *अभिभवं* आक्रमणं *न रुणद्धि* न वारयतीत्यर्थः । *सः* नृपः राजेति यावत् । *क्षयपक्षः* क्षयस्य पक्षः कृष्णपक्षः *ऐन्दवीः* इन्दुसम्बन्धिनीः चन्द्रगताः कला इत्यर्थः *कलाः* षोडशभागैकभागरूपाः । "कला तु षोडशो भाग" इत्यमरः *सकलाः* समस्ताः *शक्तिसम्पदः* प्रभुमन्त्रोत्साहसम्पत्तीः । *हन्ति* नाशयति । तथा च कालस्य कार्यमात्रं प्रति कारणतया कृष्णपक्षात्मकस्यापि कालस्य चन्द्रकलाक्षयकारणत्वमस्ति । तमसस्तथात्वन्तु कालसम्बन्धितयेति बोध्यमिति भावः ।

सरलार्थः

यथा कृष्णपक्षः प्रतिदिनं तमसः आक्रमणं न निवारयतीत्यतः स सकला एव चन्द्रकलाः एकैकशो नाशयति तथैव यो नरः क्रोधात् जातस्य अज्ञानस्याक्रमणं न प्रतिषेधति, सोऽपि क्रमशः आत्मनः प्रभुशक्तिं मन्त्रशक्तिं उत्साहशक्तिं च साकल्येन नाशयति, अतः सर्वथा भवता क्रोधोत्पन्नमज्ञानं प्रतिरोद्धव्यमन्यथाऽचिरेणैव भवतः शक्तिहानेः महाननर्थो भविष्यति । अत्र पूर्णोपमालङ्कारः ।

कौमुदी

कोपजन्मनः इति बहुव्रीहिर्व्यधिकरणः । "अवर्ज्यो बहुव्रीहिर्व्यधिक-

रणो जन्माद्युत्तरपदः" इति वामनः। तमस--इति कर्त्तरि षष्ठी कृद्योगे अभिभव इति "ॠदोरप्" इति 'अप' प्रत्ययः।

-*-

क्रोधं परित्यज्य विवेकबुद्धया कर्म्मसु प्रवर्त्तितव्यमित्युक्तम्, सम्प्रति कर्म्मसु प्रवृत्तिप्रकारमाह—समवृत्तिरित्यादि।

समवृत्तिरुपैति मार्दवं,
समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा,
स विवस्वानिव मेदिनीपतिः॥ ३८॥

अन्वयः

यः समवृत्तिः समये मार्दवम् उपैति, (समये) तिग्मतां च तनोति, स मेदिनीपतिः विवस्वान् 'इव' ओजसा लोकमधितिष्ठति।

वाच्यान्तरम्

येन समये......उपेयते तिग्मता तन्यते तेन मेदिनीपतिना विवस्वता लोकः अधिष्ठीयते।

व्याख्या

यो जनः *समवृत्तिः* समानाऽतिकोमला—नातिकठोरा च वृत्तिः व्यवहारो यस्य सः। *समये* यथोचितावसरे। *मार्दवं* कोमलतां,—अतिमधुरं सद्व्यवहारमिति भावः। *उपैति* विस्तारयति, प्रदर्शयतीत्यर्थः। *सः मेदिनीपतिः* मेदिन्याः पृथिव्याः पतिः प्रभुः राजेत्यर्थः *विवस्वान् इव* सूर्यः इव

ओजसा तेजसा *लोकं* भुवनं *अधितिष्ठति* आक्रामति। "तिग्मं तीक्ष्णं खरं मित्यमरः।" भूर्भूमि .....क्ष्मावनिर्मेदिनी महीत्यमरः "भास्वद् विवस्वत् सप्ताश्वे" इत्यमरः।

सरलार्थः

यथा सूर्यः उत्तरायणे तीक्ष्णात्तीक्ष्णतरो भवति, दक्षिणायने च मृदोर्मृदुतरो जायते, एवं नातितिग्मो नातिमृदुः स्वतेजसा सकलं भुवनमाक्रामति तथैव यो नरपतिः समुचितावसरेषु रौद्रीं प्रभुशक्तिमुक्रोमलां वा दयादिप्रवृत्तिं प्रदर्शयति, सोऽचिरेणैव स्वतेजसा सकलं राज्यं वशीकर्तुमर्हति, अतोऽस्माभिरपि तथैव शत्रुषु मित्रेषु च कालोचितमेव व्यवहर्त्तव्यम्। अत्र मेदिनीपतिविवस्वतोः साम्यप्रतिपादनादुपमालङ्कारः।

कौमुदी

लोकमिति "अधिशीङ्स्थासां कर्म्म" इति सूत्रेणाधिकरणस्य कर्म्मत्वम्। मार्दवमिति--मृदोर्भाव इति अण्--प्रत्ययः।

-x-

यदुक्तं जितेन्द्रियेण सता वर्त्तितव्यमिति तदन्यथाचरणे दोषमाह—क्व चिरायेत्यादि।

क्व चिराय परिग्रहः श्रियां,
क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः॥ ३९॥

अन्वयः

श्रियां चिराय परिग्रहः क्व (अस्ति), दुष्टेन्द्रियवाजिवश्यता च क्व (अस्ति), शरदभ्रचलाः बहुच्छलाः श्रियः हि चलेन्द्रियैः असुरक्षाः (सन्ति)

वाच्यान्तरम्

परिग्रहेण क्व भूयते, दुष्टेन्द्रियवाजिवश्यतया च क्व भूयते, शरदभ्रचलाभिः बहुच्छलाभिः श्रीभिः .....असुरक्षाभिः भूयते।

व्याख्या

श्रियां सम्पदां *चिराय* सुदीर्घ कालं व्याप्य *परिग्रहः* भोगः *क्व* कुत्र अस्तीति शेषः। *दुष्टेन्द्रियवाजिवश्यता* इन्द्रियाणि श्रोत्रादीनि,—वाजिनः अश्वाः इवेत्युपमित-समासः, दुष्टाः अपथगामिनः ये इन्द्रियवाजिनः इति कर्मधारयः तेषां वश्यः वशंगतः तस्य भावः,—अपथप्रस्थितानामश्वानामिव असन्मार्गप्रधावितानां श्रोत्रादीनां वशवर्त्तितेत्यर्थः। *क्व* कुत्र अस्तीति शेषः। दीर्घकालं सम्पद्भोगः इन्द्रियपरायणता च नैकत्र स्थातुमर्हतः इति भावः। कुतः ? *हि* यस्मात् *शरदभ्रचलाः* शरदः शरत्कालस्य, अभ्रवत् मेघवत्, "अभ्रं मेघो वारिवाहः" इत्यमरः। चलाः चञ्चलाः किञ्च—बहुच्छलाः बहुरन्ध्राः, "छलं तु स्खलिते व्याजे" इति विश्वः *श्रियः* राजलक्ष्म्यः *चलेन्द्रियैः* चलानि चञ्चलानि इन्द्रियाणि येषां, तैः असंयतेन्द्रियैः * असुरक्षाः * रक्षितुमशक्याः, दुर्विनीतानां श्रियो ध्रुवं नश्यन्ति इति भावः।

सरलार्थः

ये जनाः इन्द्रियपरतन्त्राः कामतः प्रवर्त्तन्ते सम्पदो भोक्तुम्, तेषामिन्द्रियपरतन्त्राणां सम्पदोऽचिरेणैव कालेन विनष्टा भवन्ति, इत्यतः इन्द्रियपरतन्त्रता सम्पद्भोगश्च नैकत्र चिरं स्थातुमर्हतः। अतो यदि श्रियं रक्षितुमभिलषसि तदा इन्द्रियपरतन्त्रतां विहाय इन्द्रियाणि संयम्य श्रीरक्षणाय प्रवर्त्तस्व। अत्र शरदभ्रेत्यादिपदार्थानां वाक्यार्थं प्रति परार्धगतवाक्यार्थस्य च हेतुतयोपन्यासात्,—काव्यलिङ्गमलङ्कारः।

कौमुदी

श्रियामिति--कर्म्मणि षष्ठी कृद्योगे। असुरक्षाः—इति "ईषद्दुःसुषु" इति कर्म्मणि खल चलेन्द्रियैरिति कर्त्तरि षष्ठी।

*

क्रोधो भवता जितोऽपि पुनर्भवन्तं जयति, इति सर्वथा न युज्यते इति विशेषेणोपदिशति—किमित्यादि।

किमसामयिकं वितन्वता,
मनसः क्षोभमुपात्तरंहसः।
क्रियते पतिरुच्चकैरपां,
भवता धीरतयाऽधरीकृतः॥ ४०॥

अन्वयः

उपात्तरंहसः मनसः असामयिकं क्षोभं वितन्वता भवता धीरतया अधरीकृतः अपां पतिः किम् उच्चकैः क्रियते।

वाच्यान्तरम्

वितन्वन् भवान्......अधरीकृतम् अपां पतिं......करोति ।

व्याख्या

उपात्तरंहसः उपात्तं गृहीतं प्राप्तमित्यर्थः रंहः जवो वेगो येन, रंहस्तरसी तु रयः स्यदः जवः इत्यमरः । तस्य प्राप्तवेगस्य *मनसः* चित्तस्य *असामयिकं* समयः कालः, सोऽस्य प्राप्तः इति सामयिकः उचितकाले जातः, स न भवति इति असामयिकः, अनुचितावसरोपस्थितः इत्यर्थः । तं अनुचितकालोपस्थितम् *क्षोभं* चाञ्चल्यं–अधर्यैमित्यर्थः *वितन्वता* प्रकाशयता *भवता* त्वया । *धीरतया* धैर्यगुणेन "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" इति रसिकाः *अधरीकृतः* पूर्वं अनधरोऽपि अधरः कृतः,—पराजितः इत्यर्थः समुद्रः प्राक् धैर्यगुणेन महान् अपि भवता धैर्यगुणेन स पराजित इत्यर्थः *अपां पतिः* जलानां स्वामी समुद्र इत्यर्थः *किम्* कथं *उच्चकैः* उपरितनः *क्रियते* विधीयते न पराजितं पुनरुच्चकैः कुर्यादिति भावः ।

सरलार्थः

समुद्रो हि जगति धैर्यगुणेन सर्वान् विजित्य वर्त्तते त्वं तु पुरा अलौकिकेन धैर्यगुणेन तमपि पराजितवान् इदानीं तु पुनः अनुचितेऽवसरे क्रोधस्य वशं गतो यदि धैर्यं परित्यजसि तर्हि जितोऽपि समुद्रः पुनस्त्वां जयेत् इति सर्वथा न युज्यते । अतस्त्वं क्रोधस्य वशंगतो

धैर्यं विहातुं नार्हसि। अत्र वितन्वतेति-विशेषणपदस्य वाक्यार्थं प्रत्युपपादक-हेतुनयोपन्यासात् 'काव्यलिङ्ग' मलङ्कारः।

कौमुदी

'असामयिक' मिति-समयशब्दात्, "तदस्य प्राप्त" मिति ठञ्, पश्चान्नञ् समासः। उच्चकै रित्यव्ययमुन्नतार्थकम्।

-※-

पुनः शास्त्रवाक्येन बोधयति—श्रुतमप्येति।

श्रुतमप्यधिगम्य ये रिपून्,
विनयन्ते न शरीरजन्मनः।
जनयन्त्यचिराय सम्पदा-
मयशस्ते खलु चापलाश्रयम्॥ ४१॥

अन्वयः

श्रुतं अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते ते खलु—अचिराय सम्पदां चापलाश्रयं अयशः जनयन्ति॥

वाच्यपरिवर्तनम्

यैः...... शरीरजन्मनः रिपवः न विनीयन्ते तैः......जन्यते।

व्याख्या

ये जनाः *श्रुतं* शास्त्रं "श्रुतं शास्त्रावधृतयो" रित्यमरः। *अधिगम्य* अधीत्य अपि *शरीरजन्मनः* शरीरात् कायात् जन्म उत्पत्तिर्येषां, तान् *रिपून्* शत्रून् *न विनयन्ते* विनेतुं नियन्तुं न शक्नुवन्ति, रिपूणां अधिकारे एव तिष्ठन्तीत्यर्थः।

ते जनाः *खलु* निश्चितं *अचिराय* शीघ्रं सहसेति यावत् *सम्पदां* श्रीणां *चापलाश्रयं* चपलताधीनं *अयशः* अकीर्त्तिं अख्यातिमिति यावत् *जनयन्ति* उत्पादयन्ति अपराजितरिपूणां सम्पदो न भवन्तीति भावः।

सरलार्थः

ये जनाः शास्त्रज्ञानसम्पन्ना अपि कामक्रोधादीनां वशीभूता भवन्ति, तेषां श्रीरपि अल्पेनैव कालेन विनश्यति, इति यत् तत्र पुरुषदोष एवापराध्यति, न तत्र सम्पदां कश्चिद्दोषः लोकाः सम्पदश्चञ्चला इति कीर्त्तयन्ति। अहोआश्चर्यमेतत् अतस्त्वं कामादीन् रिपून् विजित्यैव शत्रून् पराभूय स्थिरां लक्ष्मीमर्जयितुमर्हसि।

अजितेन्द्रियाणां श्रीर्नश्यतीति गम्यार्थस्य भङ्ग्याऽभिधानात् पर्यायोक्तमलङ्कारः। तल्लक्षणं यथा "पर्यायोक्तिर्यदा भङ्ग्या गम्यमेवाभिधीयते"॥

कौमुदी

विनयन्ते इति—"कर्तृस्थे चा शरीरे कर्मणि" इत्यात्मनेपदम्। चापलाश्रयम् चापलं आश्रयो यस्येति बहुव्रीहिः समासः। अचिरायेत्यव्ययं क्रियाविशेषणे द्वितीया।

-x-

क्रुद्धस्य कार्यहानिः स्यादित्यत आह—अतिपातितइत्यादि।

अतिपातितकालसाधना,

स्वशरीरेन्द्रियवर्गतापिनी।

जनवन्न भवन्तमक्षमा,

नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अन्वयः

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापिनी अक्षमा भवन्तं जनवत् नयसिद्धेः अपनेतुं न अर्हति।

वाच्यान्तरम्

अतिपातितकालसाधनया स्वशरीरेन्द्रियवर्गतापिन्या... अक्षमया... न अर्ह्यते।

व्याख्या

अतिपातितकालसाधना अतिपातितानि गमितानि,—अतिक्रान्तानीति यावत्, कालः समयः, साधनानि बलानि यया सा इति बहुव्रीहिः समासः। *स्वशरीरेन्द्रियवर्गतापिनी* स्वस्य निजस्य यत् शरीरं कायः,—इन्द्रियवर्गः ज्ञानकर्मेन्द्रियादयः,—तयोः तापिनी सन्तापदायिनी *अक्षमा* असहिष्णुता, क्रोधपरतन्त्रता इत्यर्थः, क्रोधस्तु सर्वथा धीराणामपि शरीरेन्द्रियाणां विकारं जनयतीति भावः। *भवन्तं* त्वां *जनवत्* साधारणजनमिव *नयसिद्धेः* नीतिसाध्यफलात् *अपनेतुं* भ्रंशयितुं पृथक्कर्त्तुं इत्यर्थः। *न अर्हति* न समर्थो भवति।

सरलार्थः

लोकाः अनुचिताऽवसरेषु शत्रुविजयोचितं सहायादिकमनपेक्ष्यैव क्रोधस्य वशंगताः अचिरेणैव कालेन पराभवं पाप्य पश्चात्ता-

पमुपयान्ति अनयस्य ईदृगेव फलमवधार्य भवानपि इतरजनवत् प्रवृत्त-स्तथैव मा भूः।

कौमुदी

'नयसिद्धे' रिति--अपादाने पञ्चमी, अक्षमेति-न क्षमा इति नञा समासः, क्षम्धातोर्भावे अङि क्षमेति पदम्।

-※-

इदानीं क्षमायाः प्रशस्ततां बोधयति—उपकारकमित्यादि।

उपकारकमायतेर्भृशं,
प्रसवः कर्मफलस्य [illegible]ः।
अनपायि निबर्हणं द्विषां,
न तितिक्षासममस्ति साधनम्॥ ४३॥

अन्वयः

आयतेः भृशम् उपकारकम् भूरिणः कर्म्मफलस्य प्रसवः अनपायि द्विषां निबर्हणं तितिक्षासमम् साधनं न अस्ति।

वाच्यान्तरम्

...उपकारकेण.. प्रसवेन अनपायिना.. निबर्हणेन तितिक्षासमेन साधनेन न भूयते।

व्याख्या

आयतेः उत्तरकालस्य भविष्यत्कालस्येत्यर्थः।*भृशम्* अत्यन्तम्। * उपकारकम् * मङ्गलजनकम्, स्थिरफलहेतुरिति यावत् *भूरिणः* प्रचुरस्य * कर्म्मफलस्य * कर्म्मणां कृत्यानां

फलस्य लाभस्य । *प्रसवः* कारणम्, प्रभूतकृत्यफलजनकमित्यर्थः *अनपायि* अपायो विनाशो विद्यते यस्य, तद्—अपायि, विनाशि, तत् न भवतीति अनपायि, स्वयं अविनश्यदेव *द्विषां* शत्रूणाम् *निबर्हणम्* हन्तृ,—विनाशकमिति यावत् । एतादृग्-गुणयुक्तं *तितिक्षासमं* क्षमातुल्यं "क्षान्तिः क्षमा तितिक्षा च" त्यमरः *साधनं* कार्यसिद्ध्युपायः । *न अस्ति* न भवति न विद्यते इत्यर्थः ।

सरलार्थः

कार्याणां फललाभाय नीतिशास्त्रेषु बहवः उपायाः समादिष्टाः ते तु सर्वेऽपि क्षमया तुल्या न भवितुमर्हन्ति, यतः केवला क्षमैका भविष्यत्स्थिरान्नतिविधायिनी प्रभूतकर्मफलोत्पादिनी, अविनाशिनी शत्रूणां विनाशिनी च यथास्ति न तथा कोऽप्यन्यः उपायः, अत एव इमामेवावलम्बस्व । अत्र श्लोके 'तितिक्षासम'मिति समासगा आर्थी उपमा, तया च व्यतिरेको व्यज्यते, अनपायीत्यादि-विशेषण-महिम्ना साधनान्तरवैलक्षण्यबोधनात् ।

कौमुदी

कर्म्मफलस्येति—षष्ठी कृद्योगे प्रसव इतिकृदन्तपदप्रयोगात्, तितिक्षेति—'तिज' निशाने इति धातोः "गुप्तिज्किद्भ्यः सन्" इति क्षमार्थे सन्—प्रत्ययः, तत "अ'प्रत्ययात्" इत्यनेन अकारप्रत्ययः स्त्रियाम्, आयतेरिति "षष्ठी शेषे" इति षष्ठी,'उपकारक' मित्यस्य कर्म्मणि वा "कर्तृकर्म्मणोः कृति" इति द्विषामितिकर्म्मणि षष्ठी, निबर्हणमिति-कृदन्तस्य ।

सत्यं नास्ति साधनं तितिक्षासमम्, तथापि तितिक्षया कालक्षेपे दुर्योधनस्तावता कालेन सर्वान् नरपतीन् वशीकरिष्यतीति महाननर्थपात इति चेत् ! तत्राह--प्रणतिप्रवणानित्यादि ।

प्रणतिप्रवणान्विहाय नः,
सहजस्नेहनिबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं,
प्रथमे मानभृतां न वृष्णयः ॥४४॥

अन्वयः

सहजस्नेहनिबद्धचेतसः मानभृतां प्रथमे वृष्णयः प्रणतिप्रवणान् नः विहाय सुयोधनं सदा न प्रणमन्ति ।

वाच्यान्तरम्

सहजस्नेहनिबद्धचेतोभिः...प्रथमैः वृष्णिभिः......सुयोधनः...... प्रणम्यते ।

व्याख्या

सहजस्नेहनिबद्धचेतसः सहजः स्वाभाविकः, अकृत्रिम इति यावत्, यः स्नेहः प्रीतिविशेषः,—तेन अकृत्रिमप्रीतिरसेन इत्यर्थः । निबद्धं अस्मासु विशेषेण आसक्तं चेतः मनः येषां ते, अस्मासु गाढानुरागाः इत्यर्थः । एतेन—ते यथानुरक्ताः अस्मासु न तथा सुयोधने इति सूचितम् । *मानभृतां* मानिनां, अभिमानशालिनामित्यर्थः । *प्रथमे* प्रधानाः अग्रेसराः, एतेन—ते

सुयोधनादपि अधिकमभिमानं वहन्तीति सूचितं *वृष्णयः* यादवाः। *प्रणतिप्रवणान्* प्रणामपरान्,—नम्रतया विनयेनाचरतः सुयोधनस्तु न तथा चरति तेष्विति सूचितं *नः* अस्मान्। *विहाय* परित्यज्य *सदा* सर्वकालं *न प्रणमन्ति* न नमस्कुर्वन्ति, किन्तु—कार्यकाले सुयोधनं त्यक्त्वा अस्मत्पक्षा एव भविष्यन्तीति भावः। अतस्तितिक्षया नाऽनपातः इति विभावनीयम्।

सरलार्थः

ये खलु यादवा नृपतयस्ते अभिमानशालिनः अस्मासु च गाढमनुरक्ताः सन्ति वयमपि अभिमानवशां तेषां विनयनम्रव्यवहारैः प्रीतिमुत्पादितवन्तः, अतस्ते उद्धतं अभिमानवन्तं सुयोधनं चिरं सेवितुं न जातु शक्नुयुः, ते खलु कार्यकाले अस्मत्पक्षमेवाऽऽश्रयिष्यन्ति, तेषां च साहाय्यं प्राप्य अक्लेशेनैव रिपून् जेतुं शक्ष्यामः, अतः सर्वथा अव्याकुलः प्रतीक्षस्व तितिक्षया कालम्। अत्र विशेषणपदानां वाक्यार्थ प्रत्युपपादकहेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः।

कौमुदी

मानभृतामिति—मानं बिभ्रति ये इति क्विप् उपपदसमासः तेषामिति निर्धारणे षष्ठी। प्रणतिप्रवणानिति—प्रणत्या प्रवणान् इति तृतीयासमासः।

-*-

न केवलं यादवाः अन्येऽपि अस्मत्पक्षमेवाश्रयिष्यन्तीत्याह—सुहृदः—इत्यादि।

सुहृदः सहजास्तथेतरे,
मतमेषां न विलङ्घयन्ति ये।
विनयादिव यापयन्ति ते,
धृतराष्ट्रात्मजमात्मसिद्धये ॥४५॥

अन्वयः

एषां ये सहजाः सुहृदः (सन्ति), तथा इतरे (सुहृदः सन्ति), ये एषां मतं न विलंघयन्ति ते आत्मसिद्धये धृतराष्ट्रात्मजं विनयात् इव यापयन्ति।

वाच्यान्तरम्

यैः सहजैः सुहृद्भिः भूयते......इतरैः (सुहृद्भिः) भूयते यैः... विलङ्घ्यते तैः सहजैः......धृतराष्ट्रात्मजः......याप्यते।

व्याख्या

किञ्च *एषां* वृष्णीनां *ये* ये राजानः *सहजाःसुहृदः* सहजाता बान्धवाः, मातृपितृपक्षजाः सन्तीति शेषः *तथा* अपि च ये *इतरे सुहृदः* अन्ये मित्रनरपतयः कृत्रिमाः प्राकृताश्च मित्रनरपतयः इत्यर्थः। सन्तीति शेषः। *ये* ये सर्वे नरपतयः। *एषां* वृष्णीनां। *मतं* अभिप्रायं। *न विलंघयन्ति* न अतिक्रामन्ति, वृष्णिभिरैकमत्येन सर्वं कार्यं कुर्व्वन्तीत्यर्थः। *ते* पूर्वोक्ताः वृष्णीनां मित्रनरपतयः यदि चेदानीं दुर्योधनपक्षास्तथापीति भावः। *आत्मसिद्धये* स्वकार्यसम्पादनार्थं *धृतराष्ट्रात्मजं* धृतराष्ट्रस्य आत्मजं पुत्रं सुयोधन-

मिति यावत् *विनयात् इव* विनयं प्रदर्श्य इव, 'अत्रेवे'तिपदम-लीकार्थं द्योतयति तेन कपटेनाऽलीकविनयं प्रदर्श्येत्यर्थः *याप-यन्ति* कालं गमयन्ति, सुयोधनमुपजीव्य कालं नयन्तीत्यर्थः। ते सर्वेऽपि समयं प्रतीक्षन्ते, अतस्तेऽपि तं विहायास्मत्पक्षाः भविष्यन्तीति भावः।

सरलार्थः

तेषां वृष्णीनां केचन पितृबान्धवाः केचन मातृबान्धवाः केचन प्रकृत्यैव बन्धुत्वमापन्नाः केचन उपकारादिना बन्धुत्वमुपगताः नरपतयः सन्ति, ते सर्वे नरपतयः सर्वथा वृष्णीनां मतमेवानुसरन्ति, तेऽधुना स्व-प्रयोजनसिद्ध्यर्थमगत्या बहिर्विनयं प्रदर्श्य दुर्योधनमुपजीव्य कालं गमयन्ति, समयं प्राप्यैव ते तं विहायास्मानेवाश्रयिष्यन्ति, सुयोधन-स्तान् वशीकर्त्तुं न शक्नोतीति ज्ञात्वा त्वं धैर्यहानो मा भूः।

कौमुदी

सहजाः—सहजायन्ते इति "अन्येष्वपि दृश्यते" इति डप्रत्ययः। विनयादिति "ल्यब्लोपे कर्म्मण्यधिकरणे चे"ति ल्यब्लोपे पञ्चमी। धृत-राष्ट्रात्मजमिति —यापयन्तीति ण्यन्तपदस्य प्रयोगात्-,"गतिबुद्धी"त्यादिना अणि कर्त्तुः कर्म्मत्वात्-, कर्म्मणि द्वितीयेति द्वितीया यापयन्तीति-याते-ण्यन्ताल्लट् "अर्त्ति ह्रि" इत्यादिना पुगागमः। आत्मसिद्धये इति"ताद-र्थ्ये चतुर्थी वाच्ये"ति चतुर्थी।

-x-

नन्वेषां सहायेनाधुनैव शत्रुरभियातव्य इति चेन्नायमभि-योग काल इत्याह—अभियोगः—इत्यादि॥

अभियोग इमान्महीभुजो,
भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्,
हरिदश्वः कमलाकरानिव ॥४६॥

अन्वयः

कृतावधेः तस्य भवता कृतः अभियोगः इमान् महीभुजः हरिदश्वः कमलाकरानिव समुत्पतन् प्रविघाटयिता ।

वाच्यान्तरम्

कृतेन अभियोगेन इमे महीभुजः हरिदश्वेन कमलाकराः इव समुत्पतता प्रविघाटयितारः ।

व्याख्या

कृतावधेः कृतः निर्धारितः अवधिः सीमा येन तस्य, अवधारितसमयस्येत्यर्थः । "अवधिस्त्ववधाने स्यात् सीम्नि-काले बिलेऽपि च" इति विश्वः । *तस्य* दुर्योधनस्य *भवता* त्वया *कृतः* निर्धारितः, कालमनपेक्ष्यैव असमये कृत इत्यर्थः । *अभियोगः* आक्रमणं । "अभियोगस्तु शपथे स्यादार्द्रे च परा-भवे" इति विश्वः *इमान्* पूर्वोक्तान् *महीभुजः* महीं पृथिवीं भुञ्जन्ति ये तान् *हरिदश्वः* हरितः हरिद्वर्णा अश्वा यस्य सः सूर्यः । "भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मय" इत्यमरः । *कमलाकरान्* कमलानां पद्मानां आकराः समूहास्तान्

"आकरो निग्रहोत्पत्तिस्थानश्रेष्ठे तु कथ्यते" इति मेदिनी। *इव समुत्पतन्* उद्यन् उदयं गच्छन् इति यावत् *प्रविघाटयिना* भेत्स्यति।

सरलार्थः

सूर्यो यथा उद्यन् कमलानां संहतीः विघाटयति तथा उपयुक्तसमयात् प्राक् भवान् यदि दुर्योधनमाक्रमिष्यति, तदा सर्वे राजानो विरक्ताः सन्तः भिद्येरन् अस्मान् परित्यजेयुश्च। अत्राभियोगहरिदश्वयोः साम्य-प्रतिपादनादुपमालङ्कारः।

कौमुदी

महीं भुनक्तीति क्विप्, तान् महीभुजः। अभियोग इति अभियुजेर्भावे घञ्। समुत्पतन्निति समुत्पतेः शतृप्रत्ययः। तस्येति कर्मणि षष्ठी।

-×-

अवमानितः सुभेद्य इत्युक्तौ यादवपक्षेतरानुद्दिश्य प्राह—उपजापसहानिति।

उपजापसहान्विलङ्घयन्,
स विधाता नृपतीन्मदोद्धतः।
सहते न जनोऽप्यधःक्रियां,
किमु लोकाधिकधाम राजकम्॥४७॥

अन्वयः

मदोद्धतः सः नृपतीन् विलंघयन् उपजापसहान् विधाता, जनः अपि अधःक्रियां न सहते, लोकाधिकधाम राजकं किमु।

वाच्यान्तरम्

मदोद्धतेन तेन विलंघयता नृपतय उपजापसहाः विधातारः, जनेन अधःक्रिया न सह्यते, लोकाधिकधाम्ना राजकेन किमु।

व्याख्या

मदोद्धत मदेन गर्वेण उद्धतः उद्रिक्तः तृतीयातत्पुरुषः *सः* दुर्योधनः। *नृपतीन्* अपरान् राज्ञः *विलङ्घयन्* अतिगच्छन् अवमानयन्नित्यर्थः। *उपजापसहान्* उपजापस्य सहान् भेदयोग्यानित्यर्थः। "समौ भेदोपजापौ च" त्यमरः। *विधाता* करिष्यति, अवमानितो जनः सुभेद्य इति भावः। न खलु ते सहिष्यन्ते इत्याह *जनः* प्राकृतो मनुष्यः अपि *अधःक्रियां* अवमाननां। *न सहते* न क्षमते। *लोकाधिकधाम* लोकेभ्यः अधिकं धाम तेजो यस्य बहुव्रीहिसमासः। लोकोत्तरप्रतापसम्पन्नम्। *राजकम्* राज्ञां समूहः *किमु* यदा प्राकृतोऽपि न सहते तदा राजसमूहो न सहते इति वक्तव्यमेव नास्ति राजानस्तु अवमाननां प्राप्य प्रतिकर्त्तुमक्षमाः अस्मतपक्षं निश्चितमेवावलम्बिष्यन्ते इति भावः।

सरलार्थः

मदगर्विनो दुर्योधनः स्वपक्षानपि राज्ञः अवमानयिष्यति तस्मात् ते तत्कृतां अवमाननां असहिष्णवः अनायासेन भेदं गताः अस्मत्पक्षमवश्यमेवावलम्बिष्यन्ते। अतोऽस्मिन् विषये मनो न खेदयितव्यम्। अत्र श्लोके राजकं तु अधःक्रियां सुतरामेव न सहते इति दण्डापूपिकयान्यायसिद्धोऽर्थः अत एवार्थापत्तिरलङ्कारः। तल्लक्षणम् 'दण्डापूपिकयान्यायागमः'।

कौमुदी

राजकमिति "गोत्रोक्षोष्ट्र" इत्यादिना वुञ्प्रत्ययः, विधातेति विपूर्व-कदधातेर्लुट् ।

-x-

ननु पूर्वं वनेचरेणोक्तं "सखीनिवे" त्यादि । तेन तस्य गतस्मयस्य कुतो मदोद्धतत्वमिति तत्राह—असमापितेत्यादि ।

असमापितकृत्यसम्पदां,
हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः ॥४८॥

अन्वयः

असमापितकृत्यसम्पदां अभिमानशालिनां विभूतयः तावता विनयेन हतवेगं मदम् उत्तम्भयितुम् प्रभवन्ति ।

वाच्यान्तरम्

विभूतिभिः......प्रभूयते ।

व्याख्या

असमापितकृत्यसम्पदां कृत्यानि कर्म्माणि एव सम्पदः कर्त्तव्यकार्याणीत्यर्थः, असमापिताः न समापिताः समाप्तिं नीताः, असम्पूर्णीकृता इत्यर्थः । कृत्यसम्पदो यैः तेषां अकृतकृत्यानामित्यर्थः । * अभिमानशालिनां * अभिमानेन गर्वेण शालन्ते शोभन्ते ये, तेषां गर्वितानामित्यर्थः । * विभूतयः *

सम्पदः, राज्यलक्ष्म्य इति यावत् । *तावता* तत्परिमितेन स्वल्पेनेत्यर्थः । *विनयेन* नम्रतया कार्यवशात् समुत्पन्नेन तादृशेनाल्पेन विनयेनेति भावः । *हतवेगं* हतो नष्टः वेगः प्रसरो यस्य, तं प्रतिबद्धप्रसरं; न तु तत्वत एव तथा *मदं* गर्वं । *उत्तम्भयितुं* वर्धयितुं प्रभवन्ति । सर्वथा दुर्जनं सम्पदो विकारयन्तीति भावः ।

सरलार्थः

प्रकृत्यैवाभिमानवान् स सुयोधनः प्रयोजनापेक्षितयैवात्मनो गतस्मयत्वं प्रकटयति सत्यमेव स विनीतो जातः इति न मन्तव्यम् अकृतकृत्यस्य तस्य व्याजेन विनयित्वं दर्शयतो राज्यसम्पदः अचिरेणैव कालेन अहङ्कारित्वं वर्धयेयुः अतो वनेचरोक्तं गतस्मयत्वमकिंचित्करमेव विभावनीयम् ।

कौमुदी

उत्तम्भयितमिति । 'उद् + स्तम्भयितुमि' तिस्थिते "उदः स्थास्तम्भोः पूर्वस्ये"ति नियमेन सस्य पूर्वसवर्णादेशः ॥

-x-

मदस्यानर्थहेतुत्वं श्लोकद्वयेन प्रदर्शयति—मदमानेत्यादि ।

मदमानसमुद्धतं नृपं,
न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नया,
न्नयहीनादपरज्यते जनः ॥४७॥

अन्वयः

मदमानसमुद्धतं नृपं मूढता नियमेन न वियुङ्क्ते अतिमूढः नयात् उदस्यते, नयहीनात् जनः अपरज्यते।

वाच्यान्तरम्

मदमानसमुद्धतः नृपः मूढतया न वियुज्यते अतिमूढेन उदस्यते जनेन......अपरज्यते।

व्याख्या

मदमानसमुद्धतं मदश्च मानश्च मदमाने, ताभ्यां समुद्धतं उद्धतं धनयौवनादिप्रयुक्तमत्ततया, अहङ्कारादिना च गर्वितमित्यर्थः। *मूढता* विवेकशून्यता, कार्याऽकार्याऽपरिज्ञानमित्यर्थः। *नियमेन* अवश्यं। 'मन्त्रणायां प्रतिज्ञायां नियमो निश्चये व्रते' इति रुद्रः। *न वियुङ्क्ते* न परित्यजति *अतिमूढः* अतिमात्रया हतबुद्धिः। *नयात्* नीतेः नीतिमार्गादित्यर्थः। *उदस्यते* उत्क्षिप्यते। *नयहीनात्* नयेन हीनः परित्यक्तः तस्मात्, भ्रष्टनीतेरिति यावत्। *जनः* लोकः *अपरज्यते* विरक्तो भवति। तथा च नीतिं परित्यज्य कार्यं कुर्वतो जनान् न केऽपि आद्रियन्ते इति भावः।

सरलार्थः

लोको मदेनाऽभिमानेन च हतबुद्धिर्भवति। हतबुद्धिस्तु नयात् भ्रश्यते नीतिभ्रष्टो जनानां विरागभाजनं भवति। अतो गर्वितः स स्वयमेव विपद्यते, तदर्थं चेष्टया अलम्।

कौमुदी

'नियमेने'ति-प्रकृत्यादिना तृतीया 'उदस्यते' इति-कर्मकर्त्तरि लट् 'नयात्' 'नयहीनादि'त्युभयत्र अपादाने पञ्चमी ।

-※-

ननु राज्ञः मद-मानोद्धतत्वे को दोषः इत्यत आह—अपराग इत्यादि ॥

अपरागसमीरणेरितः,
क्रमशीर्णाकुलमूलसन्ततिः ।
सुकरस्तरुवत्सहिष्णुना,
रिपुरुन्मूलयितुं महानपि ॥५०॥

अन्वयः

अपरागसमीरणेरितः क्रमशीर्णाऽऽकुलमूलसन्तति रिपुः महान् अपि: तरुवत् सहिष्णुना उन्मूलयितुं सुकरः ।

वाच्यान्तरम्

अपरागसमीरणेरितेन क्रमशीर्णाऽऽकुलमूलसन्ततिना रिपुणा महता तरुवत् (तरुणा इव) सहिष्णुना सुकरेण भूयते ।

व्याख्या

***अपरागसमीरणेरितः* अपरज्यते विरज्यते इत्यपरागो विरक्तिः 'द्वेष' इति यावत् । *समीरणः—इव* वायुरिव । "श्वसनः स्पर्शनो वायुः जगत्प्राणसमीरणाः" इत्यमरः । तेन ईरितः नोदितः, विकृत इत्यर्थः । अत एव *क्रमशीर्णाऽऽकुलमल-**

सन्ततिः* क्रमेण मन्दं मन्दं शीर्णा शिथीलीभूता,—आकुला-चञ्चला, च मूलसन्ततिः प्रजादिस्वजनवर्गः—शिफासमूहश्च यस्य सः। "मूलं वशीकृते स्वाये शिफातारान्तिकादिषु" इति वैजयन्ती। *रिपुः* शत्रुः *महान् अपि* प्रबलोऽपि *तरुवत्* वृक्ष इव। *सहिष्णुना* क्षमावता,—धैर्येण कार्यं कुर्वता जनेन *उन्मूलयितुं* उत्पाटयितुं *सुकरः* सुसाध्यः॥

सरलार्थः

महानपि वृक्षो यथा पुनः पुनः वात्याघातेन शिथिलमूलः अल्पायासेनैव उन्मूलनयोग्यो भवति तथा प्रजा यद्यपि विरक्ताः भवन्ति तर्हि अमात्यादयः क्रमेण अश्रद्दधानाः सन्तः अवश्यं प्रकोपिता भवन्ति एवञ्चेत्! सहिष्णुना प्रबलोऽपि सः रिपुः सुखेन पराजेयः॥

कौमुदी

सुकरः इति 'ईषद्दुःसुषु इत्यादिना 'खल्' प्रत्ययः। सहिष्णुना-इत्यत्र सहतेः ' अलंकृञ्—निराकृञ् सहचर—इष्णुच्" इत्यनेन 'इष्णुच्' प्रत्ययः।

-x-

ननु—अन्तःप्रकृतिभेदेन कथं सुसाध्यः इति तत्राऽऽह—अणुरित्यादि।

अणुरप्युपहन्ति विग्रहः,
प्रभुमन्तःप्रकृतिप्रकोपजः।

अखिलं हि हिनस्ति भूधरं,

तरुशाखान्तनिघर्षजोऽनलः ॥५१॥

अन्वयः

अणुरपि अन्तःप्रकृतिप्रकोपजः विग्रहः प्रभुं उपहन्ति तरुशाखान्तनिघर्षजः अनलः अखिलं भूधरं हिनस्ति हि।

वाच्यान्तरम्

अन्तःप्रकृतिप्रकोपजेन अणुना विग्रहेण प्रभुः उपहन्यते तरुशाखान्तनिघर्षजेन अनलेन भूधरः हिंस्यते।

व्याख्या

अणुः अल्पः अपि *अन्तःप्रकृतिप्रकोपजः* अन्तः अन्तरङ्गाः, प्रकृतयः प्रजादिबन्धुवर्गाः, तासां प्रकोपात् क्रोधात् जायते यः अन्तरङ्गाऽमात्याद्यपरागसमुत्थः इत्यर्थः "अन्तः—स्वीकारमध्ययो" रिति मेदिनी "प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे। च्छन्दःकारणगुह्येषु जन्त्वमात्यादिकेष्वपि" इति वैजयन्ती। *विग्रहः* वैरं *प्रभुं* स्वामिनं, अधिपतिमिति यावत् *उपहन्ति* विनाशयति। अथ दृष्टान्तमाह—*तरुशाखान्तनिघर्षजः इति* तरूणां वृक्षाणां, "वृक्षो महीरुहः शाखी विटपी पादपस्तरु" रित्यमरः। शाखाः तासां निघर्षः परस्परं घर्षणं, तस्मात् जातः। *अनलः* अग्निः *अखिलं समस्तं* "कृत्स्नं समस्तनिखिलाऽखिलाणी"त्यमरः। *भूधरं* पर्वतं *हिनस्ति* नाशयति, दहतीति भावः॥

सरलार्थः

वृक्षशाखयोः परस्परघर्षणात् समुत्पन्नस्तदन्तर्गतोऽग्निर्यथा—तं शाखासहितं तरुं दग्ध्वा तत्रस्थं वनं ततश्च पर्वतमपि दहति, तथा—प्रजादिबान्धवा विकृताः सन्तः यद्वैरमाश्रयन्ति तद्वैरमेव राजानं राजकुलञ्च निःशेषं विनाशयति, अत्र श्लोके उपमानोपमेयभावापन्नयोरनलविग्रहयोः समानधर्म्मस्य अखिलनाशकत्वस्य बिम्बप्रतिबिम्बवद् भासमानतया दृष्टान्ताऽलङ्कारः ॥

कौमुदी

'विग्रह' इति 'विगृह्यते'रित्यल—प्रत्ययः । 'प्रभु'रिति प्रभवतेरिति "भुवोडुर्विशंप्रे ष्वि"ति 'डु'प्रत्ययः "अधिभूर्नायको नेता प्रभुः परिवृढोऽधिप" इत्यमरः ॥

-:*:-

क्रमोन्नतिं गमिष्यन्तं शत्रुं कथमुपेक्षेत इत्याशङ्क्य दुर्विनीतत्वादित्यत आह—'मतिमानि'त्यादि ॥

मतिमान्विनयप्रमाथिनः,
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलुः तादृगन्तरे,
विपदन्ता ह्यविनीतसम्पदः ॥५२॥

अन्वयः

मतिमान्, विनयप्रमाथिनः, द्विषः, समुन्नतिं, समुपेक्षेत, तादृक, अन्तरे, सुजयः, खलु, हि, अविनीतसम्पदः, विपदन्ताः ।

१२

वाच्यान्तरम्

मतिमता......समुन्नतिः समुपेक्ष्येत । तादृशा सुजयेन भूयते । अविनीतसम्पद्भिः विपदन्ताभिः भूयते ॥

व्याख्या

* मतिमान् * मतिः बुद्धिः विद्यते यस्य सः प्राज्ञः,—इत्यर्थः । *विनयप्रमाथिनः* विनयं शिष्टाचारं,—प्रमथ्नाति परिहरति यस्तस्य विनयहीनस्य,—दुर्विनीतस्य इत्यर्थः । *द्विषः* शत्रोः । *समुन्नति* वृद्धि, समुपेक्षेत । *तादृक्* तादृशः दुर्विनीतः *अन्तरे* कस्मिंश्चित् छिद्रे *सुजयः* सुखेन अनायासेन जेतुं पराभवितुं शक्यः * खलु * निश्चितम् *हि* यतः * अविनीतसम्पदः * न विनीताः अविनीताः, दुर्विनीता इत्यर्थः, तेषां सम्पदः सम्पत्तयः * विपदन्ताः * विपत् विपत्तिः, "विपत्त्यां विपदापदौ" इत्यमरः । अन्ते अवसाने यासां ताः भविष्यद्विपत्कारिण्य इत्यर्थः ॥

सरलार्थः

ये शत्रवो मदमत्तास्ते स्वयमेव शिष्टानां मर्यादाभङ्गं विधाय सर्वेषां सुतरामप्रिया भवन्ति, तेषां छिद्रं सुलभमेव, तस्मिन्नवसरे ते सुखेन जेयास्तदर्थं बुद्धिमान् जनो व्याकुलो न भवेत्, यदि च कदाचित् तेषामुन्नतिरपि दृश्यते, तदपि नोद्वेगकारणम्, यतस्तेषां शिष्टमर्यादाभङ्गकारिणां सम्पत् चिरस्थायिनी न भवत्येव ॥

कौमुदी

सुजय इति—"ईषद्दु:सुषु" इत्यादिना 'खल्'। तादृगिति—स इव दृश्यते इति "दृशेरनालोचने कञ् चे"ति क्विप्॥

कथं दुर्विनीतः सुजयः? इत्यत आह—लघुवृत्तितयेत्यादि।

लघुवृत्तितया भिदां गतं,
बहिरन्तश्च नृपस्य मण्डलम्।
अभिभूय हरत्यनन्तरः,
शिथिलं कूलमिवापगारयः ॥५३॥

अन्वयः

लघुवृत्तितया, बहि., अन्त., च, भिदां, गतं, नृपस्य, मण्डलं, अनन्तरः, आपगारयः, शिथिलं, कुलम्, इव, अभिभूय, हरति॥

वाच्यान्तरम्

अनन्तरेण आपगारयेण...ह्रियते।

व्याख्या

लघुवृत्तितया लघुः नीचा वृत्तिः व्यवहारः, आचरणम् इति यावत्,—यस्य तस्य भावः, तया नीचाशयतयेत्यर्थः *बहिः* मित्रादिषु *अन्तः* अमात्यादिषु च *भिदां* भेदम् *गतं* प्राप्तम् *नृपस्य* राज्ञः *मण्डलं* समूहं *अनन्तरः* निकटवर्त्ती शत्रुः *आपगारयः* आपगायाः नद्याः—स्रोतस्वत्याः, इति यावत्। "स्रोतस्वती द्वीपवती स्रवन्ती निम्न-

गापगा" इत्यमरः *रयः* वेगः *शिथिलं* शीर्णं *कुलमिव* तीरमिव *अभिभूय* आक्रम्य *हरति* विध्वंसयति ।

सरलार्थः

यो नृपो नीचाशयतया सुहृदो मन्त्रिप्रभृतींश्च विरक्तान् करोति तं समीपस्थो नृपः समाक्रम्याऽनायासेनैव विध्वंसयति अतो दुर्योधनस्य जयायोद्विग्नो मा भूः । यथा स्रोतस्वत्याः वेगः शीर्णं कुलं पातयति तथा अत्रोपमालङ्कारः अनन्तरनृपापगारययोः साम्यात् ।

कौमुदी

'लघुवृत्तितये'ति हेतौ तृतीया । 'भिदामि'ति "षिद्भिदादिभ्योऽङ्" इत्यङ्प्रत्ययेन भिदेति,—ततः कर्म्मणि द्वितीया ॥

-*-

एवं भीमं समुपदिशति युधिष्ठिरे व्यासस्यागमनमभूदिति कथान्तरं प्रस्तौति—अनुशासतमित्यादि ॥

अनुशासतमित्यनाकुलं,
नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छित-
स्तमभीयाय पराशरात्मजः ॥५४॥

अन्वयः

इति, आकुलं, अर्जुनाग्रजं, नयवर्त्म, अनाकुलमनुशासतं, तं, पराशरात्मजः, स्वयं, अभिवाञ्छितः, अर्थः, इव, अभीयाय ॥

वाच्यान्तरम्

इति......अनुशासत् सः पराशरात्मजेन.........अभिवाञ्छितेन अर्थेन इव अभीये।

व्याख्या

इति इत्थं पूर्वोक्तम्। *आकुलं* शत्रुकृतावमानस्मरणात् क्षुभितम्। *अर्जुनाग्रजं* अर्जुनस्य अग्रजं भीमसेनमित्यर्थः। *नयवर्त्म* नयस्य नीतेः वर्त्म मार्गम्। *अनाकुलं* असङ्कीर्णं यथा स्यात्तथा। *अनुशासतं* उपदिशन्तम् *तं* युधिष्ठिरम् *पराशरात्मजः* पराशरस्य तदाख्यस्य मुनेः आत्मजः पुत्रः वेदव्यास इत्यर्थः, *स्वयं* मूर्त्तिमान् *अभिवाञ्छितः* अभीष्टः। *अर्थः* मनोरथः, इव *अभीयाय* आजगाम, सहसा युधिष्ठिरसमीपमुपस्थित इत्यर्थः।

सरलार्थः

भीमसेनमुपदिशति युधिष्ठिरे सहसा मूर्त्तिमान् मनोरथ इव वेदव्यासस्तत्र समुपस्थितः। अत्रोत्प्रेक्षालङ्कारः 'मूर्त्तिमान् अर्थ इवे'ति-सम्भावनात्।

कौमुदी

'अनुशासतमि'ति—शास्ते शतृ ततो 'जक्षित्यादयः षडि'त्यभ्यस्त-तया नुम्भावः।

-x-

द्वाभ्यां मुनिं विशिनष्टि—मधुरैरित्यादि।

मधुरैरवशानि लम्भय-

न्नपि तिर्यञ्चि शमं निरीक्षितैः ।

परितः पटु बिभ्रदेनसां,

दहनं धाम विलोकनक्षमम् ॥५५॥

अन्वयः

मधुरैः, निरीक्षितैः, अवशानि, तिर्यञ्चि, अपि, शमं, लम्भयन्, परितः, पटु, एनसां, दहनं, (अपि) विलोकनक्षमं, धाम, बिभ्रत्, (जगतीभुजा, मुनिः, ददृशे) ॥

वाच्यान्तरम्

लम्भयन्तं......बिभ्रतं (जगतीभुक् मुनिं ददर्श) ॥

व्याख्या

मधुरैः स्निग्धैः,—प्रशान्तैरितियावत् । *निरीक्षितैः* अवलोकनैः,—दृष्टिपातैरिति यावत् *अवशानि* अनायत्तानि,—प्रतिकूलानि । "वशमायत्ततायां चे" ति विश्वः *तिर्यञ्चि* पशुपक्ष्यादीनि । *अपि* किं पुनर्विवेकवतो नरानिति भावः । *शमं* शान्तिं,—स्वाभाविकचाञ्चल्योपशममित्यर्थः । *लम्भयन्* प्रापयन् *परितः* सर्वतः । *पटु* प्रदीप्तम् । *एनसां* पापानां "अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् । कलुषवृजिनैनोऽघमंहोदुरितदुष्कृत"मित्यमरः। *दहनं* दह्यते—अनेनेति,—दग्धुं क्षममित्यर्थः । *अपि* *विलोकन-

क्षमं* दर्शनयोग्यं अग्नितो विलक्षणतेजःसम्पन्नमिति भावः । *धाम* तेजः *बिभ्रत्* दधत् । मुनिः जगतीभुजा ददृशे इत्युत्तरेणान्वयः ॥

सरलार्थः

परश्लोके द्रष्टव्यः ।

सहसोपगतः सविस्मयं,
तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः,
स वपुष्मानिव पुण्यसञ्चयः ॥५६॥

अन्वयः

सहसा, उपगतः, तपसां, सूतिः, आपदां, असूतिः, मुनिः, वपुष्मान्, पुण्यसञ्चयः, इव, जगतीभुजा, विस्मयं, ददृशे ।

वाच्यान्तरम्

उपगतं......सूतिं......असूतिं तं मुनिं वपुष्मन्तं पुण्यसञ्चयमिव जगतीभुक्......ददर्श ॥

व्याख्या

सहसा दैवात् *उपगतः* उपस्थितः । *तपसां सूतिः* तपःप्रभृतिधर्म्माणां उत्पत्तिस्थानं *आपदां* विपदां *असूतिः* अप्रसूतिः,—निवर्त्तक इत्यर्थः *सः मुनिः* स वेदव्यासः *वपुष्मान्* वपुः शरीरं विद्यते,—यस्य सः शरीरधारी,—

मूर्त्तिमानिति यावत् *पुण्यसंचयः इव* पुण्यराशिरिव। *जगतीभुजा* राज्ञा युधिष्ठिरेण *सविस्मयं* साश्चर्यं *ददृशे* अवलोकितः ॥

सरलार्थः

यस्य खलु महर्षेर्दृष्टिपातेन तत्रस्था अशान्ता अपि मृगपक्षिणः शान्ततां गतवन्तः तं दैवगत्या समुपस्थितं विपद्भंजनं तपस्विनं महर्षिं व्यासं मूर्त्तिमन्तं पुण्यसम्भारमिव स राजा ददर्श ॥

-x-

समागते वेदव्यासे राज्ञस्तत्कालोचितं सुविनीतव्यवहारं विशिनष्टि–'अथोच्चकै' रित्यादि ॥

अथोच्चकैरासनतः परार्ध्या-
दुद्यन्स धुतारुणवल्कलाग्रः।
रराज कीर्णाकपिशांशुजालः,
शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥५७॥

अन्वयः

अथ, उच्चकैः, परार्ध्यात्, आसनतः, उद्यन्, धूतारुणवल्कलाग्रः, सः, कीर्णाकपिशांशुजालः, सुमेरोः, शृङ्गात्, (उद्यन्) तिग्मरश्मिः, इव, रराज ॥

वाच्यान्तरम्

उद्यता तेन धूतारुणवल्कलाग्रेण कीर्णाकपिशांशुजालेन...... तिग्मरश्मिना रेजे ॥

व्याख्या

अथ व्याससन्दर्शनात्परं *उच्चकैः* उन्नतात् *परार्द्ध्यात्* प्रधानात्,—श्रेष्ठादिति यावत् "क्लीबे प्रधानं...... परार्द्ध्याऽग्रप्राग्रहरप्राग्र्याऽग्रीयमग्रियम् 'इत्यमरः' *आसनतः* सिंहासनात् *उद्यन्* उत्तिष्ठन् *धूतारुणवल्कलाग्रः* अरुणं वल्कलं,—तस्य अग्रं. धूतं कम्पितं अरुणाग्रवल्कलं यस्य सः, वातविकम्पितपरिहितारुणवल्कलाग्रभाग इत्यर्थः *सः* राजा, युधिष्ठिरः *कीर्णकपिशांशुजालः* कीर्णं विस्तृतं,—आकपिशं कृष्णपीतमिश्रवर्णः "श्यावः स्यात् कपिशे" इत्यमरः। अंशुजालं किरणसमूहो यस्य सः। "किरणास्रमयूखांशुगभस्तिघृणिरश्मयः" इत्यमरः। *सुमेरोः* स्वर्णमयपर्वतस्य *शृङ्गात्* शिखरात् *उद्यन्* उदीयमानः * तिग्मरश्मिः * तिग्मानि तीक्ष्णानि रश्मयः किरणजालं यस्य सः "तिग्मं तीक्ष्णं खरमि"त्यमरः सूर्यः,—*इव* *रराज* शुशुभे ॥

सरलार्थः

सहसा समागतं महामुनिं वेदव्यासं दृष्ट्वा सः राजा युधिष्ठिरः सिंहासनात् उत्थितः परिहितारुणवर्णवल्कलाग्रस्य वायुवेगात् इतस्ततः प्रकम्पनात् विकीर्णकिरणजालः सूर्यः इव शुशुभे। 'तिग्मरश्मिरिव शुशुभे' इत्युपमालङ्कारः ॥

कौमुदी

'अथ'-इत्यनन्तरार्थे अव्ययम् ॥ 'आसनतः' 'शृङ्गात्' इत्युभयत्राऽपादाने पञ्चमी।

-x-

अवहितहृदयो विधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्,
प्रशम इव श्रुतमासनं नरेन्द्रः ॥५८॥

अन्वयः

सः, नरेन्द्रः, अवहितहृदयः, ऋषिप्रवरे, ऋषिवत्, गुरूपदिष्टां, अर्हां विधाय, पश्चात्, तदनुमतं, आसनं, प्रशमः, श्रुतं, इव, अलञ्चकार ॥

वाच्यान्तरम्

अवहितहृदयेन......तेन......नरेन्द्रेण...प्रशमेन... अलञ्चक्रे ॥

व्याख्या

सः नरेन्द्रः नरेषु इन्द्रः श्रेष्ठः, सः राजा युधिष्ठिरः *अवहितहृदयः* अवहितं प्रमादरहितं हृदयं चित्तं यस्य सः । "चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः । मुनेर्यथोचितसन्मानपरिरक्षणे दत्तमनःसंयोग इत्यर्थः *ऋषिप्रवरे* ऋषिषु प्रवरे श्रेष्ठे "ऋषयः सत्यवचस" इत्यमरः *ऋषिवत्* ऋषेरुपयुक्तां । अर्हत्यर्थे वति—प्रत्ययः । *गुरूपदिष्टां* गुरुभिः शास्त्रकारैः उपदिष्टां कथितां शास्त्रीयामित्यर्थः । *अर्हां* पूजां *विधाय* कृत्वा *पश्चात्* अनन्तरं *तदनुमतं* तेन वेदव्यासेन *अनुमतं* अनुज्ञातं *आसनं* *प्रशमः* शान्तिः *श्रुतं* शास्त्रश्रवणमिव अलञ्चकार स्वीकृतवान् ॥ मुनेरनुमत्या आसने उपविष्टवानित्यर्थः ॥

सरलार्थः

समागतं वेदव्यासं तद्गतमनाः यथाविधि सत्कृत्य तस्मै आसनं दत्तवान् ततो राजा ऋषेरनुमतिं प्राप्य आसने उपविष्टवान् ॥

अत्र श्लोके 'पुष्पिताग्रा'वृत्तम् "अयुजिनन्तयुग—रेफतो यकार युजितुनजौजरगाश्च पुष्पिताग्रा ।

कौमुदी

'ऋषिप्रवरे' 'नरेन्द्रे' इत्युभत्र—सप्तमीतत्पुरुषसमासः ॥

-×-

तदानीं राजा कीदृक्तया प्रतिभाति तदाह—व्यक्तोदितेत्यादि ॥

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं,
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥५९॥

अन्वयः

व्यक्तोदितस्मितमयूखविभासितोष्ठः, विकीर्णधाम्नः, मुनेः, अभिमुखं, तिष्ठन्, सः, इद्धं, अंशुजालं, तन्वन्तं, गुरुं, अभितः, सकलस्य, शशांकमूर्त्तेः, लक्ष्मीं, उवाह ॥

वाच्यान्तरम्

व्यक्तोदितस्मितमयूखविभासितोष्ठेन तेन......तन्वता......लक्ष्मीः ऊहे ॥

व्याख्या

* व्यक्तोदितस्मितमयूखविभासितोष्ठः * व्यक्तं स्पष्टं यथा स्यात् तथा उदितैः उत्पन्नैः स्मितस्य ईषद्धास्यस्य मयूखैः किरणैः विभासितौ प्रदीप्तौ ओष्ठौ यस्य सः ऋषिसन्दर्शनात् परमानन्दोत्फुल्लतया मृदु हसन्नित्यर्थः ॥ *विकीर्णधाम्नः * विकीर्णं विस्तृतं धाम तेजो यस्य, तस्य तेजःपुञ्जकलेवरस्य *मुनेः* वेदव्यासस्य *अभिमुखं* सम्मुखम्। *तिष्ठन्* *सः* राजा युधिष्ठिरः *इद्धं* प्रदीप्तं *अंशुजालं* किरणसमूहं, तेज इत्यर्थः। *तन्वन्तं* प्रकाशयन्तं *गुरुं* बृहस्पतिम्। "गुरुगोष्पतिपित्रादौ" इत्यमरः। *अभितः* सर्वतः *सकलस्य* समस्तस्य *शशाङ्कमूर्त्तेः* षोडशकलापरिपूर्णस्य शशधरस्येत्यर्थः *लक्ष्मीं* शोभां *उवाह* प्राप।

कौमुदी

'गुरु'मिति 'अभितः परित इत्यादिना द्वितीया ॥ 'बृहस्पतिचन्द्रयोस्तु कदाचित् पौर्णमास्यामेव सम्भवेत्। अत एव 'सकलस्य शशाङ्कमूर्त्तेः'-रित्युक्तम् श्लोकेऽस्मिन् वसन्ततिलकं नाम वृत्तम्। ज्ञेयं वसन्ततिलकं 'तभजा जगौगः' अत्र श्लोके उपमेयस्य राज्ञः उपमानेन इन्दुधर्मेण लक्ष्म्याः साक्षात् सम्बन्धाऽसम्भवात् 'सदृशीं लक्ष्मी'मिवेति—प्रतिबिम्बकरणयोगात् असम्भववस्तुसम्बन्धात् पदार्थवृत्तिनिदर्शनालङ्कारः ॥

* इति भारविकृतौ किरातार्ज्जुनीये महाकाव्ये द्वितीयः सर्गः *

तृतीयः सर्गः

त्रिभिः श्लोकैर्मुनेरलौकिकीमाकारसमृद्धिं वर्णयति 'तत' इत्यादि ॥

अत्र 'धर्मात्मजो' 'मुनिमाबभाषे'-इति चतुर्थश्लोकोक्तक्रिया-पदेन वाक्यपरिसमाप्तेः कलापकम् 'कलापकं'-'चतुर्भिः स्या-दिति लक्षणात्।

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्पिभिः प्रांशुमिवांशुजालैः।
बिभ्राणमानीलरुचं पिशङ्गी-
र्जटास्तडित्वन्तमिवाम्बुवाहम् ॥१॥

अन्वयः

ततः, (धर्मात्मजः) शरच्चन्द्रकराभिरामैः, उत्सर्पिभिः, अंशुजालैः, प्रांशुं, इव, आनीलरुचं, पिशङ्गीः, जटाः, बिभ्राणं, तडित्वन्तं, अम्बुवाहं, इव, मुनिं, आबभाषे ॥

वाच्यान्तरम्

प्रांशुः इव आनीलारुक् बिभ्राणः तडित्वान् अम्बुवाह इव (राजा) (मुनिः आबभाषे ।)

व्याख्या

ततः तदनन्तरं, वेदव्यासे समुपविष्टे सति *धर्म्मात्मजः* धर्म्मस्य आत्मजः युधिष्ठिरः, *शरच्चन्द्रकराभिरामैः* शरदि शरद्वतौ, (उदितः) चन्द्रः, तस्य कराः अंशवः, ते इव अभिरामाः मनोज्ञाः, तैः आह्लादकैरित्यर्थः *उत्सर्पिभिः* ऊर्द्ध्वं सर्पन्ति गच्छन्ति ये, तैः ऊर्द्ध्वगामिभिरित्यर्थः । *अंशुजालैः* अंशूनां किरणानां जालैः समूहैः ॥ "किरणोमयूखांशुगभस्तिघृणिधृष्णयः इत्यमरः" ॥ प्रभापटलैरित्यर्थः । *प्रांशुः* उन्नत "उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे" इत्यमरः । इवस्थितमित्युत्प्रेक्षा । आनीलरुचं आनीला ईषत् नीलवर्णा, रुक् प्रभा यस्य तं । स्युः प्रभारुक् रुचिस्त्विड्भा भाश्छविद्युतिदीप्तयः इत्यमरः । नीलाभमित्यर्थः ॥ *पिशङ्गीः* पिङ्गलवर्णाः । *जटाः बिभ्राणं* जटासमूहं धारयन्तं, अतएव *तडित्वन्तं* तडित् विद्युत् विद्यते यस्मिन्, तं विद्युद्युक्तं । *अम्बुवाहमिव* अम्बु जलं वहतीति, तं मेघमिव । अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः इत्यमरः । स्थितं 'मुनिमाबभाषे' इति चतुर्थ श्लोकेनान्वयः ॥

सरलार्थः

स राजा युधिष्ठिरः आपिङ्गलं जटाजालं धारयन्तं तेजस्विनं

सौम्यमूर्त्तिं प्रशान्तचेतसं सम्मुखोपविष्टं मुनिं वेदव्यासं पप्रच्छ। सर्गेऽस्मिन् पञ्च पञ्चाशच्छ्लोक पर्यन्तमुपजातिवृत्तमिन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणात्। तल्लक्षणम्—

" स्यादिन्द्रवज्रा यदि तौ जगौ गः "

" उपेन्द्रवज्रा प्रथमे लघौ सा "

" अनन्तरोदीरितलक्ष्म भाजौ "

" पादौ यदीयावुपजातयस्ताः "

श्लोकेऽस्मिन् 'प्रांशुमिवे'त्युत्प्रेक्षणादुत्प्रेक्षाऽलङ्कारः। तथा 'अम्बुवाहमिवे' त्युपमालङ्कारः। 'शरच्चन्द्रकराभिरामे' ति चोपमालङ्कारः एषामलङ्काराणां मिथोऽनपेक्षयावस्थानात् संसृष्टिः।

कौमुदी

उत्सर्पिभि' रिति 'सृप्' धातो'र्णिनि'प्रत्ययः। 'बिभ्राण'मिति 'भृ' धातोः शानच्। 'अंशुजाले'रिति हेतौ तृतीया 'जटाभिस्तापस' इतिवद्वा उपलक्षणे तृतीया। 'अम्बुवाह' मिति 'अम्बु वहतीति 'कर्मण्यण्' इत्यण् प्रत्ययः। 'उपपद' समासः॥

प्रसादलक्ष्मीं दधतं समग्रां,
वपुःप्रकर्षेण जनातिगेन।
प्रसह्य चेतःसु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम्॥२॥

अन्वयः

समग्रां, प्रसादलक्ष्मीं, दधतं, जनातिगेन, वपुःप्रकर्षेण, असंस्तुतानाम् अपि, चेतःसु, आर्द्रं, भावं, प्रसह्य, समासजन्तम् मुनिं, धर्म्मात्मजः, आबभाषे ।

वाच्यान्तरम्

दधत्......समासजन् *मुनिः धर्म्मात्मजेन आबभाषे ।

व्याख्या

पुनः *समग्रां* सम्पूर्णां सकलां *प्रसादलक्ष्मीं* प्रसादः प्रसन्नता, सौम्यभावः । "प्रसादस्तु प्रसन्नता" इत्यमरः । तस्य लक्ष्मीं सम्पदं *दधतं* धारयन्तं, अतएव *जनातिगेन* जनं लोकं, अतिगच्छति अतिक्रामति, इति जनातिगः, तेन लोकातिशयिना *वपुः प्रकर्षेण* वपुषः शरीरस्य, प्रकर्षः तेजः समृद्धिः, तेन समृद्धिमच्छरीरेण इति यावत् *असंस्तुनां* न संस्तुताः परिचिताः, तेषां अपरिचितानां, "संस्तवः 'स्यात्' परिचयः" इत्यमरः । 'अयं वेदव्यास' इत्यजानतां । *चेतःसु* चित्तेषु *आर्द्रं* कोमलं *भावं* वत्सलतां *प्रसह्य* बलात् *समासजन्तं* अवर्त्तयन्तं 'मुनिभावबभाषे' इत्युत्तरेणान्वयः ।

सरलार्थः

सुप्रसन्नमूर्त्या प्रोज्ज्वलदेहश्रिया च अपरिचितानामपि तत्रस्थानां हृदयेषु बलात् वात्सल्यं जनयन्तं मुनिं महाराजो युधिष्ठिरः तात्कालिकीमागमनवार्त्तां पप्रच्छ ।

कौमुदी

'जनातिगेने'ति जनानतिगच्छतीति 'गमे'र्ड-प्रत्ययः । उपपदसमासः । 'समासजन्त'मिति 'सम्'—'आङ्'पूर्वक,-'सन्ज'धातोः 'शतृ'प्रत्यये नकारलोपे 'समासजत्' इति, ततो द्वितीया, 'वपुःप्रकर्षेणे'ति करणे तृतीया । 'प्रसह्ये'त्यव्ययम् । 'चेतःसु' इति अधिकरणे सप्तमी । असंस्तुतानामिति 'सम्' पूर्वस्तु-धातोः कर्मणि 'क्त' प्रत्यये संस्तुताः इति ।

अनुद्धताकारतया विविक्तां,
तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा,
कृतोपसंभाषमिवेक्षितेन ॥३॥

अन्वयः

अनुद्धताकारतया, अन्तःकरणस्य, विविक्तां, वृत्तिं, तन्वन्तं, माधुर्यविश्रम्भविशेषभाजा, इक्षितेन, कृतोपसम्भाषं, इव, मुनिं, आबभाषे ॥

वाच्यान्तरम्

वृत्तिं......तन्वन् कृतोपसम्भाषः मुनिः आबभाषे ॥

व्याख्या

पुनः *अनुद्धताकारतया* न उद्धतः अहङ्कारेणानुद्रिक्तः, शान्त इति यावत्, आकारः आकृतिर्यस्य, तस्य भावस्तया *अन्तःकरणस्य* चित्तस्य, *विविक्तां* पवित्रां, "विविक्तौ पूतविजनौ" इत्यमरः । *वृत्तिं* व्यवहारम् *तन्वन्तम्* प्रका-

शयन्तम्, सौम्याकृतिरेव तस्य पवित्रतां प्रकटयतीत्यर्थः। पुनः *माधुर्यविश्रम्भविशेषभाजा* माधुर्यं मधुरस्वभावः, सौम्यदर्शनं, विश्रम्भः विश्वासः, "समौ विश्रम्भविश्वासौ" इत्यमरः। तयोः विशेषः उत्कर्षः, तं भजतीति तेन *इङ्गितेन* अवलोकनेन *कृतोपसम्भाषं* कृतः उपसम्भाषः आलापनं येन, तं तादृशं इव दृष्टिमात्रेणैव जनान् सान्त्वयन्तमिवेत्यर्थः 'मुनिं आबभाषे' इत्यन्वयः।

सरलार्थः

सौम्येनाकारेणैव चित्तस्य पवित्रं भावं प्रकटयन्तं मनोहरेण विश्वासमुपजनयता अवलोकनेनैव जनैः सह आलपन्तमिव मुनिं वेदव्यासं स राजा आगमनकारणं पप्रच्छ॥ अत्र श्लोके 'इङ्गितेन कृतोपसम्भाषमिवे'त्युत्प्रेक्षालङ्कारः॥

कौमुदी

'माधुर्यञ्च विश्रम्भश्चे'ति द्वन्द्वः, 'तयोर्विशेष' इति षष्ठीतत्पुरुषः समासः 'तं भजती'ति उपपदसमासः 'भजेर्ण्विरि'ति ण्वि प्रत्ययः॥

·※·

'धर्मात्मज' इत्यादि—

धर्मात्मजो धर्मनिबन्धिनीनां,
प्रसूतिमेनःप्रणुदां श्रुतीनाम्।
हेतुं तदभ्यागमने परिप्सुः
सुखोपविष्टं मुनिमाबभाषे ॥४॥

अन्वयः

धर्म्मात्मजः, धर्म्मनिबन्धिनीनां, एन प्रणुदां, श्रुतीनां, प्रसूतिं, सुखोपविष्टं, मुनिं, तदभ्यागमने, हेतु, परीप्सु, आबभाषे ॥

वाच्यान्तरम्

धर्म्मात्मजेन... सुखोपविष्टः मुनिः......परीप्सुना आबभाषे ॥

व्याख्या

धर्मात्मजः राजा युधिष्ठिरः *धर्म्मनिबन्धिनीनां* धर्म्म अग्निहोत्रादिधर्म्मकार्य निबन्धन्ति प्रतिपादयन्तीति धर्म्मनिबन्धिन्यः तासां धर्म्मप्रतिपादिकानां *एनःप्रणुदां* एनांसि पापानि "पापं किल्बिषकल्मषम् कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतम्" इत्यमरः। प्रणुदन्ति नाशयन्ति यास्तासां *श्रुतीनाम्* वेदानाम्, "श्रुतिः स्त्री वेद आम्नाय" इत्यमरः *प्रसूतिं* कारण उत्पत्तिस्थानमिति यावत् *सुखोपविष्टं* सुखेन उपविष्टं निषण्णं *मुनिं* वेदव्यासं *तदभ्यागमने* तस्य वेदव्यासस्य अभ्यागमने उपस्थितौ *हेतुं* कारणं *परीप्सुः* ज्ञातुमिच्छुः सन् *आबभाषे* उक्तवान्।

सरलार्थः

राजा युधिष्ठिरः पापमुक्तये पुण्यलाभाय च वेदादिधर्म्मशास्त्रप्रणेतारं दैवात् समुपस्थितं महर्षिं वेदव्यासं आगमनकारणं पृष्टवान्।

कौमुदी

धरति विश्वं इति धृधातो 'मं' प्रत्ययः। "स्याद्धर्म्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः" इत्यमरः। 'आत्मज' इति आत्मनो जायते इति

जने'ड' प्रत्ययः ॥ 'परीप्सुरि'ति परिपूर्वकस्य आप्नोतीति आप् धातोः सन् तत 'उ' प्रत्ययः ।

*

अथ राजा चतुर्भिः श्लोकैर्मुनिदर्शनलाभमभिनन्दति—अनाप्तेत्यादि ।

अनाप्तपुण्योपचयैर्दुरापा,
फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा,
वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अन्वयः

अनाप्तपुण्योपचयैः, दुरापा, फलस्य, सावित्री, निधूर्तरजाः, एषा, भवद्दर्शनसम्पत्, वीतबलाहकायाः, दिवः, वृष्टेः, तुल्या ॥

वाच्यान्तरम्

दुरापया……सवित्र्या निधूर्तरजसा एतया भवद्दर्शनसम्पदा…… तुल्यया भूयते ।

व्याख्या

***अनाप्तपुण्योपचयैः* न आप्तः न प्राप्तः पुण्यानां उपचयः ृद्धिः यैस्ते पुण्यसञ्चयमकुर्वद्भिरित्यर्थः *दुरापा* दुःखेन आप्यते लभ्यते असौ प्राप्तुमशक्या दुर्लभा इतियावत् *फलस्य* कल्याणस्य *सवित्री* प्रसवित्री जननीत्यर्थः *निर्धूतरजाः* निर्धूतं दूरीकृतं रजः रजोगुणो यया सा विदूरितरजो-**

गुणेत्यर्थः । "रजो रजोगुणो धूलौ परागार्त्तवयोरपी"तिशाश्वतः *एषा* समुपस्थिता वर्तमानेतियावत् *भवद्दर्शनसम्पत्* भवतः दर्शनं साक्षात्कार एव सम्पत् सम्पत्तिः लाभ इतियावत् *वीतबलाहककायाः* वीतः अपगतः बलाहकः मेघः यस्याः सा तस्याः मेघशून्याया इत्यर्थ । "अभ्रं मेघो वारिवाहस्तनयित्नुर्बलाहकः" इत्यमरः । *दिवः* गगनस्य "द्यौदिवौ द्वे स्त्रियावभ्रं व्योम पुष्करमम्बरं नभोऽन्तरिक्षं गगनं" इत्यमरः। *वृष्टेः* वर्षणस्य *तुल्या* समाना, मेघं विना आकाशात् यथा अतर्कितो वारिपातः कस्मैचित् मङ्गलाय सम्पद्यते तथा भवद्दर्शनमपीति भावः ॥

सरलार्थ.

मेघशून्यादाकाशात् सहसा वृष्टिपातेन यथा लोकानां सस्यसम्पल्लाभः सूच्यते तथा अकस्मात् भवद्दर्शनलाभोऽपि मादृशस्य कस्यचित् पुण्यस्य सौभाग्यस्य च लाभो भवेदिति सूचयति ॥

श्लोकेऽस्मिन् 'भवद्दर्शनसम्पत् वृष्टेस्तुल्ये'ति निर्धूतरजस्त्वादिसमानधर्म्मतया साम्यप्रतिपादनात् पूर्णोपमालङ्कारः ॥

कौमुदी

अनाप्तपुण्योपचयैरिति बहुव्रीहिः समासः । तथा निर्धूतरजा इत्यपि बहुव्रीहिःसमासः । 'दूरापेति' दुःखेन आप्यते इति खल्प्रत्ययः । फलस्येति कर्म्मणि षष्ठी । वृष्टेः तुल्या इति तुल्यार्थशब्दयोगे षष्ठी । 'बलाहक' इति वारि वहतीति पृषोदरादित्वात् साधुः ॥

-x-

महर्षिसमागमफलमाह—अद्य क्रियेत्यादि ।

अद्य क्रियाः कामदुघाः क्रतूनां,
सत्याशिषः संप्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जात-
स्त्वय्यागते यद्बहुमानपात्रम् ॥६॥

अन्वयः

अद्य, क्रतूनां, क्रियाः, कामदुघाः, सम्प्रति, भूमिदेवाः, सत्याशिषः, यत्, त्वयि, आगते, (सति) अस्मि, आसंसृतेः, जगत्सु, बहुमानपात्रं, जातः ॥

वाच्यान्तरम्

क्रियाभिः कामदुघाभिः भूयते...भूमिदेवैः सत्याशीर्भिः भूयते मया बहुमानपात्रेण जातम् ॥

व्याख्या

अद्य अस्मिन् दिवसे *क्रतूनां* यज्ञानां "यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः" इत्यमरः ॥ *क्रियाः* अनुष्ठानानि *कामदुघाः* कामान् अभिप्रेतविषयान् दुहन्ति ददतीति अभिप्रायफलदायिन्यः भवन्तीत्यर्थः *सम्प्रति* अधुना *भूमिदेवाः* ब्राह्मणाः "द्विजात्यग्रजन्मभूदेववाडवाः विप्रश्च ब्राह्मणः" इत्यमरः । *सत्याशिषः* सत्या अवश्यफलदायिनी आशीः आशीर्वादवाक् येषां ते, अद्य ब्राह्मणानां आशीर्वादाः फलवन्तो जाता इत्यर्थः । अस्मात् कारणात्

त्वयि भवति *आगते* उपस्थिते सति *अस्मि* अहं *आसंसृतेः* संसारस्थितिकालं यावत् जगत्सु भुवनेषु *बहुमानपात्रं* बहूनां मानानां सम्मानानां पात्रं भाजनं *जातः* अभवम्, भवदागमनं मे जगन्मान्यतां जनयतीतिभावः ॥

सरलार्थः

भवतः शुभागमनात् अद्य मे यज्ञानुष्ठानं सफलं जातं ब्राह्मणानाञ्च आशीर्वादाः सफलाः जाताः अद्याहं जगति आप्रलयं बहुसम्मानभाजनं जातः किमधिकं जगति प्रार्थितं मनुजैः ॥

कौमुदी

'कामदुघा' इति ''दुहः क्यप् घश्च'' इति 'क्यप्'घादेशश्च । 'सम्प्रती'-त्यव्ययं ''एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा'' इत्यमरः । 'सत्याशिष' इति 'बहुव्रीहिः'समासः । 'यदिति हेत्वर्थे अव्ययं 'यत्तद्यतस्ततो हेतौ' इत्यमरः । 'अस्मी'त्यहमर्थेऽव्ययं, ''अस्मि इत्यस्मदर्थानुवादेऽहमर्थेऽपी''-तिगणव्याख्याने ''दासेकृतागसि... सुन्दरी नास्मि दूये इति प्रयोगाच्च । 'आसंसृतं' इति अभिविधावाङ्इतिविकल्पादसमासः आङ्योगेपञ्चमी ।

-x-

अथापरफलमाह—श्रियमित्यादि ।

श्रियं विकर्षत्यपहन्त्यघानि,
श्रेयः परिस्तौति तनोति कीर्तिम् ।
सन्दर्शनं लोकगुरोरमोघं,
तवात्मयोनेरिव किं न धत्ते ॥७॥

अन्वयः

आत्मयोनेः, इव, लोकगुरोः, तव, अमोघं, सन्दर्शनं, श्रियं, विकर्षति, अघानि, अपहन्ति, श्रेयः परिस्तौति, कीर्त्तिं, तनोति, किं, न, धत्ते ॥

वाच्यान्तरम्

...अमोघेन...सन्दर्शनेन श्रीः विकृष्यते । अघानि अपहन्यन्ते । श्रेयः परिस्तूयते । कीर्त्तिः तन्यते । किं न धीयते ॥

व्याख्या

आत्मयोनेः आत्मा एव योनिः कारणं यस्य तस्य ब्रह्मणः *इव *लोकगुरोः* लोकानां जगतां गुरोः पूज्यस्य *तव* भवतः *अमोघं* अव्यर्थं सफलमित्यर्थः *सन्दर्शनं* साक्षात्कारः *श्रियं* सम्पदं *विकर्षति* विशेषेण आकर्षति जनयतीत्यर्थः *अघानि* दुरदृष्टानि दुःखानीति यावत् "अंहो दुःखव्यसनेष्वघमि"त्यमरः । *अपहन्ति* नाशयति *श्रेयः* कल्याणं *परिस्तौति* ददाति *कीर्त्ति* यशः *तनोति* विस्तारयति । किं बहुना * किं न धत्ते * किं न करोति, भवद्दर्शनं सर्वं अभीष्टं सम्पा- दयत्येवेत्यर्थः ॥

सरलार्थः

भवतो दर्शनं लक्ष्मीं तनोति, पापं दूरीकरोति, मङ्गलं जनयति, यशश्च वितनोति । किं बहुना कदाचिदपि प्राप्तभवत्साक्षात्कारस्य न किञ्चित् दुर्लभं स्यादिति । अत्रात्मयोनेरिव तव सन्दर्शनमिति

द्वयोः श्रियं विकर्षन्तीत्यादिधर्म्मेण साम्यप्रतिपादनात् पूर्णोपमालङ्कारः ॥

कौमुदी

प्रशस्यशब्दादीयसुनि आदेशे श्रेय इति मङ्गलार्थे क्लीवत्वमभिधानात् । तवेति सन्दर्शनस्य कर्म्मणि षष्ठी तत्सम्बन्धविवक्षया वा ॥

-x-

पुनरपि संदर्शनफलमेव विवृणोति—श्च्योतन्मयूखेत्यादि ।

श्च्योतन्मयूखेऽपि हिमद्युतौ मे,
न निर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेदं,
त्वत्सन्निधावुच्छ्वसतीव चेतः ॥८॥

अन्वयः

श्च्योतन्मयूखे, हिमद्युतौ, अपि, न, निर्वृतं, मे, चक्षुः, त्वत्सन्निधौ, निर्वृतिं, एति, चेतः, समुज्झितज्ञातिवियोगखेदं (सत्) उच्छ्वसति, इव ।

वाच्यान्तरम्

...निर्वृतेन चक्षुषा न निर्वृतिः ईयते । चेतसा समुज्झितज्ञातिवियोगखेदेन उच्छ्वस्यते ।

व्याख्या

हे भगवन् *श्च्योतन्मयूखे* श्च्योतन्तः अमृतं क्षरन्तः

मयूखाः किरणाः यस्य तस्मिन् इति बहुब्रीहिः समासः, ज्योत्स्नामृतवर्षिणीत्यर्थः । "किरणोस्रमयूखांशुगभस्तिघृणिधृष्णयः" इत्यमरः। *हिमद्युतौ* हिमा शीतला द्युतिः कान्तिर्यस्य तस्मिन् हिमकान्तौ शशधरे अपि विषये *न निर्वृतं* न सुस्थ न तृप्तमित्यर्थः *मे* मम *चक्षुः* नेत्रं *त्वत्सन्निधौ* तव समीपे *निर्वृतिं* सुस्थतां *एति* प्राप्नोति। तथा *चेतः* *समज्झितज्ञातिवियोगखेदं* समुज्झितः त्यक्तः ज्ञातीनां दायादानां वियोगस्य विरहस्य खेदः दुःखं येन तत् इति बहुब्रीहिः समासः, भवद्दर्शनादेव बान्धवानां विरहजनितानि दुःखानि अपगतानीत्यर्थः। *उच्छ्वसतीव* अनुरोधेन प्राणितीव।

सरलार्थः

सुधाधारं जगदाह्लादकरं शशधरं वीक्ष्यापि तथा न मे प्रीतिः यथा भवन्तं दृष्ट्वा ज्ञातिजनवियोगदुःखदुःखितमपि मे चित्तमिदानीमपगतदुःखं जीवतीव उच्छ्वसतीवेति चेतसः उच्छ्वसनसम्भावनाकथनात् उत्प्रेक्षालङ्कारः। प्रथमार्द्धे तु चक्षुषो निर्वृतिकारणे चन्द्रे सत्यपि अनिर्वृतिकथनात् विशेषोक्तिरलङ्कारः तल्लक्षणं-'सति हेतौ फलाऽभावो विशेषोक्तिस्तथा द्विधा' इतिद्वयोर्मिथोऽनपेक्षयावस्थानात् संसृष्टिः।

कौमुदी

उच्छ्वसतीति 'श्वस्' धातोरदादित्वेऽपि गणकृतानित्यत्वात् क्वचिद् भ्वादित्वमपि तथा च "न विश्वसेदविश्वस्तं" इति तथा "आश्वसेयुर्निशाचराः" इत्यादयः प्रयोगाः लिपिकरप्रमादो वा तेन "उच्छ्वसितीव"

इति वा पाठः। यद्वा उच्छ्वसितीति इति पचाद्यचि उच्छ्वसः स इवाचरति इति पुनर्धातुत्वे उच्छ्वसतीति सिध्यति

-x-

एवं मुनेरागमनमभिनन्द्य तेन मुनिना सह वाक्यालापं प्रस्तौति—निरास्पदमित्यादि।

निरास्पदं प्रश्नकुतूहलित्व-,
मस्मास्वधीनं किमु निःस्पृहाणाम्।
तथापि कल्याणकरीं गिरं ते,
मां श्रोतुमिच्छा मुखरीकरोति ॥९॥

अन्वयः

प्रश्नकुतूहलित्वं, निरास्पदं, निस्पृहाणाम्, अस्मासु, अधीनं, किम् उ, तथापि, कल्याणकरीं, गिरं, श्रोतुम्, इच्छा, मां, मुखरीकरोति,

वाच्यान्तरम्

प्रश्नकुतूहलित्वेन निरास्पदेन भूयते.. अधीनेन केन भूयते...... इच्छया अहं मुखरीक्रिये॥

व्याख्या

***प्रश्नकुतूहलित्वं* कुतूहलं उत्कण्ठा अस्ति इति कुतुहली, तस्य भावः कुतूहलित्वं प्रश्नस्याऽऽगमनकारणजिज्ञासायाः, कुतूहलित्वं "कौतूहलम् कौतुकं च कुतुकं च कुतूहलमि"त्यमरः कथमत्र भवता समागनमिति प्रश्नकरणकौतुकमित्यर्थः *निरास्पदं* निः नास्ति आस्पदं हेतुर्यस्य तत् इति बहुव्रीहिः अहेतुक-**

मित्यर्थः, प्रश्नस्याहेतुकत्वे हेतुमाह *निस्पृहाणां* निः नास्ति स्पृहा आकाङ्क्षा येषां तेषामिति बहुव्रीहिः अनासक्तानामित्यर्थः। *अस्मासु* मादृशेषु भोगप्रवणेषु इति भावः *अधीनम्* आयत्तं *किम् उ* किमस्ति भोः अनासक्तानां तपस्विनां आसक्तेभ्यो मादृशेभ्यो न किञ्चित्प्रार्थितमस्तीत्यर्थः *तथापि* एवं सत्यपि प्रश्नस्यावसराभावेऽपीत्यर्थः। *कल्याणकरी* मङ्गलजननीं *ते* तव *गिरं* वाचं *श्रोतुं* आकर्णयितुं *इच्छा* प्रवृत्तिः *मां मुखरीकरोति* मां वाचालं करोति प्रश्नकर्मणि नियोजयतीत्यर्थः। भवद्वाक्यं कदापि न निष्फलं भवेदतः सर्वथा तत श्रोतव्यमितिभावः।

सरलार्थः

भवादृशानां विषयपराङ्मुखानां महात्मनां मादृशानां विषयिणां समीपे न किञ्चिदपि प्रयोजनमस्ति अत आगमनकारणप्रश्नेनाप्यलम् तथापि निजकल्याणकरीं भवतो वाणीं श्रोतुमिच्छा तु स्वाभाविकी अतो मया पृच्छ्यते।

कौमुदी

'आस्पद'मिति आस्पदं प्रतिष्ठायामिति निपातनात् साधु। अस्मास्विति आधारत्वविवक्षायां सप्तमी। 'कल्याणकरी'मिति "कृञो हेतु" इति 'ट'प्रत्यये ङीप्। इच्छेति 'इष्'धातो'रङ्'प्रत्ययः।

-x-

राज्ञः सप्रश्रयं वचनमाकर्ण्य मुनिस्तस्य राज्ञः कल्याणायैव कथामवतारयति—इत्युक्तवानित्यादि॥

इत्युक्तवानुक्तिविशेषरम्यं,
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां,
द्वैपायनेनाभिदधे नरेन्द्रः ॥१०॥

अन्वयः

इति, उक्तिविशेषरम्यं, उक्तवान्, उदारचेताः, नरेन्द्रः, द्वैपायनेन जयोपपत्तौ, मनः, समाधाय, इति, उदारां, गिरं, अभिदधे ॥

वाच्यान्तरम्

... ...उक्तवन्तं उदारचेतसं नरेन्द्रं द्वैपायनः...अभिदधौ ।

व्याख्या

इति इत्थम् उक्तरूपं अनाप्तपुण्योपचयैरित्यादि मुखरीकरोतीत्यन्तं वचनजातमित्यर्थः *उक्तिविशेषरम्यम्* उक्तीनां वाक्यानां विशेषेण वैचित्र्येण रम्यं मनोहरम् वाग्वैचित्र्यपूर्णं यथा स्यात्तथा *उक्तवान्* कथितवान् *उदारचेताः* उदारं प्रशस्तं चेतः चित्तं यस्य स इतिबहुव्रीहिः, महामना इत्यर्थः *नरेन्द्रः* नरेषु इन्द्रः श्रेष्ठः नरपतिः राजा युधिष्ठिरः *द्वैपायनेन* द्वीप अयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः, द्वीपायन एवेति द्वैपायनः, वेदव्यासः, तेन पुरा किल पराशरो नाम मुनिः दासराजकन्यां सत्यवतीं चकमे यमुनाया द्वीपे च तस्यामात्मजमजनयत् एवं द्वीपे जातत्वात्तस्येयमाख्या *जयोपपत्तौ* जयस्य उपपत्तिर्लाभः तस्यां राज्ञो

जयलाभाय *मनः* चित्तं *समाधाय* स्थिरीकृत्य *इति* वक्ष्यमाणां *उदारां* अर्थयुक्तां *गिरं* वाचम् *अभिदधे* कथितः ॥

सरलार्थ

भगवान् द्वैपायनो येन राज्ञो जयलाभो भवेत् तन्मनसा स्थिरीकृत्य एवमुक्तवन्तं राजानं तत्कल्याणसाधनानुरूपं वचनमुवाच ॥

कौमुदी

इतीति प्रक्रान्तपरामर्शि इदं समानार्थकमव्ययम् । द्वैपायन इति द्वीपायनशब्दात् ''प्रज्ञादिभ्यश्च' तिस्वार्थे अण्' प्रत्ययः । नरेन्द्र इति नरेषु इन्द्रः इति सप्तमीतत्पुरुषः 'न निर्धारणे'त्यादिना षष्ठीसमासप्रतिषेधात् ।

-x-

अथ मुनिरात्मन औदासीन्येऽपि युधिष्ठिरपक्षपातदोषं परिहरति युग्मेन—चिचीषतामित्यादि ।

चिचीषतां जन्मवतामलघ्वीं,
यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा,
वृत्तिर्विशेषेण तपोधनानाम् ॥११॥

अन्वय

अलघ्वीं, यशोवतंसां, उभयत्रभूतिं, चिचीषतां, जन्मवतां, बन्धुषु, तुल्यरूपा, वृत्तिः, अभ्यर्हिता, तपोधनानां तु विशेषेण ।

वाच्यान्तर

तुल्यरूपया वृत्त्या अभ्यर्हितया भूयते ।

व्याख्या

अलब्धीं प्रभूतां *यशोवतंसां* यशः कीर्त्तिरेव अवतंसः शिरोभूषणं यस्याः तां "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे"इत्यमरः। *उभयत्र* अस्मिन् परस्मिंश्च जन्मनि *भूति* मङ्गलं *चिचीषतां* संग्रहितुमिच्छतां *जन्मवतां* जन्म उत्पत्तिर्विद्यते येषां तेषां जन्मधारिणां देहिनामित्यर्थः *बन्धुषु* स्वजनादिष्वात्मीयवर्गेषु *तुल्यरूपा* तुल्यं रूपं यस्याः सा एकरूपा *वृत्तिः* व्यवहारः *अभ्यर्हिता* उचिता अर्हतियावत्। *तपोधनानां* तपः तपस्या एव धनं येषां मादृशानां तु *विशेषेण* नियमेन अभ्यर्हिता मादृशैस्तु समदर्शित्वं सर्वथा रक्षणीयमिति भावः।

सरलार्थः

ऐहिकं पारत्रिकञ्च मङ्गलं प्राप्तुमिच्छूनां बन्धुजनेषु तुल्यव्यवहार एव सर्वथा उपयुज्यते साधारणानां मादृशानां तपस्विनान्तु विशेषेण समदर्शित्वं रक्षणीयम् ॥

कौमुदी

अलब्धीमिति "वोतोगुणवचनादि"तिङीप् विशेषेणेत्यत्र "प्रकृत्यादिभ्यश्चोपसंख्यान"मिति तृतीया।

-x-

एवं तुल्यत्वेपि त्वयि मम पक्षपातः कुतो युज्यते इत्याह— तथापीत्यादि।

तथापि निघ्नं नृप तावकीनैः,
प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां,
भवन्ति भव्येषु हि पक्षपाताः ॥१२॥

अन्वयः

तथापि, हे, नृप, तावकीनैः, गुणौघैः, प्रह्वीकृतं मे, हृदयं निघ्नम्, वीतस्पृहाणाम्, मुक्तिभाजां, अपि, हि, भव्येषु, पक्षपाताः, भवन्ति ।

वाच्यान्तरम्

प्रह्वीकृतेन हृदयेन निघ्नेन भूयते, पक्षपातैः भूयते ।

व्याख्या

तथापि मादृशानां सर्वेषु समदृष्टेः औचित्येऽपि *हे नृप* हे महाराज *तावकीनैः* तव इमे तावकीना: भवत्सम्बन्धिनः तैः भवदीयैरित्यर्थः *गुणौघैः* गुणानां दयादाक्षिण्याद्यशेषराजगुणानां ओघाः समूहाः तैः *प्रह्वीकृतं* आकृष्टं *मे* मम *हृदयं* चित्तं *निघ्नं* आधीनं भवति । "अधिनो निघ्न आयत्त"इत्यमरः। कामनाशून्यानां प्रयोजनाभावात् कुतः पक्षपात इत्याह *वीतस्पृहाणां* वीता अपगता स्पृहा आकाङ्क्षा येषां ते तेषां वासनाविरहितानामित्यर्थः, *मुक्तिभाजां* मुक्तिं भजन्ते इतिमुक्तिभाजः मुमुक्षवः तेषां मुक्तिकामिनां *भव्येषु* भवन्तीतिभव्याः साधवः तेषु सज्जनेषु *पक्षपाताः*

स्नेहविशेषाः भवन्ति । सज्जनेषु महानुभावानां यस्तावदनुग्रहः न स माध्यस्थभङ्गदोषमावहतीति भावः ।

सरलार्थः

यद्यपि मादृशस्य निष्कामस्य चित्तं कौरवपाण्डवेषु तुल्यमेव भवितुं युज्यते । तथापि त्वदीयैर्गुणैराकृष्टं मे चेतः त्वदायत्तं भवति । न खलु ममैकस्य अयं स्वभावः, नवायं दोषः यतः निष्कामा अपि मुमुक्षवः साधूनां गुणेषु पक्षपातिनो भवन्ति ।

कौमुदी

तावकीनैरिति " युष्मदस्मदोरन्यतरस्यां खञ्च "तिखप्रत्ययः "तवकममकावेकवचने" इति तवकादेशः । मुक्तिभाजामिति मुक्तिं भजन्ते इति'ण्वि'प्रत्ययः' उपपदसमासः । 'भव्येषु इत्यत्र "भव्यगेय" इत्यादिना कर्तरि निपातः । वीतस्पृहाणामिति बहुव्रीहिः समासः ।

-x-

धृतराष्ट्रस्य दुराचारत्वं युधिष्ठिरस्य च गुणवत्त्वं दर्शयन्नाह-सुता इत्यादि ॥

सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान्वः स वृथा बलाद्वा
मोहं विधत्ते विषयाभिलाषः ॥१३॥

अन्वयः

यूयं, तस्य, राज्ञः, सुताः, न, किमु, गुणैः, सुयोधनं, न, अतीताः,

वा, यः, वः, वृथा, त्यक्तवान्, सः, विषयाभिलाषः, बलाद्वा, मोहं, विधत्ते ॥

वाच्यान्तरम्

युष्माभिः... सुतैः न भूयते । सुयोधनः युष्माभिः न अतीतः । येन यूयं त्यक्ताः तन विषयाभिलाषेण मोहः विधीयते ॥

व्याख्या

यूयं पाण्डुपुत्राः *तस्य राज्ञः* धृतराष्ट्रस्य *सुताः* पुत्राः *न किमु* अपि तु पुत्रा एव भ्रातृपुत्रेण पुत्रता इति-शास्त्रात् । *गुणैः* दयादाक्षिण्यादिभिः *सुयोधनं* दुर्योधनं *न अतीताः वा* न अतिक्रान्ताः किमु अपि तु अतिक्रान्ता एव । पुत्रभिन्नत्वं निर्गुणत्वञ्च युष्मासु नास्ति अतस्तस्य युष्मत्परित्यागे हेतुरेव नास्तीति भावः। उपालम्भे कारणमाह *यः* धृतराष्ट्रः *वः* युष्मान् *वृथा* अयथा अकारण-मिति यावत् *त्यक्तवान्* परिहृतवान् वयं यदि पुत्राः कौरवे-भ्यः अधिकगुणशालिनश्च तर्हि कथं त्यक्तवान् इत्याह बलादिति *सः* तादृशः *विषयाभिलाषः* विषयेषु भोग्यवस्तुसु अभि-लाषः आसक्तिः *बलात् वा* आत्मशक्त्या इव *मोहं* अज्ञानतां कर्त्तव्याकर्त्तव्यविमूढ़तां *विधत्ते* जनयति। विषयवासनां विना नान्यत् किञ्चिदस्ति यत् सः भवतः परितत्याज्य इत्यर्थः ॥

सरलार्थः

भ्रातृ पुत्रत्वेन यूयं धृतराष्ट्रस्य पुत्रा एव सुयोधनादप्यधिकगुणा-

शालिनो यूयं तथापि विषयाकृष्टेन तेन यूयं त्यक्ताः नान्यत् कारणं किञ्चिदस्ति, अत्र स विषयाभिलाषी बलादिव मोहं विधत्ते इति कारणेन पूर्ववाक्यार्थरूपकार्यस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः ॥

कौमुदी

'बलादिति' ''ल्यबलोपे कर्म्मण्यधिकरणे चे' ति 'ल्यबलोपे' पञ्चमी, बलमाश्रित्येत्यर्थः। विषयेषु अभिलाषः इति सप्तमीतत्पुरुषसमासः ।

-x-

अथ धृतराष्ट्रस्य दुर्णयवशादेव पतनं भवेदिति प्रदर्श्य राज्ञ उत्साहं वर्धयति–जहात्वित्यादि—

जहातु नैनं कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि ॥१४॥

अन्वयः

एनं, अर्थसिद्धिः, कथं, न, जहातु, यः, संशय्य, कर्णादिषु, तिष्ठते, हि, असाधुयोगाः, जयान्तरायाः, प्रमाथिनीनां, विपदां, पदानि ॥

वाच्यान्तरम्

अयं अर्थसिद्धया कथं न हीयताम् येन.. स्थीयते असाधुयोगैः जयान्तरायैः......पदैः भूयते ।

व्याख्या

एनं धृतराष्ट्रं *अर्थसिद्धिः* कार्यसिद्धिः *कथं* केन

हेतुना *न जहातु* न परित्यजतु अपि तु अवश्यमेव त्यजेदित्यर्थः । *यः* धृतराष्ट्रः *संशय्य* संशयं प्राप्य *कर्णादिषु तिष्ठते* कर्णशकुन्यादीन् दुष्टामात्यान् निश्चयकरणायाऽऽश्रयति धृतराष्ट्रो हि सन्धिविग्रहादिकार्यसंशये समुपस्थिते दुष्टामात्यानां मतं सेवते ततस्तस्य कार्यसिद्धिः कदापि न भवेदिति भावः । तथाहि *असाधुयोगाः* असाधूनां असतां दुर्जनानामिति यावत्, योगाः संसर्गाः *जयान्तरायाः* जयस्य अन्तरायाः व्याघातकाः विघ्नभूता इत्यर्थः "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः । किञ्च *प्रमाथिनीनां* उन्मूलनशीलानां *विपदां* आपदां *पदानि* स्थानानि भवन्ति "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इत्यमरः ।

सरलार्थः

कर्णादीनामसाधुप्रकृतीनां मन्त्रिणां मतेन कार्यकारिणः सपुत्रस्य राज्ञो धृतराष्ट्रस्य कार्यसिद्धिः कदाचिदपि न भविष्यति यतोऽसाधुसंसर्गो विघ्नान् विपदश्च जनयति ।

कौमुदी

'एनमि'ति "द्वितीयाटौस्स्वेनः" इति इदमोऽन्वादेशे द्वितीयायामेनादेशः । 'तिष्ठते'इति "प्रकाशनस्थेयाख्ययोश्चे"ति स्थेयाख्यायामात्मनेपदम् ।

-*-

दुर्योधनस्यावश्यम्भाविनीं विपदं कथयित्वा युधिष्ठिरस्य कार्यसिद्धिं प्रकटयति–पथश्च्युतायामित्यादि ।

पथश्च्युतायां समितौ रिपूणां
धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्य-
माविष्कृतं प्रेम परं गुणेषु ॥१५॥

अन्वयः

(रिपूणां, समितौ, पथः, च्युतायां, सत्यां) चिराय, धर्म्यां, धुरं, दधानेन, त्वया, विपत्सु, अपि, अविपत्तिरम्यं, गुणेषु, परं, प्रेम, आविष्कृतम् ॥

वाच्यान्तरम्

दधानः त्वं......आविष्कृतवान् ॥

व्याख्या

रिपूणां शत्रूणां *समितौ* संसदि सभायामिति यावत् "सभासमितिसंसदः" इत्यमरः *पथः* सन्मार्गात् *च्युतायां* भ्रष्टायां धर्ममुल्लङ्घ्य प्रवृत्तायां राजसभायां दुरात्मना दुःशासनेन द्रौपद्याः वस्त्राकर्षणरूपामवमानन्नामनुमोदयन्त्यामित्यर्थः *चिराय* सुदीर्घकालं यावत् *धर्म्यां* धर्मादनपेतामभ्रष्टां *धुरं* भारं *दधानेन* धारयता *त्वया* भवता *विपत्सु* आपत्सु अपि *अविपत्तिरम्यं* नास्ति विपत्तिर्यस्मिन्निति बहुव्रीहिः तत् निर्विघ्नरहितमतएव रम्यं सुन्दरं *गुणेषु* शान्त्यादिषु *परं* उत्तमं *प्रेम* अनुरागः *आविष्कृतं* प्रकटीकृतम् । शत्रूणामवमाननां तूष्णीं सहमानैर्भवद्भिः शान्त्या-

दिगुणपक्षपातो विशेषेण दर्शित इत्यर्थः ॥

सरलार्थः

शत्रुभिरधर्ममाश्रित्य त्वयि दुर्व्यवहारः कृतस्तथापि त्वया-जीवनं धर्म्म एव सेव्यते राजसभायां यदा दुःशासनेन द्रौपद्या वस्त्राकर्षणादिकविमानना कृता तदा भवता क्रोधात् न किमपि कृतं। एवं भवता तादृशीषु विपत्सु अपि शमादिगुणपक्षपातो विशेषेण दर्शित इति साधु कृतम्।

कौमुदी

'धर्म्यां'मिति--धर्मादनपेतामित्यर्थे "धर्मपथ्यर्थन्यायादनपेते" इति 'यत्' प्रत्ययः। 'विपत्सु' इति -विषये सप्तमी। 'दधानेने'ति 'धा'धातोः 'शानच्'। 'चिराये'त्यव्ययम् ॥

-x-

धार्मिकस्य ते शत्रुणा कृतोऽपकार उपकारायैव भवतीत्यत आह—विधायेत्यादि ॥

विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥१६॥

अन्वयः

शमैकवृत्तेः, भवतः, छलेन, अनात्मनीनं, विध्वंसं, विधाय, प्रकाशितत्वन्मतिशीलसाराः ते, विद्विषः, कृतोपकाराः, इव ॥

वाच्यान्तरम्

प्रकाशितत्वन्मतिशीलसारैः तैः विद्विड्भिः कृतोपकारैः भूयते ॥

व्याख्या

शमैकवृत्तेः शमः शान्तिः एका अद्वितीया सर्वोपायेषु प्रधाना वृत्तिः उपायो यस्य तस्य "एके मुख्यान्यकेवलाः" इत्यमरः। शान्तिमाश्रयत इत्यर्थः *भवतः* तव *छलेन* व्याजेन कपटेनेति यावत् *अनात्मनीनं* आत्मने हितं आत्मनीनं, न आत्मनीनं अनात्मनीनं आत्मनोऽहितकरमित्यर्थः *विध्वरं* अनिष्टं *विधाय* कृत्वा *प्रकाशितत्वन्मतिशीलसाराः* मतिः बुद्धिः शीलं चरित्रञ्च इति द्वन्द्वे मतिशीले तयोः सारः उत्कर्षः तव मतिशीलसारः प्रकाशितः प्रकटीकृतो यैस्ते *ते* दुर्योधनादयः *विद्विषः* शत्रवः *कृतोपकारा इव* कृतः विहितः उपकारः यैस्ते इति बहुव्रीहिः समासः तव अपकारं कुर्वन्तोऽपि उपकारं कृतवन्त एवेत्यर्थः ॥

सरलार्थः

समवृत्तिपरायणस्य तितिक्षया शत्रूणामपकारान् शान्तिमाश्रित्योपेक्षमाणस्य भवतः कपटेन अनिष्टं विधाय वैरिणस्ते अपकारं कृत्वा सर्वेषां निन्दनीया भवन्ति एवं कृत्वा भवतो बुद्धेः स्वभावस्य च उत्कर्षं साधयन्ति स्वस्य चापकारमेव विदधति। अत्र विद्विषः कृतोपकारा इवेत्युत्प्रेक्षणादुत्प्रेक्षालङ्कारः ॥

कौमुदी

'छलेने'तिकरणे तृतीया। 'अनात्मनीन'मिति—"आत्मविश्वजन-

भोगोत्तरपदात् 'ख' इत्यनेन ख'प्रत्ययः ॥

-x-

विक्रमस्य प्रयोजनान्तरमाह—लभ्या इत्यादि ।

लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः ॥१७॥

अन्वयः

तव, धरित्री, विक्रमेण, लभ्या, विपक्षश्च, वीर्यास्त्रबलैः, ज्यायान्, अतः, प्रकर्षाय, विधिः, विधेयः, जयश्रीः, हि, रणे, प्रकर्षतन्त्रा ॥

वाच्यान्तरम्

त्वं धरित्रीं विक्रमेण लभेथाः, विपक्षेण ज्यायसा भूयते ।...विधिं विदधीथाः, जयश्रिया प्रकर्षतन्त्रया भूयते ॥

व्याख्या

तव त्वयेत्यर्थः *धरित्री* क्षितिः "धरा धरित्री धरणिः क्षौणी ज्या काश्यपी क्षिति"रित्यमरः । *विक्रमेण* पराक्रमेण *लभ्या* प्राप्या किन्तु पराक्रमं विना न सुलभ्या इत्यर्थः । *विपक्षश्च* रिपुरपि *वीर्य्यास्त्रबलैः* वीर्यं पराक्रमः अस्त्राणि आग्नेयादीनि बलानि सैन्यानि च तैरिति द्वन्द्वः समासः । *ज्यायान्* प्रशस्यतरः अधिकतरबलवानित्यर्थः । *अतः* अस्मात् कारणात् *प्रकर्षाय* शत्रुभ्य आत्मनः उत्कर्षाय *विधिः*

उपायः *विधेयः* कर्त्तव्यः अवलम्बनीय इत्यर्थः । *हि* यतः *रणे* युद्धे *जयश्रीः* विजयलक्ष्मीः *प्रकर्षतन्त्रा* उत्तमाश्रया प्रधानायत्ता इति यावत् "तन्त्रं प्रधाने सिद्धान्ते" इत्यमरः । बलिभिरेव जेतुं शक्यते न तु दुर्बलैरिति भावः ॥

सरलार्थः

विक्रमहीनो राज्यं लब्धुं नार्हिष्यति दुर्योधनः विक्रमादिभिस्त्वत्तो बलीयान् । भवतापि तस्मात् प्रकर्षलाभाय यतितव्यम् जयश्रीरुत्तमेन लभ्या भवेत् । अत्रातो हि इति हेतुबोधकपदद्वयप्रयोगेण वैचित्र्याभावान्नार्थान्तरन्यासोऽलङ्कारः ॥

कौमुदी

'तव' इति 'लभ्येति' कृत्प्रत्यययोगे "कृत्यानां कर्त्तरि वा" इत्यनेन कर्त्तरि षष्ठी पक्षे 'त्वये' ति । 'ज्यायानि'ति प्रशस्यशब्दस्य "ज्या च"'ति-'ज्यादेशे' ज्यादादीयसः" इत्यनेन अकारादेशः । वीर्यास्त्रबलैरिति करणे तृतीया । 'प्रकर्षाय' इत्यत्र तादर्थ्ये चतुर्थी ॥

-※-

श्लोकचतुष्टयेन शत्रोर्बलादिभिः प्राधान्यं विशेषेण निरूपयति—त्रिःसप्तकृत्व-इत्यादि ।

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम् ॥१८

अन्वयः

त्रिःसप्तकृत्वः, जगतीपतीनां, हन्ता, गुरुः, सः, जामदग्न्यः, यस्य, वीर्यविधूतः, तदा, गुणानां, प्रकर्षं, आधारवशं, विवेद, स्म ॥

वाच्यान्तरम्

हन्त्रा गुरुणा तेन जामदग्न्येन...वीर्यविधूतेन...प्रकर्षः आधारवशः विविदे ।

व्याख्या

***त्रिःसप्तकृत्वः* त्रिरावृत्तान् सप्तवारान् त्रिःसप्तशब्दयोः 'सुप्सुपे'तिसमासः"संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" प्रत्ययः। एकविंशतिवारानित्यर्थः। *जगतीपतीनां* जगत्याः पृथिव्याः पतयः स्वामिनः इति यावत् क्षत्रियाणां राज्ञां *हन्ता* विनाशकः *गुरुः* अस्त्रवेदोपदेष्टा *सः* विश्वविश्रुत इत्यर्थः *जामदग्न्यः* जमदग्नेः तन्नाम्ना प्रसिद्धस्य महर्षेः अपत्यं पुमान् परशुरामः *यस्य* भीष्मस्य *वीर्यविधूतः* वीर्येण विक्रमेण अवधूतः अभिभूतः अम्बिकास्वयम्वरे इत्यर्थः। *तदा* तस्मिन् अम्बिकास्वयम्वरयुद्धभङ्गकाले *गुणानां* वीर्यादीनां *प्रकर्षं* आतिशय्यं *आधारवशं* आश्रयाधीनं *विवेद स्म* जानाति स्म निजविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रकर्षाधानदर्शनादिति भावः ॥**

पुरा किल स्वयम्वरे काशीराजकन्यात्रयं भीष्मो भ्रातृविवाहाय राक्षसधर्मेणाजहार। तत्र 'अम्बा'नाम कन्यका मनसा शाल्वं वरयामासेति तन्मुखादेव श्रुत्वा अन्यपूर्वेति तां तत्याज भीष्मः। शाल्वरा-

जोऽपि भीष्मेण राक्षसधर्मेण सा गृहीतेति तां प्रत्याख्यातवान्। अथ सा जामदग्न्यं शरणं गता, तदर्थे जामदग्न्येनाऽनुरुद्धोऽपि भीष्मस्तां प्रत्याख्यातवान्। तन्निमित्तं च तयोर्युद्धं बभूव तस्मिन् युद्धे भीष्मेण पराजितो जामदग्न्यः इति पौराणिकी कथात्रानुसन्धेया ॥

सरलार्थः

सः परशुरामः पृथिवीं एकविंशतिवारान् निःक्षत्रियामकरोत् सः जामदग्न्योऽपि काशीराजकन्यास्वयम्वरे अम्बानिमित्तं भीष्मेण संग्रामे विनिर्धूतो बभूव। तस्मिन्नेव युद्धे स्वशिष्ये स्वविद्यायाः उत्कर्षमवलोक्य स ज्ञातवान् यद्—"वस्तूनां गुणसमृद्धिः पात्रवशादेवोपचीयतेऽपचीयते वे"ति ॥

कौमुदी

'जगतीपतीना'मिति कर्मणि षष्ठी, जामदग्न्य इति जमदग्नेरपत्यं पुमानित्यर्थे गर्गादिभ्यो यञ् इति 'यञ'प्रत्ययः। अत्र स्मेतिपादपूरणे "स्म पादपूरणे भूतेऽर्थे चेति"विश्वः ॥

-x-

भीष्मस्य बलं विक्रमञ्च विवृणोति—यस्मिन्नित्यादि।

यस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि।
धुन्वन्धनुः कस्य रणे न कुर्यान्
मनो भयैकप्रवणं स भीष्मः ॥१९॥

अन्वयः

यस्मिन्, अनैश्वर्यकृतव्यलीकः, अन्तकः, अपि, पराभवं, प्राप्तः, इव, सः, भीष्मः, रणे, धनुः, धुन्वन, कस्य, मनः, भयैकप्रवणं, न, कुर्यात् ॥

वाच्यान्तरम्

अनैश्वर्यकृतव्यलीकेन अन्तकेन पराभवः प्राप्तः तेन भीष्मेण धनुः धुन्वता......क्रियेत ॥

व्याख्या

यस्मिन् भीष्मविषये *अनैश्वर्यकृतव्यलीकः* न ईश्वरः न प्रभुः अनीश्वरः तस्य भावः अनैश्वर्यं असामर्थ्यं कृतान्त एव सर्वेषां मारणे प्रभुस्तत्र अशक्त्या तदभाव इत्यर्थः। तेन कृतं व्यलीकं लज्जा यस्य स इति बहुव्रीहिसमासः। भीष्मस्य इच्छा मृत्युतया कृतान्तोऽपि तत्रासामर्थ्याल्लज्जित इत्यर्थः 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वऽपि पीडने' इत्यमरः। "दुःखे वैलक्ष्ये व्यलीकमिति" यादवः। *अन्तकः* यमोऽपि "कृतान्तो यमुनाभ्राता शमनो यमराडयम" इत्यमरः। *पराभवं* पराजयं *प्राप्त इव* पराभूत इव। स्वप्रभावेण किमपि कर्त्तुं नार्हतीव इति भावः *सः* इच्छामृत्युः *भीष्मः* *रणे* संग्रामे *धनुः* कार्म्मुकं *धुन्वन्* कम्पयन् *कस्य* जनस्य *मनः* चित्तं *भयैकप्रवणं* भयेषु भीतिषु एकप्रवणं एकोन्मुखं भयविह्वलं *न कुर्यात्* सर्वेषामपि मनसि भयमुत्पादयेदेव ॥

सरलार्थः

भीष्मस्य इच्छामृत्युतया कृतान्तोऽपि तदन्तिके अशक्त्या लज्जित

इव । तस्मिन् भीष्मे दुर्योधनपक्षावलम्बनं कुर्वति रणे कस्य मनसि भयं न भवति । अत्र पराभवं प्राप्त इव इत्युत्प्रेक्षालङ्कारः ॥

कौमुदी

''नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्'' इति विकल्पान्नञः पूर्ववदवृद्ध्यभावः । भयैकप्रवणमित्यत्र शिवभागवतवत् समासः । भीष्म इतिबिभेत्यस्मादि यर्थे अपादानवाक्ये मक प्रत्ययः । धुन्वन्निति धूनोतेः शतृप्रत्ययः ॥

-*-

इदानीं द्रोणाचार्यस्य प्रभावं वर्णयति—सृजन्तमित्यादि ।

सृजन्तमाजाविषुसंहतीर्वः,
सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाग्रजिह्वं,
जगज्जिघत्सन्तमिवान्तवह्निम् ॥२०॥

अन्वयः

आजौ, इषुसंहतीः, सृजन्तं, कोपज्वलितं, परिस्फुरल्लोलशिखाग्रजिह्वं, जगत्जिघत्सन्तं, अन्तवह्निं, इव, गुरुं, वः कः, सहेत ॥

वाच्यान्तरम्

सृजन् कोपज्वलितः परिसफुरल्लोलशिखाग्रजिह्वः......जिघत्सन् अन्तवह्निरिव केन सह्येत ॥

व्याख्या

***आजौ* युद्धे ''युद्धमायोधनं जन्यं...समित्याजिसमिद्युधः''**

इत्यमरः *इषुसंहती:* इषूणां बाणानां संहतीः समूहान् *सृजन्तं* क्षिपन्तं *कोपज्वलितं* कोपेन क्रोधेन ज्वलितं देदीप्यमानं अतएव *परिस्फुरल्लोलशिखाग्रजिह्वं* शिखानां अग्राणि एव जिह्वाः परिस्फुरन्त्यः परितः प्रसरन्त्यः लोलाः चञ्चलाः शिखाग्रजिह्वा यस्य तं *जगत्* विश्वं *जिघत्सन्तं* भक्षयितुमभिलषयन्तं *अन्तवह्निं* कालानलतुल्यमग्निं इव *गुरुं* द्रोणाचार्यं *वः* युष्माकं मध्ये *कः* को जनः *सहेत* सोढुं क्षमेत न कोऽपीत्यर्थः ॥

सरलार्थः

युद्धार्थमवतीर्णो भवतां गुरुर्द्रोणाचार्यः कोपज्वलितवपुर्यदा बाणान् निक्षिपेत् तदा तादृशं विश्वं दग्धुमिच्छन्तं कालाग्निमिव द्रोणाचार्यं दृष्ट्वा युद्धक्षेत्रे को भयविह्वलो न भवेत् ? ॥

कौमुदी

"जिघत्सन्तमि"ति—"अत्तुमिच्छन्तमि"ति वाक्ये 'अद्'धातोः सनन्तात् 'शतृ'-प्रत्ययः ॥ "लुङ्सनोर्घसॢः" इति 'घसॢ'-आदेशः "सहेत"-इति शकि लिङ्चे"ति शक्यार्थे लिङ् । अन्तवह्निमिति, अ[illegible] य[illegible] -अन्तः पश्चाद्यच जगत्संहारक इत्यर्थः । अथवा-'अन्त कल्पान्तकालः, तस्य वह्निः तं इति षष्ठीतत्पुरुषः समासः ।

-✠-

कर्णस्यापि वीरतां प्रदर्शयति—निरीक्ष्येत्यादि ॥

निरीक्ष्य संरम्भनिरस्तधैर्यं,
राधेयमाराधितजामदग्न्यम् ।

असंस्तुतेषु प्रसभं भयेषु,

जायेत मृत्योरपि पक्षपातः ॥२१॥

अन्वयः

सरम्भनिरस्तधैर्यं, आराधितजामदग्न्यं, राधेयं, निरीक्ष्य, मृत्योः अपि, असंस्तुतेषु, भयेषु, प्रसभं, पक्षपातः, जायेत ।

वाच्यान्तरम्

पक्षपातेन = जन्येत ॥

व्याख्या

***संरम्भनिरस्तधैर्यं* संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं चिरनिर्विकारचित्तत्वं येन तं, स्वक्रोधेन धैर्यवतो धैर्यापहारिणमित्यर्थः । *आराधितजामदग्न्यं* आराधितः शुश्रूषितः जामदग्न्यः परशुरामो येन तं, यः अस्त्रविद्यालाभाय गुरुत्वेन जामदग्न्यं स्वीचकार, तं *राधेयं* राधापुत्रं कर्णं *निरीक्ष्य* दृष्ट्वा *मृत्योः* कृतान्तस्य *अपि* का कथा अन्येषामित्यर्थः । *असंस्तुतेषु* अपरिचितेषु "संस्तवः स्यात् परिचयः" इत्यमरः, कदाचित् स्मृतावप्यनुपस्थितेषु *भयेषु* भीतिषु *प्रसभं* हठात् *पक्षपातः* परिचयः *जायेत* उत्पद्येत ॥**

सरलार्थः

यस्तावदस्त्रविद्यालाभाय जामदग्न्यं गुरुत्वेनावृणोत् तं कर्णं क्रुद्धं दृष्ट्वा सर्वे वीराः लुप्तधैर्या भवन्ति का कथा वीराणां, मृत्योरपि तस्मात् भयमुत्पद्यते । अतः कस्तेन रणे युध्यते को वा तं जेतुं शक्नोति । अत्र मृत्योर्भयसम्बन्धाभावेऽपि तत्सम्बन्धप्रति-

पादनादतिशयोक्तिरलङ्कारस्तथा मृत्योरपि भयं जायेतेति का कथा अन्येषामित्यर्थाद्दण्डापूपिकया'न्यायेनार्थान्तरलाभादर्थापत्तिश्चेतिद्वयो-रेकाश्रयावस्थानात् सङ्करः। तल्लक्षणम् "अङ्गाङ्गित्वेऽलंकृतीनां तद्वदे-काश्रयस्थितौ। सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः"।

कौमुदी

'राधेय'मिति, 'राधा शब्दात् "स्त्रीभ्यो ढक्" इति- ढक्'प्रत्ययः। 'जायेते'तिसम्भावनाया 'लिङ्' ॥

-x-

इदानीं निजोपस्थितिकारणं श्लोकद्वयेनाह—ययेत्यादि।

ययां समासादितसाधनेन,
सुदुश्चरामाचरता तपस्याम्।
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन ॥२२॥

अन्वयः

यया, सुदुश्चरां, तपस्यां, आचरता, समासादितसाधनेन, कपिकेत-नेन, दुरापं, वीर्यं, समवाप्य, एते, उन्मूलितारः, (तां, विद्यां, दातुम्, उपागतोऽस्मि) ॥

वाच्यान्तरम्

आचरन् समासादितसाधनः कपिकेतनः एतान् उन्मूलयिता ॥

व्याख्या

यया साधनभूतया *सुदुश्चरां* अतिदुःखेन चर्यते इति

सुदुश्चरा, तां अतिदुष्करां *तपस्यां* तपश्चर्यां *आचरता* कुर्वता–इत्यर्थः *समासादितसाधनेन* समासादितं प्राप्तं साधनं पाशुपतास्त्रं येन, *कपिकेतनेन* कपिः वानरः "कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः, मर्कटो वानरः" इत्यमरः। केतनं ध्वजो यस्य तेन "पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्" इत्यमरः। तृतीयपाण्डवेन अर्जुनेनेति यावत्। *दुरापं* दुर्लभं *वीर्यं* पराक्रमं *समवाप्य* लब्ध्वा *एते* भीष्मद्रोणकर्णप्रभृतयः *उन्मूलितारः* विनाश्या भविष्यन्ति "तां" विद्यां दातुमुपागतोऽस्मि"—इत्युत्तरेण सम्बन्धः॥

कौमुदी

'ययेति—करणे तृतीया, तपस्यामिति—"कर्म्मणो रोमन्थतपोभ्यां वर्तिचरोः" इति–क्यङ्–ततः "अप्रत्ययादि"ति–स्त्रियाम्–'अ' प्रत्ययः। 'उन्मूलितार'इति–उन्मूलयतेर्ण्यन्तात्–कर्म्मणि–'लुट्'॥

महत्त्वयोगाय महामहिम्ना-
मारधनीं तां नृप देवतानाम्।
दातुं प्रदानोचित भूरिधाम्नी-
मुपागतः सिद्धिमिवास्मि विद्याम्॥२३॥

अन्वयः

हे प्रदानोचित! नृप!, महत्त्वयोगाय, महामहिम्नां, देवतानां, आराधनीं, भूरिधाम्नीं, सिद्धिम्, इव, तां, विद्यां, दातुम्, उपागतः, अस्मि॥

वाच्यान्तरम्

मया उपागतेन भूयते ॥

व्याख्या

हे प्रदानोचित ! प्रदाने उचित उपयुक्तः, योग्य इत्यर्थः । *महत्त्वयोगाय* उत्कर्षलाभाय *महामहिम्नां* महान् महिमा यासां तासामिति-बहुव्रीहिः, महाप्रभावाणामित्यर्थः *देवतानां* इन्द्रादीनां *आराधनीं* आराध्यन्ते साध्यन्ते अनया, तां सन्तोषयित्रीमित्यर्थः *भूरिधाम्नीं* भूरि प्रभूतं धाम प्रभावो यस्याः, तां-"धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः" इति विश्वः । *सिद्धिमिव* साक्षात् कार्यसिद्धिमिव *तां विद्यां* इन्द्रमन्त्ररूपां विद्यां *दातुं* अर्पयितुम् *उपागतः अस्मि* तव समीपमागतोऽहम् ॥

सरलार्थः

हे नरपते! त्वं खलु क्षमादिगुणवत्तया सुतरां योग्य इति यद्विद्याप्रभावेण देवान् आराध्य प्रभावातिशयो लब्धुं शक्यते तां विद्यां तुभ्यं दातुमेवात्र समागतोऽहम् ॥ त्वमपि मत्सकाशाद् विद्यामिमां गृहीत्वा अर्जुनाय देहि, स तया विद्यया दुर्लभं वीर्यं प्राप्याऽक्लेशेनैव भीष्मादीनुन्मूलयितुं शक्ष्यति ॥

कौमुदी

'देवताना'मिति-कर्मणि षष्ठी 'आराधनी'मिति-कृद्योगात् 'महामहिम्ना'मिति महान् महिमा यासामिति-बहुव्रीहौ "अन उपधालोपिन अन्यतरस्याम्" इति विकल्पपक्षे ङीपोऽभावः, 'भूरिधाम्नीमि'त्यत्र तु भूरि

धाम यस्याः तामिति-बहुव्रीहौ तेनैव सूत्रेण 'ङीप'। आराधनी'मिति-आराध्यतेऽनयेति-करणे-'ल्युट' ततः "टिड्ढाणञ्" इत्यादिना-ङीप् ॥

*

अथ मुनिवाक्यान्तरमाह-'इत्युक्तवन्तमि'त्यादि।

इत्युक्तवन्तं व्रज साधयेति,
प्रमाणयन्वाक्यमजातशत्रोः।
प्रसेदिवांसं तमुपाससाद,
वसन्निवान्ते विनयेन जिष्णुः ॥२४॥

अन्वयः

इति, उक्तवन्तं, प्रसेदिवांसं, तं, जिष्णुः, 'व्रज, साधय', इति, अजातशत्रोः, वाक्यं, प्रमाणयन्, अन्तेवसन्, इव, विनयेन, उपाससाद।

वाच्यान्तरम्

प्रसेदिवान् सः...जिष्णुना...प्रमाणयता अन्तेवसता उपासेदे ॥

व्याख्या

इति "ययें"त्यादिवचनजातम् *उक्तवन्तं* कथितवन्तं *तं मुनि* वेदव्यासम् *जिष्णुः* जयशीलः अर्जुनः *व्रज* 'गच्छ,-एवं अनुतिष्ठ' इत्येवंरूपं *अजातशत्रोः* न जाता जगति अनुत्पन्नाः शत्रवो यस्य, तस्य आजन्मशत्रुशून्यस्य युधिष्ठिरस्य *वाक्यं* वचनम् आदेशमित्यर्थः *प्रमाणयन्* स्वीकुर्वन् युधिष्ठिरेण समादिष्टः सन्नित्यर्थः *अन्तेवसन्*

छात्र. *इव* "छात्रान्तेवासिनौ शिष्ये" इत्यमरः *विनयेन* अनौद्धत्येन * उपाससाद * समीपमाजगाम,-मुनिसन्निधाने समुपस्थित इत्यर्थः ॥

सरलार्थः

"यया विद्यया अर्जुनः प्रभावातिशयं प्राप्य भीष्मादीन विजेतुं शक्ष्यति तां विद्यामहमर्जुनाय दातुमिच्छामीति वचनमुक्तवति प्रसन्ने मुनौ अर्जुनः युधिष्ठिरेणानुज्ञातः छात्रसदृशः सविनयं मुनेः समीपं समुपस्थितवान् ॥

कौमुदी

'इति' इत्यव्ययम् । 'प्रसेदिवांस'मिति "भाषायां सदवस्श्रुव" इति 'क्वसु'-प्रत्ययः । 'जिष्णु'रिति "ग्लाजिस्थश्च"-इति 'ग्स्नु'-प्रत्ययः । अर्जुनस्य दशनामानि यथा-"अर्जुनः फाल्गुनिर्जिष्णुः किरीटी श्वेतवाहनः वीभत्सुर्गाण्डीवी चैव सव्यसाची धनञ्जयः ।

-x-

अथार्जुनस्य विद्याग्रहणप्रकारमाह—निर्यायेत्यादि

निर्याय विद्याथ दिनादिरम्याद्,
बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता,
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥२५॥

अन्वयः

अथ, वह्निकणावदाता, विद्या, दिनादिरम्यात्, अर्कस्य, बिम्बात्,

इव, महर्षेः, मुखात्, निर्याय, दीप्तिः, स्फुरत्पद्मं, इव, पार्थाननं, अभिपेदे ॥

वाच्यान्तरम्

वह्निकणावदातया विद्यया... ...दीप्त्या......अभिपेदे ॥

व्याख्या

अथ मुनिसकाशमुपस्थिते अर्जुने *वह्निकणावदाता* वह्नेः अग्नेः कणाः स्फुलिङ्गाः "त्रिषु स्फुलिङ्गोऽग्निकणः" इत्यमरः । ते इव अवदाता शुभ्रा "शुक्लशुभ्रशुचिश्वेतविशदश्वेतपाण्डुराः । अवदातःसितो गौरो वलक्षो धवलोऽर्जुन" इत्यमरः । अग्निस्फुलिङ्गसदृशी विशदा इत्यर्थः *विद्या* ऐन्द्रमन्त्ररूपा *दिनादिरम्यात्* दिनस्य आदिः तस्मिन् प्रभाते रम्यं मनोहरं तस्मात् *अर्कस्य* सूर्य्यस्य *बिम्बात्* मण्डलात् इव *महर्षेः* व्यासस्य *मुखात्* आननात् *निर्याय* निर्गत्य *दीप्तिः* तेजः *स्फुरत्पद्मं इव* स्फुरत् विकसत् पद्मं कमलं इव *पार्थाननं* पार्थस्य अर्जुनस्य आननं मुखं इव *अभिपेदे* प्रविष्टा । व्यासदत्तं मन्त्रं अर्जुनो हि गृहीतवानिति भावः ॥

सरलार्थः

अग्निकणावत् सुनिर्म्मला अर्कदीधितिर्यथा दिनादौ कमलं प्रविश्य विकाशयति तथैव व्यासप्रदत्ता विद्या अर्जुनं प्राप्य तदाननं उत्फुल्लीकरोति, वस्तुतो व्यासप्रदत्तां विद्यां अर्जुनस्तत्क्षणमेव अधिगतवान । अत्र श्लोके अर्कस्य बिम्बादिव महर्षेर्मुखात् तथा स्फुरत्प-

द्रमिव पार्थाननं तथा वह्निकणावदाता विद्येति चोपमानोपमेयभावत-योपमालङ्कारः ॥

कौमुदी

'मुखादि'त्यपादाने पञ्चमी । 'निर्याये'ति—''समासेऽनञ्पूर्वे क्त्वो 'ल्यप्'' इति 'ल्यप' ।

-✻-

शिक्षाप्रकारमाह—योगञ्चेत्यादि—

योगं च तं योग्यतमाय तस्मै,
तपःप्रभावाद्वितातार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे,
समुन्मिमीलेव चिराय चक्षुः ॥२६॥

अन्वयः

योग्यतमाय, तस्मै, तं, योगं, च, तपःप्रभावात्, सद्यः, वितताार । **येन**, तत्त्वेषु, अवभासे, कृते, अस्य, चक्षुः, चिराय, समुन्मिमील, इव ॥

वाच्यान्तरम्

सः योगः...वितेरे ।...चक्षुषा समुन्मिमीले ॥

व्याख्या

***योग्यतमाय* योग्येषु उपयुक्तपात्रेषु श्रेष्ठाय सत्पात्रा-येत्यर्थः *तस्मै* अर्जुनाय *तं योगम्* यमनियमादिभिर्ध्या-नम् ''योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु'' इत्यमरः *तपः-प्रभावात्* सुदीर्घकालं व्याप्य कृतायाः तपस्यायाः प्रभावात्**

कृततपःशक्तेरित्यर्थः *सद्यः* तत्क्षणात् "सद्यः सपदि तत्क्षणे"इत्यमरः *विततार* अर्पितवान् *येन* योगेन *तत्त्वेषु* प्रकृत्यादिचतुर्विंशतितत्त्वेषु *अवभासे* साक्षात्कारे कृते सति *अस्य* अर्जुनस्य *चक्षुः* नयनम् *चिराय* दीर्घकालात् परं *समुन्मिमील इव* उन्मिषितमिव दृष्टिहीनं चक्षुः दिव्यदर्शनं लेभे इवेत्यर्थः। तस्मिन्नेव क्षणे पार्थस्य अनिर्वचनीयस्तत्त्वबोधः अन्धस्य दृष्टिलाभ इव समुत्पन्न इति।

सरलार्थः

स मुनिर्वेदव्यासः आत्मनस्तपःप्रभावात् सुयोग्यसत्पात्राय तस्मै पार्थाय तदानीं तादृशं योगं शिक्षयामास। तत्प्रभावात् अर्जुनो दीर्घकालात् परं दिव्यं तत्वज्ञानं लेभे। 'समुन्मिमीलेवे'त्युत्प्रेक्षालङ्कारः॥

कौमुदी

'तस्मै' इति सम्प्रदाने चतुर्थी। तपःप्रभावादिति हेत्वर्थे पञ्चमी। 'येने'ति करणे तृतीया। 'तत्त्वेषु' इति विषये सप्तमी। 'अवभासे'इति भावे सप्तमी।

कृतमन्त्रपरिग्रहं पार्थं पुनराह-आकारमित्यादि।

आकारमाशंसितभूरिलाभं,
दधानमन्तःकरणानुरूपम्।
नियोजयिष्यन्विजयोदये तं,
तपःसमाधौ मुनिरित्युवाच ॥२७॥

अन्वयः

आशंसितभूरिलाभं, अन्तःकरणानुरूपं, आकारं, दधानं, तं, मुनिः, विजयोदये, तपःसमाधौ, नियोजयिष्यन्, इति, उवाच ॥

वाच्यान्तरम्

दधानः सः मुनिना...नियोजयिष्यता इति ऊचे ॥

व्याख्या

आशंसितभूरिलाभम् आशंसितः संसूचितः भूरिलाभः प्रचुरप्राप्तिः येन, तं बहुव्रीहिः समासः, प्रभूतश्रेयःप्राप्तिसूचकमहाफलोदयमित्यर्थः *अन्तःकरणानुरूपम्* अन्तःकरणस्य चित्तस्य अनुरूपं अनुकूलं अन्तःकरणस्य नित्यत्वेन तदनुगुणत्वाऽसम्भवात् अत्रान्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते अतः उत्साहानुगुणव्यापारक्षममित्यर्थः *आकारं* मूर्तिम् *दधानम्* धारयन्तं *तं* अर्जुनम् *मुनिः* वेदव्यासः *विजयोदये* विजय एव उदयः फलप्राप्तिः यस्मिन् इति बहुव्रीहिः समासः, तस्मिन् विजयफलके इत्यर्थः *तपःसमाधौ* तपसः योगस्य समाधौ एकाग्रतायां तपोनियमे इत्यर्थः "समाधिर्नियमे ध्याने मौने चैव समर्थने" इति विश्वः *नियोजयिष्यन्* नियोजयितुं प्रवर्तयितुं इच्छन् *इति* वक्ष्यमाणं वाक्यम् *उवाच* कथितवान् ॥

सरलार्थः

अथ मुनिर्वेदव्यासोऽर्जुनस्य महत्फलप्राप्तौ समर्थां उत्साहसम्पन्नां कर्म्मकुशलाञ्च आकृतिं दृष्ट्वा विजयलाभार्थं तपःसमाधौ तं नियोजयितुमिच्छन्नुपदिदेश ॥

कौमुदी

'विजयोदये'इति बहुव्रीहिः समासः। विषये सप्तमी। नियोजयिष्यन्निति 'लृटशेषे च' इति-'लृट्' "लृटः सद्वा" इति'सत्'-प्रत्ययः।

-x-

इदानीं योगप्रकारमुपदिशति स्म—अनेनेत्यादि।

अनेन योगेन विवृद्धतेजा-
निजां परस्मै पदवीमयच्छन्।
समाचराचारमुपात्तशस्त्रो,
जपोपवासाभिषवैर्मुनीनाम् ॥२८॥

अन्वयः

अनेन, योगेन, विवृद्धतेजाः, निजां, पदवीं, परस्मै, अयच्छन्, उपात्तशस्त्रः, जपोपवासाभिषवैः, मुनीनां, आचारं, समाचर ॥

वाच्यान्तर

विवृद्धतेजसा......अयच्छता उपात्तशस्त्रेण...आचारः समाचर्यताम् ॥

व्याख्या

***अनेन* मदुपदिष्टेन *योगेन* योगमार्गावलम्बनेन *विवृद्धतेजाः* विवृद्धं उपचितं तेजः वीर्यं यस्य सः—इति-बहुव्रीहिः समासः *निजां* स्वकीयां *पदवीं* वासस्थानम् *परस्मै* अन्यस्मै अयच्छन् *उपात्तशस्त्रः* उपात्तं गृहीतं शस्त्रं अस्त्रं येन स इति बहुव्रीहिः समासः, आत्मरक्षणाय**

धृतप्रहरण इत्यर्थः *जपोपवासाभिषवैः* जपः = स्वाध्यायः "स्वाऽध्यायः स्याज्जप"इत्यमरः । उपवासः = अनशन अभिषवः त्रैकालिकस्नानं च इति द्वन्द्वः समासः तैः *मुनीनां* मौनव्रतिनाम् *आचारम्* नियमम् वृत्तिमिति यावत् *समाचर* अनुतिष्ठ ॥

सरलार्थः

मदुपदिष्टेन योगेन वीर्यं लब्ध्वा स्वस्य तपश्चरणस्थाने परस्य प्रवेशाधिकारं प्रतिषिध्य आत्मरक्षार्थं सततं धृतकार्म्मुकः सन् मन्त्रजापैः त्रैकालिकस्नानैः उपवासैरन्यैश्च तपःसमुचितैर्मौनव्रतादिभिः तपस्यां समाचर ॥

-✕-

तपःसिद्धिस्तु क्षेत्रविशेषे भविष्यतीति क्षेत्रविशेषं निर्दिशन्नाह—करिष्यसे इत्यादि—

करिष्यसे यत्र सुदुश्चराणि,
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं त-
मेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥२९॥

अन्वयः

यत्र, गोत्रभिदः, प्रसत्तये, सुदुश्चराणि, तपांसि, करिष्यसे, चारुशिलोच्चयं, तं, शिलोच्चयं, त्वां, एषः, गुह्यकः, क्षणात् नेष्यति ॥

वाच्यान्तरम्

करिष्यन्ते......एतेन गुह्यकेन त्वं नेष्यसे ॥

व्याख्या

यत्र यस्मिन् पर्वते *गोत्रभिदः* गोत्रं पर्वतं भिनत्ति इति—गोत्रभिद् इन्द्रः तस्य "अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः" इत्यमरः "गोत्रभिद् वज्री वासवो वृत्रहा वृषेऽत्यमरः। इन्द्रस्य *प्रसत्तये* प्रसादलाभाय *सुदुश्चराणि* अतिकठोराणि *तपांसि* तपश्चरणानि * करिष्यसे * आचरिष्यसि *चारुशिलोच्चयं* शिलानां प्रस्तराणामुच्चयः समूहः चारुः मनोज्ञः शिलोच्चयः प्रस्तरसमूहो यस्मिन् तं रम्यशिखरम् *शिलोच्चयम्* तं पर्वतम् *त्वां* भवन्तम् *एष गुह्यकः* अयमुपस्थितो यक्षः "विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः। *क्षणात्* अविलम्बेन *नेष्यति* प्रापयिष्यति ॥

सरलार्थः

इन्द्रप्रसादकाम्यया यत्र त्वया तपः करिष्यते अयमागतो यक्षः क्षणादेव त्वां तत्र नेष्यति ॥

कौमुदी

'प्रसत्तये' इति—प्रपूर्वस्य 'सद्' धातोर्भावे क्तिन्' "तुमर्थाच्च भाववचनादि"ति चतुर्थी 'नयतेर्द्विकर्मकत्वात् शिलोच्चय'मिति त्वामि'ति च द्वयोरपि कर्मणोः द्वितीया। अनन्तरमेवोपस्थितस्य गुह्यकस्य तदानीं तत्रासत्त्वेऽपि मुनेः योगशक्त्या प्रत्यक्षीकरणादेष इति निर्देशः सङ्ग-

च्छते । "इदमः प्रत्यक्षगतं समीपवर्ति चैतदोरूपम् । अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति"

ततो यद् वृत्तं तद् वक्तुमुपक्रमते—इति ब्रुवाणेनेत्यादि—

इति ब्रुवाणेन महेन्द्रसूनुं,
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य,साक्षात्
प्रदेशमादेशमिवाधितष्ठौ ॥३०॥

अन्वयः

महेन्द्रसूनुम्, इति, ब्रुवाणेन, तेन, महर्षिणा, तिरोबभूवे, राजराजानुचरः, अस्य, मुनेः, साक्षात्, आदेशम्, इव, तं, प्रदेशम्, अधितष्ठौ ॥

वाच्यान्तरम्

सः महर्षिः तिरोबभूव, राजराजानुचरेण...आदेश इव सः प्रदेशः अधितष्ठे ॥

व्याख्या

इति 'करिष्यसे यत्र'त्यादिवचनं *महेन्द्रसूनुम्* महेन्द्रस्य शतक्रतोः सूनुम् पुत्रम् "आत्मजस्तनयः सूनु"रित्यमरः अर्जुनम् *ब्रुवाणेन* कथयता *तेन महर्षिणा* तेन वेदव्यासेन *तिरोबभूवे* अन्तर्दधे *राजराजानुचरः* राजराजस्य कुबेरस्य "राजराजो धनाधिप" इत्यमरः अनुचरः यक्षः *अस्य मुनेः* व्यासस्य *साक्षात् आदेशमिव* प्रत्यक्षतो दर्शन-

योग्यामिवानुमतिम् *तं प्रदेशं* तत्स्थानम् *अधितष्ठौ* लब्धवान् ।

सरलार्थ.

एवमुक्त्वा अन्तर्हिते तस्मिन् महामुनौ वेदव्यासे तत्क्षणादेव यक्षस्तत्र समुपस्थितः ।

कौमुदी

प्रदेशमिति—"अधिशीङ्स्थासां कर्मे"ति आधारस्य कर्म्मत्वम् ॥

*

यक्षागमनमाह—कृतानतिरित्यादि ।

कृतानतिर्व्याहृतसान्त्ववादे,
जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव संप्रसादं,
विश्वासयत्याशु सतां हि योगः ॥३१॥

अन्वयः

सः, पुण्यजनः, कृतानतिः, जातस्पृहः, व्याहृतसान्त्ववादे, जिष्णौ, सख्यौ, इव, सम्प्रसादं, इयाय, हि, सतां, योगः, आशु, विश्वासयति ॥

वाच्यान्तरम्

कृतानतिना जातस्पृहेन तेन पुण्यजनेन सम्प्रसादः {इये...सतां योगेन विश्वास्यते ॥

व्याख्या

***सः पुण्यजनः* यक्षः "अथ पुण्यजने यक्षे राक्षसे सज्जनेऽ**

पिचे"ति-मेदिनी *कृतानतिः* कृता विहिता आनतिः नमस्कारो येन सः कृतनमस्कारः *जातस्पृहः* जाता उत्पन्ना स्पृहा आकाङ्क्षा यस्य स इति 'बहुव्रीहिसमासः *व्याहृतसान्त्ववादे* व्याहृतः उक्तः सान्त्वः सुकोमलः प्रिय इत्यर्थः, वादः वचनं येन तस्मिन् इति बहुव्रीहिः समासः। "व्याहार उक्तिर्लपितं भाषितं वचनं वचः" इत्यमरः *जिष्णौ* अर्जुने *सख्यौ इव* सुहृदि इव "अथ मित्रं सखा सुहृद्" इत्यमरः। *सम्प्रसादं* प्रत्ययम् *इयाय* प्राप *हि* निश्चितम् *सताम्* साधूनाम् *योगः* सम्बन्धः *आशु* शीघ्रम् *विश्वासयति* जनानां प्रत्ययं जनयतीत्यर्थः। अर्जुनयक्षयोः परस्परसम्भाषणं क्षणेनैव बन्धुत्वमुत्पादयामासेत्यर्थः॥

सरलार्थः

समेत्य कृतनमस्कारे यक्षे अर्जुनः प्रियसम्भाषणेन तमभ्यर्थितवान्। तदभ्यर्थनया यक्षोऽर्जुनं प्रति अनुरक्तो बभूव। इत्थमचिरेणैव कालेन तयोः सौहार्दं जातम्। एवमेव सज्जनानां परस्परसम्भाषणादिना अल्पेनैव कालेन प्रीतिरुपजायते। अत्र चतुर्थपादगतेन सतां योग आशु विश्वासयती'ति सामान्येनार्थेन पादत्रयप्रतिपादितस्य यक्षार्जुनयोः प्रीतिरूपार्थस्य विशेषस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः। तदुक्तं–"सामान्यं वा विशेषेण विशेषस्तेन वा यदी"त्यादि।

कौमुदी

'जिष्णौ' इति-भावे सप्तमी।' "ग्लाजिस्थश्चग्स्नुः" इति ग्स्नु प्रत्ययः।

तपस्यार्थं गते पार्थे पाण्डवानामवस्थामाह—अथेत्यादि ॥

अथोष्णभासेव सुमेरुकुञ्जान्,
विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं,
तमः शनैः पाण्डुसुतान्प्रपेदे ॥३२॥

अन्वयः

अथ, उष्णभासा, उदयाय विहीयमानान् बृहद्द्युतीन्, सुमेरुकुञ्जान, इव, तेन, विहीयमानान् पाण्डुसुतान् दुःखकृतात्मलाभः तमः, शनैः, प्रपेदे ॥

वाच्यान्तरम्

विहीयमानाः बृहद्द्युतयः सुमेरुकुञ्जाः...विहीयमानाः पाण्डुसुताः दुःखकृतात्मलाभेन तमसा...प्रपेदिरे ॥

व्याख्या

अथ पार्थे प्रस्थिते सति *उष्णभासा* उष्णा भाः प्रभा यस्य सः तेन सूर्येण *उदयाय* पुनरुद्भवाय *विहीयमानान्* अन्यत्र तपः कर्त्तुं गतेन पार्थेन त्यज्यमानान् *बृहद्द्युतीन्* बृहती महती द्युतिः तेजः येषां तान् इति बहुव्रीहिः समासः सौवर्णत्वात् दीप्यमानान् पाण्डवपक्षे तेजःपुञ्जकलेवरान् सुमेरुकुञ्जानिव अनेकविधप्रकारांश्च अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थम् *तेन* पार्थेन विहीयमानान् त्यज्यमानान् पाण्डुसुतान् पाण्डुपुत्रान् युधिष्ठिरादीन् चतुरः भ्रातॄन्

तेन पार्थेन *दुःखकृतात्मलाभं* दुःखेन अतिकष्टेन सम्भावितः आत्मलाभः यस्य तत् अतिदुःखोत्पन्नम् तेषां विवेकित्वात् कथञ्चित् विलम्बोदयमित्यर्थः *तमः* अन्धकारःशोकश्च "तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे" इति विश्वः *शनैः* मन्दम् *प्रपेदे* प्राप प्रविवेशेत्यर्थः ।

सरलार्थः

अस्तंगतेन सूर्येण परित्यक्तः सुमेरुर्यथा अन्धकारेण आक्रान्तः स्यात्,तथैव यक्षेण सह तपस्यार्थं गतेन पार्थेन परित्यक्ताः युधिष्ठिरादयस्तद्विरहजेन शोकेनाक्रान्ताः आसन् अत्र 'सुमेरुकुञ्जानिव' पाण्डुसुतानि'ति 'उष्णाभासेव-तेने'ति 'तम इव 'तम'इति चोपमा 'तम'इति 'उदयाये'ति 'बृहद्द्युतीनि'ति च पदानि श्लिष्टानि ।

कौमुदी

उदयाये'ति तादर्थ्ये चतुर्थी ।

-*-

महानपि शोकावेगः कथं तैः सेहे इत्यत आह-असंशयेत्यादि ।

असंशयालोचितकार्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥३६॥

अन्वयः

असंशयालोचितकार्यनुन्नः, प्रेम्णा, समानीय, विभज्यमानः, सः,

दुःखातिभारः, अपि, तन्मनोभिः, तुल्यात्, विभागात्, इव, लघुः, मेने ॥

वाच्यान्तरम्

असंशयालोचितकार्यनुन्नं...विभज्यमानं तं दुखातिभारं...तन्मनांसि...लघु मेनिरे ॥

व्याख्या

असंशयालोचितकार्य्यनुन्नः नास्ति संशयः यस्मिन् तदिति बहुब्रीहिःसमासः, निःसन्देहं यथास्यात्तथा आलोचितं विचारितं यत् कार्यं शत्रुजयरूपं, तेन नुन्नः निरस्तः तथापि *प्रेम्णा* भ्रातृस्नेहेन *समानीय* समाकृष्य *विभज्यमानः* भ्रातृषु तुल्यतया विभागेन समानांशीक्रियमाणः तुल्यस्नेहेन तुल्यमेव दुःखं चतूर्णामितिभावः *सः* भ्रातृविरहजनितः *दुःखातिभारः* दुर्वहदुःखमित्यर्थः *तन्मनोभिः* तेषां चतूर्णां भ्रातृणां मनोभिः चित्तैः *तुल्यात्* समानात् *विभागात् इव* समभागेन दुःखस्य तुल्यांशग्रहणादिव *लघुः* अल्पः *मेने* अनुबभूवे ।

सरलार्थः

भविष्यज्जयलाभकार्य्यगौरवात् भ्रातृविरहजं शोकं त्यक्तु यतमाना अपि ते कृतकार्या न बभूवुः ॥ किन्तु चत्वारोऽपि तद्दुःखं वहन्तः लघुकुर्वन्ति स्म वस्तुतस्तु विवेकादिवेति भावः । यथा बहुभिर्वहनसाध्यमेकीभूतं भारं महान्तमपि अनेकधा विभज्य लघुं मन्यते लोकस्तद्वदित्यर्थः । अत्र विभागादिवेत्युत्प्रेक्षणात् उत्प्रेक्षालङ्कारः ।

कौमुदी

'नुन्न'इति-'नुद्'धातोः'क्त'प्रत्यये ''नुदविदोन्दत्रा घ्राह्रीभ्योऽन्यतरस्यामि''ति 'निष्ठा''त'कारस्य न त्वम्। 'विभागादि'ति 'ल्यब्'लोपे पञ्चमी ॥

-×-

विवेकिनं शोको नाक्रामतीत्याह–धैर्येणेत्यादि।

धैर्येण विश्वास्यतया महर्षे-
 स्तीव्रादरातिप्रभवाच्च मन्योः।
वीर्यं च विद्वत्सु सुते मघोनः,
 स तेषु न स्थानमवाप शोकः ॥३४॥

अन्वयः

धैर्येण, महर्षेः, विश्वास्यतया, अरातिप्रभवात्, मन्योः, च, मघोनः, सुते, वीर्यञ्च, विद्वत्सु, तेषु, सः, शोकः, स्थानं, न, अवाप।

वाच्यान्तरम्

तेन शोकेन स्थानं न अवापे ॥

व्याख्या

धैर्येण धीरतया निसर्गतो निर्विकारचित्तत्वेनेति यावत् तथा *महर्षेः* व्यासस्य प्रवर्त्तकस्येति शेषः *विश्वास्यतया* विश्वासपात्रत्वेन श्रद्धेयवचनत्वेनेत्यर्थः *अरातिप्रभवात्* अरातेः शत्रोः प्रभवः उत्पत्तिर्यस्य तस्मात् शत्रुजनितात् *तीव्रात्* सुदुःसहात् *मन्योः* क्रोधात् हेतोः तथा *मघोनः* इन्द्रस्य *सुते* पुत्रे अर्जुने इत्यर्थः *वीर्यं पराक्रमं

विद्वत्सु जानत्सु *तेषु* पाण्डवेषु *सः* पार्थविरहजः *शोकः* *स्थानं* स्थितिं *न अवाप* न आप तान् परित्यज्य अपगत इत्यर्थः ॥

सरलार्थः

ते युधिष्ठिरादयः आत्मनो धैर्येण महर्षिं प्रति विश्वासेन वैरिणां प्रति ताम्रक्रोधेन च अर्जुनस्य पराक्रमं जानन्तस्तदानीं शोकेन नाक्रान्ता बभूवुः ॥

कौमुदी

'धैर्येणे'ति-हेत्वर्थे तृतीया, 'विश्वास्यतया'-इत्यपि हेत्वर्थे तृतीया, 'वीर्य'मिति द्वितीया, 'विद्वत्सु'-इति शत्रन्तस्य कर्म्मणि "न लोकाव्यय-निष्ठा" इत्यादिना षष्ठीनिषेधः ।

-x-

पार्थगमने द्रौपद्यवस्थामाह-तानित्यादि ।

तान्भूरिधाम्नश्चतुरोऽपि दूरं,

विहाय यामानिव वासरस्य ।

एकौघभूतं तदशर्म कृष्णां,

विभावरीं ध्वान्तमिव प्रपेदे ॥३५॥

अन्वयः

तत्, अशर्म्म, भूरिधाम्नः, चतुरः, तान्, अपि, वासरस्य, यामान्, इव, दूरं, विहाय, एकौघभूतं, (सत्) विभावरीं, ध्वान्तं, इव, कृष्णां, प्रपेदे ॥

वाच्यान्तरम्

तेन अशर्म्मणा......एकौघभूतेन ध्वान्तेन इव विभावरी कृष्णा प्रपेदे ॥

व्याख्या

तत् अर्जुनस्य तपस्यार्थं गमनात् जातं *अशर्म्म* शर्म्म सुखं तन्न भवतीति अशर्म्म असुखं "शर्म्म शातसुखानि च" इत्यमरः *भूरिधाम्नः* भूरि प्रभूतं धाम तेजो येषां तान् अतितेजस्विन इत्यर्थः *चतुरः तानपि* युधिष्ठिरभीमनकुल-सहदेवान् अपि *वासरस्य* दिवसस्य घस्रोदिनाहनी वा तु क्लीबे दिवसवासरौ इत्यमरः *यामान्* प्रहरानिव "द्वौ यामौ प्रहरौ समौ"इत्यमरः *दूरं विहाय अतिदूरे त्यक्त्वा *एकौघ-भूतं* एकयोगयुक्तं स्तूपीकृतमित्यर्थः *कृष्णां विभावरीं* कृष्णपक्षरात्रिम् "निशानिशीथिनी......विभावरी तमस्विन्यौ रजनी यामिनी तमी इत्यमरः। *ध्वान्तं इव* "अन्धकारो-ऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः" इत्यमरः। अन्धकारमिव *कृष्णां* द्रौपदीम् *प्रपेदे* प्राप ॥

सरलार्थः

अन्धकारो यथा दिवसस्य चतुरो यामान् विहाय रात्रिमाश्रयति, तथैव पार्थवियोगदुःखं एकीभूतं युधिष्ठिरादीन् चतुरो भ्रातॄन् विहाय द्रौपदीमेवाश्रयति स्म ततश्च द्रौपदीसुदुःसहशोकाकुला बभूव अत्राशर्म्म ध्वान्तमिवेत्युपमालङ्कारः।

कौमुदी

एकः ओघः भूत इत्यर्थे "श्रेण्यादयः कृतादिभिः" इति कर्मधारयः। 'विहाये'ति—'वि'पूर्वक'हा'धातो'र्ल्यप्' प्रत्ययः॥

-x-

तदानीं द्रौपद्या अवस्थामाह-'तुषारलेखे'त्यादि।

तुषारलेखाकुलितोत्पलाभे,
पर्यश्रुणी मङ्गलभङ्गभीरुः।
अगूढभावापि विलोकने सा,
न लोचने मीलयितुं विषेहे॥३६॥

अन्वयः

सा, विलोकने, अगूढभावा, अपि, मङ्गलभङ्गभीरुः, पर्यश्रुणी, तुषारलेखाकुलितोत्पलाभे, लोचने, मीलयितुं, न, विषेहे॥

वाच्यान्तरम्

तया अगूढभावया मङ्गलभङ्गभीर्वा......न विषेहे॥

व्याख्या

सा द्रौपदी *विलोकने* अवलोकने अर्जुनं प्रति दृष्टिनिक्षेपे *अगूढभावा* अगूढः अगुप्तः भावः अभिलाषो यस्याः सा स्फुटाभिलाषिणी "भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु" इति वैजयन्ती *मङ्गलभङ्गभीरुः* मङ्गलस्य कुशलस्य कल्याणस्येतियावत् भङ्गाद् हानेः भीरुः भीता "श्वश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" इत्यमरः *पर्यश्रुणी* परिगते अश्रुणी

ययोस्ते बाष्पाकुले इत्यर्थः, अत एव *तुषारलेखाकुलितोत्पलाभे* तुषारस्य हिमस्य लेखा बिन्दुः तया आकुलिते ते च ते उत्पले चेति द्वन्द्वः। तयोः आभा इव शोभा इव आभा ययोरिति-बहुव्रीहिः समासः हिमबिन्दुसहितपद्मतुल्ये इत्यर्थः *लोचने* नयने *मीलयितुं* प्रकाशयितुं *न विषेहे* न शशाक नेत्रवारि दृष्टिं बध्नाति तस्य पतनं अमङ्गलाशंसि अतस्तन्निवर्त्तनाय निमीलनं सा न चकार इत्यर्थः॥

सरलार्थः

यदा अर्जुनो द्रौपदीसमीपमागतवान् तदा प्रस्थानकाले द्रौपदी तद्दर्शनलालसाऽसीत्, परं नेत्रद्वयं जलभाराक्रान्तमिति तं द्रष्टुं न शशाक। न चापि नेत्रद्वयममीलयत्, यतो नेत्रमीलने यदि अश्रुपातस्तदाऽमङ्गलं स्यात्। अतो दर्शनस्पृहावती अपि अमङ्गलशङ्कया नेत्रमीलनं न चकार॥

कौमुदी

अत्र 'तुषारलेखाकुलितोत्पलाभे लोचने''—इत्युपमालङ्कारः॥

-४-

द्रौपदीपार्थयोर्विरहक्षणाऽवस्थां विवृणोति-'अकृत्रिमे'त्यादि।

अकृत्रिमप्रेमरसाभिरामं,
रामार्पितं दृष्टिविलोभि दृष्टम्।
मनःप्रसादाञ्जलिना निकामं,
जग्राह पाथेयमिवेन्द्रसूनुः॥३७॥

अन्वयः

इन्द्रसूनुः, अकृत्रिमप्रेमरसाभिरामं, रामार्पितं, दृष्टिविलोभि, दृष्टं, मनः, प्रसादाञ्जलिना, पाथेयं इव, निकामं, जग्राह ॥

वाच्यान्तरम्

इन्द्रसूनुना......जगृहे ॥

व्याख्या

इन्द्रसूनुः इन्द्रस्य शक्रस्य सूनुः पुत्रः "आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियान्त्वमी"त्यमरः। अर्जुनः *अकृत्रिमप्रेमरसाभिरामं* क्रियया निर्वृत्तं कृत्रिमं, तद्विपरीतं अकृत्रिमं स्वाभाविकमित्यर्थः यत् प्रेम तदेव रसः, तेन अभिरामं मनोहरं पाथेयपक्षे तु मधुरादिरसेन अभिरामं अतिप्रियं *रामार्पितम्* रामया रमण्या अर्पितं दत्तम् "सुन्दरी रमणी रामा" इत्यमरः *दृष्टिविलोभि दृष्टिं दर्शनं विलोभयतीति–सुदर्शनमित्यर्थः। *दृष्टं* अवलोकनम् *मनःप्रसादाञ्जलिना* मनसश्चित्तस्य प्रसादः प्रसन्नता,–स अञ्जलिः इव इत्युपमितसमासः तेन *पाथेयं* पथि साधु इति पाथेयं शम्बलम् इव *निकामं* पर्याप्तं जग्राह। रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः।

सरलार्थः

यथा मधुरादिरसयुक्तं द्रव्यं पथि गच्छतो जनस्य अतिप्रियं शम्बलं भवति, तथैव अकृत्रिमं प्रेमरसाप्लुतं तत् कृष्णाया आकुलं सुदर्शनं दर्शनं प्रसन्नचित्तेन तदानीं पार्थः पाथेयसम्बलत्वेन जग्राह पाथेयमिवेत्युत्प्रेक्षणात् उत्प्रेक्षालङ्कारः ॥

कौमुदी

'दृष्टिविलोभी'ति दृष्टिं विलोभयतीति 'णिन्'—प्रत्ययः। 'दृष्ट'मिति- "नपुंसके भावे क्त"इति'क्त'प्रत्ययः। पाथेयमिति "पथ्यतिथिवसतिस्वपतेढञ्" इति 'ढञ्' प्रत्ययः। 'निकामम'ति—क्रियाविशेषणे द्वितीया। 'कृत्रिममि'ति—"ड्वितः क्त्रिः"इति—'क्त्रिः'। क्त्रेर्मम् नित्यम् इति 'मम्'प्रत्ययः॥

-✕-

अथ द्रौपदी शोकाकुलाऽर्जुनं वक्तुमुपक्रमतेस्म 'धैर्यावसादेनेत्यादि।

धैर्यावसादेन हृतप्रसादा,
वन्यद्विपेनेव निदाघसिन्धुः।
निरुद्धबाष्पोदयसन्नकण्ठ-
मुवाच कृच्छ्रादिति राजपुत्री ॥३८॥

अन्वयः

वन्यद्विपेन, निदाघसिन्धुः, इव, धैर्यावसादेन, हृतप्रसादा, राजपुत्री, निरुद्धबाष्पोदयसन्नकण्ठं, कृच्छ्रात्, इति, उवाच॥

वाच्यान्तरम्

निदाघसिन्धुना...राजपुत्र्या...इति ऊचे॥

व्याख्या

वन्यद्विपेन वन्यहस्तिना *निदाघसिन्धुःइव* निदाघस्य ग्रीष्मस्य सिन्धुः नदी इव "निदाघउष्णोपगम"इत्यमरः।

देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्''इत्यमरः। *धैर्यावसादेन* धैर्यस्य धीरतायाः अवसादः क्षतिः तया धैर्यच्युता-इति यावत् *हृतप्रसादा* हृतः अपगतः प्रसादः सारल्यं यस्याः सा मलिनीकृता-इत्यर्थः। *राजपुत्री* राज्ञः द्रुपदराजस्य पुत्री कन्या द्रौपदी *निरुद्धबाष्पोदयसन्नकण्ठं* निरुद्धः बाष्पाणां अश्रूणां उदयः, तेन सन्नः रुद्धः कण्ठो यस्मिन् तत्-इति-बहुव्रीहिः समासः। नेत्रजलसम्वरणेन रुद्धकण्ठमित्यर्थः *कृच्छ्रात्* अतिकष्टेन *इति* वक्ष्यमाणम *उवाच* उक्तवती ॥

सरलार्थः

यथा ग्रीष्मकाले वन्यगजैर्विमर्दिता नदी कालुष्यमुपयाति, तथैवार्जुनविरहजदुःखोत्पीडनेन विमथिता राजपुत्री द्रौपदी धैर्यापगमात् शोकव्याकुला बाष्परुद्धकण्ठा बभूव। इत्थं व्याकुलापि सा अतिकष्टेन कथञ्चिदात्मानं स्थिरीकृत्याऽर्जुनं यात्राकाले किमपि अवश्यवक्तव्यवचनं वक्तुं प्रवर्त्ततेस्म। अत्र धैर्यावसादेन वन्यद्विपेनेवेति, तथा-हृतप्रसादा निदाघसिन्धुरिव राजपुत्रीति चोपमाद्वयम्, परस्पराङ्गाङ्गिभावेन सङ्कीर्णम् ॥

कौमुदी

'कृच्छ्रादि'ति–'स्तोकाल्पकृच्छ्रादि'त्यादिना पञ्चमी ॥

श्लोकेस्मिन् 'वन्य'पदं–उच्छृङ्खलताद्योतनार्थम्। 'निदाघ'पदं-दौर्बल्यद्योतनार्थम् ॥

·५·

प्रथमं तावत् तपःसिद्ध्यर्थं स्वजनवियोगदुःखं न चिन्तनीयमित्याह—'मग्नामि'त्यादि ॥

मग्नां द्विपच्छद्मनि पङ्कभूते,
संभावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विपामातपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः ॥३९॥

अन्वयः

पङ्कभूते, द्विपच्छद्मनि, मग्नाम्, सम्भावनाम्, भूतिम्, इव, उद्धरिष्यन्, आधिद्विपाम्, तपसाम्, आप्रसिद्धेः, अस्मत्, विना, भृशम्, मा, उन्मनीभूः ॥

वाच्यान्तरम्

उद्धरिष्यता......त्वया मा उन्मनीभावि ॥

व्याख्या

पङ्कभूते कर्दमतुल्ये "भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयो"रिति विश्वः ॥ *द्विपच्छद्मनि* द्विपतां *शत्रूणाम्*, छद्म छलम्, तस्मिन् प्रतारकवैरिबुद्धावित्यर्थः *मग्नाम्* पतिमातम् उद्धर्त्तमशक्यामिति यावत् *सम्भावनाम्* योग्यताम्, गौरवमिति यावत् *भूतिम्* सम्पदम् "भूतिर्भस्मनि सम्पदी"त्यमरः । *उद्धरिष्यन्* उत्तोलयिष्यन् *आधिद्विपाम्* दुःखच्छिदां मनःक्लेशापहारिणामित्य : । *तपसाम्* तपश्चरणानाम् *आप्रसिद्धेः* सिद्धिलाभपर्य्यन्तम् *अस्मत् विना*

अस्माकं विरहेण *भृशम्* अत्यर्थम् *उन्मनीमाभूः* उत्कण्ठितो माभूः। दौर्म्मनस्यस्य तपःपरिपन्थित्वादितिभावः॥

सरलार्थः

प्रतारकाणां शत्रुणां हस्तात् राज्यं पुनर्लब्धुमिच्छन् तपस्यार्थं वनं गतस्य ते यावत् सिद्धिर्न स्यात् तावदस्माकं कृते उत्कण्ठितो माभूः। यतो बान्धवनिमित्तं सर्वमुत्कण्ठादिकं तपःपरिपन्थि भवति॥

कौमुदी

'आप्रसिद्धे'रित्यत्र-"आङ् मर्यादाभिविध्यो"रित्यनेन पञ्चमी॥ 'अस्मत्, विना' इत्यत्र—"पृथग्विने"त्यादिना विकल्पात् पञ्चमी। 'मा उन्मनीभू'रित्यत्र—"न माङ्योगे"—इत्यनेनाड़ागमनिषेधः। 'उन्मनीभु'रित्यत्र—"अभूततद्भाव इति वक्तव्यमित्यनेन 'च्वि' प्रत्ययः। अरुन्मनश्चक्षुश्चेतोरहोरजसांलोपश्चे"ति—सकारलोपः "अस्यच्वौ"इति—"ई"-कारः॥

-x-

उत्कण्ठानिवृत्तये कारणमाह-'यश'-इत्यादि।

यशोऽधिगन्तुं सुखलिप्सया वा,
मनुष्यसंख्यामतिवर्तितुं वा।
निरुत्सुकानामभियोगभाजां,
समुत्सुकेवाङ्कमुपैति सिद्धिः॥४०॥

अन्वयः

यशः, अधिगन्तुम्, सुखलिप्सया, वा, मनुष्यसंख्याम्, अतिवर्त्ति-

तुम्, वा, अभियोगभाजाम्, निरुत्सुकानाम्, सिद्धि:, समुत्सुका, इव, अङ्कम्, उपैति ॥

वाच्यान्तरम्

सिद्धया समुत्सुकया अङ्कः उपेयते ॥

व्याख्या

यशः कीर्त्तिं *अधिगन्तुम्* लब्धुम् *सुखलिप्सया* लब्धुमिच्छया सुखकामनयेत्यर्थः *मनुष्यसंख्याम्* मनुष्याणां मानवानां संख्या 'अयं मनुष्य' इत्याकारिका मनुष्यमध्ये या गणना ताम् *अतिवर्त्तितुम्* अतिक्रमितुम् मनुष्यशक्तेरतिरिक्तं कर्म्म कर्त्तुं वा—इत्यर्थः *अभियोगभाजाम्* अभियोगं अभिनिवेशं भजन्ते इत्यभियोगभाजः, तेषां अभिनिवेशवतां "भजोण्वि:" इत्यनेन 'ण्वि'प्रत्ययः । निरुत्सुकानां निः नास्ति उत्सुकः उत्कण्ठा येषामिति बहुव्रीहिः समासः, तेषां उत्कण्ठाविरहितानामित्यर्थः *सिद्धिः* पूर्वोक्तयशःसुखाद्यर्थसिद्धिः *समुत्सुका इव* अनुरक्ता कान्ता इव *अङ्कम्* क्रोडम् अन्तिकम् *उपैति* प्राप्नोति ॥

सरलार्थः

ये नराः यशोलाभाय सुखहेतोः अमानुषकर्म्मकरणाय वा अन्तरायभूतां स्त्रीपुत्रादिविरहहेतुकामुत्कण्ठां परित्यज्य कर्म्मसु प्रवर्त्तन्ते, तेषामवश्यमेवाभीष्टसिद्धिः स्यादिति ज्ञात्वा त्वम् अस्मद्विरहजन्यामुत्कण्ठां विनिधूय तपसि प्रवर्त्तस्व ॥

कौमुदी

'मनुष्य'इति—"मनोः ष्य"—इत्यादिना 'ष्य'प्रत्ययः। 'सुखलिप्सये'ति—हेतौ तृतीया। 'लिप्से'ति 'लभेः' सनन्तात् 'अङ्'-प्रत्ययः।

-※-

अर्जुनस्य तपसि प्रवृत्त्यर्थं क्रोधोद्दीपनाय शत्रुकृतं निकारं स्मारयति-'लोकमित्यादिचतुर्भिः श्लोकैः॥

लोकं विधात्रा विहितस्य गोप्तुं,
क्षत्रस्य मुष्णन्वसु जैत्रमोजः।
तेजस्वितायाा विजयैकवृत्ते-
र्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥४१॥

अन्वयः

विधात्रा, लोकम्, गोप्तुम्, विहितस्य, क्षत्रस्य, जैत्रम्, ओजः, वसु, मुष्णन्, विजयैकवृत्तेः, तेजस्वितायाः, प्रियम्, प्राणम्, इव, अभिमानम्, निघ्नन् (निकारः,मे,उपशुष्यत, हृदयम्, नवीकरिष्यती'ति) वक्ष्यमाणपदैरन्वयः॥

वाच्यान्तरम्

मुष्णता......निघ्नता (निकारेण नवीकरिष्यते)॥

व्याख्या

विधात्रा ब्रह्मणा *लोकम्* भुवनम् *गोप्तुम्* रक्षितुम् *विहितस्य* सृष्टस्य *क्षत्रस्य* क्षत्रियजातेः *जैत्रम्* जयशीलम् *ओजः* तेजः, तदेव *वसु* धनम् *मुष्णन्*

अपहरन् शत्रुपराभूतस्य कुत्र क्षात्रं तेज इति भावः *विजयैक-वृत्तेः* विजयः शत्रुपराभवः एव एका वृत्तिः जीवनं यस्याः, तस्याः विजयैकजीविताया इत्यर्थः *प्रियंप्राणमिव* प्रियप्राण-तुल्यम् *अभिमानम्* अहङ्कारम् *निघ्नन्* नाशयन् "निकारो मे हृदयं नवीकरिष्यती"ति वक्ष्यमाणपदैरन्वयः ॥

सरलार्थः

ब्रह्मणा जगतो रक्षणार्थं क्षत्रियाः सृष्टाः तेषां च क्षत्रियाणां तेज एव परमं धनम्, शत्रुजय एव तेजसो जीवनम्, अभिमानं प्राणतुल्यम शत्रुभिर्युष्माकं तेजो नाशितम्, शत्रुपराभूतानां युष्माकं तेजःक्षयात् अहङ्कारनाशाच्च, या दुर्दशासीत् शत्रुकृतं सभायां मम यद्वस्त्राकर्षणादि-कमभवत्, तत् सर्वं कालेन विस्मृतप्रायमधुना पुनस्त्वद्विरहेण नवीभूय मम चेतः पीडयिष्यति, प्रयोजनानुरोधेन तद्दुःखमपि मया सहिष्यते, त्वयापि मम दुःखोन्मूलनाय यतितव्यम् ॥

कौमुदी

जैत्रमिति—'जेतृ'शब्दात, स्वार्थे'ऽण्'प्रत्ययः ॥

-x-

धर्षेपादसहनं प्राणात्ययेषु अपि न त्याज्यमित्याह—'व्रीडानतै'रित्यादि ।

व्रीडानतैराप्तजनोपनीतः,

संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।

वितानभूतं विततं पृथिव्यां,
यशःसमूहन्निव दिग्विकीर्णम् ॥४२॥

अन्वयः

आप्तजनोपनीतः, संशय्य, व्रीडानतैः, नृपैः,कृच्छ्रेण, प्रपन्नः पृथिव्याम्, वितानभूतम्, दिग्विकीर्णम्, विततम्, यशः, समूहन्, इव, ('निकारो मे हृदयं नवीकरिष्यती'ति) वक्ष्यमाणपदैरन्वयः ॥

वाच्यान्तरम्

आप्तजनोपनीतेन...प्रपन्नेन...समूहता (निकारेण नवीकरिष्यते) ॥

व्याख्या

आप्तजनोपनीतः आप्तः स्वकीयः जनः, तेन उपनीतः प्रापितः, तथापि *संशय्य* सन्दिह्य 'भ्रान्त्या एवं दृश्यते नेदं सत्य'मित्येवं संशयं कृत्वा *व्रीडानतैः* व्रीडया लज्जया आनतैः अवनतैः, जुगुप्सितदर्शनात् लज्जयाधोमुखैः *नृपैः* राजभिः सभास्थितैर्नरपतिभिः *कृच्छ्रेण* अतिकष्टेन *प्रपन्नः* अङ्गीकृतः 'गोत्रकलहेषु परैरुदासितव्यम्'-इति उपेक्षमाणैर्नृपै-रनुमोदित इति भावः *पृथिव्याम्* भूमण्डले *वितानभूतम्* चन्द्रातपसदृशम् *दिग्विकीर्णम्* दिक्षु प्रसारितम् *यशः* कीर्त्तिम् *समूहन् इव* संकोचयन्निव *निकारो मे हृदयं नवीकरिष्यतीति* वक्ष्यमाणपदैरन्वयः ॥

सरलार्थः

शत्रवः सभायां समुपस्थितानां राज्ञां पुरतोऽस्माकं यादृशीमवमाननां कृतवन्तः राजानश्च तादृशमवैधं व्यापारं विलोक्य तदानीं किं कर्त्तव्यता-

विमूढा हतबुद्धयः सन्तः यामुपेक्षितवन्तः तयावमाननयाऽस्माकं दिक्षु विस्तृतं यशः संकुचितमिव, अतोऽयं निकारः सम्प्राप्ते त्वद्विरहेण मां पुनः पीडयिष्यतीति तत्प्रतिकारे मनो निवेशय। 'आप्तजनोपनीत'इति—विशेषणस्य 'प्रपन्नः' इतिपदार्थं प्रति हेतुतया काव्यलिङ्गमलङ्कारः ॥

कौमुदी

'नृपै'रिति-कर्त्तरि तृतीया। 'यश'इति— समूहन्नि'ति शत्रन्तस्य कर्म्मणि "न लोकाव्यये"त्यादिना 'षष्ठी प्रतिषेधात् द्वितीयैव ॥

-x-

पुनस्तमेव निकारं विशिनष्टि--'वीर्यावदानेष्वि'त्यादि ॥

वीर्य्यावदानेषु कृताभिमर्श-
स्तन्वन्नभूतामिव सम्प्रतीतिम् ।
कुर्वन् प्रयामक्षयमायतीना-
मर्कत्विषामह्न इवावशेषः ॥४३॥

अन्वयः

वीर्यावदानेषु, कृतावमर्षः, संप्रतीतिम्, अभूतामिव, तन्वन्, अह्नः, अवशेषः, अर्कत्विषाम्, इव, आयतीनाम्, कुर्वन्, (निकारः हृदयं नवीकरिष्यतीति वक्ष्यमाणपदैरन्वयः) ॥

वाच्यान्तरम्

कृतावमर्षेण......तन्वता......अवशेषेण......कुर्वता (निकारेण नवीकरिष्यते) ॥

व्याख्या

वीर्यावदानेषु वीर्याणि एव अवदानानि वीरत्वप्रकाशरूप-कर्म्माणि, तेषु "अवदानं कर्म्म वृत्त"मित्यमरः" *कृतावमर्षः* कृतास्कन्दनः पूर्वकृतानि वीरत्वख्यापकानि कर्म्मजातानि प्रमृजन् इति भावः। अत एव *सम्प्रतीतिम्* ख्यातिं "प्रतीते प्रथितख्यातिवित्तविज्ञातविश्रुता"इत्यमरः। *अभूताम् इव* अविद्यमानामिव *तन्वन्* प्रकाशयन कुर्वन्निति यावत् *अह्नः* दिनस्य *अवशेषः* चरमांशः *अर्कत्विषामिव* अर्कस्य सूर्यस्य त्विषाम् इव किरणानामिव *आयतीनाम्* उत्तरकालानाम् *प्रयामक्षयम्* दैर्घ्यनाशम् *कुर्वन्निव* जनयन्निव "अयं निकारो मे हृदयं नवीकरिष्यती"त्युत्तरेणान्वयः॥

सरलार्थः

शत्रुभिर्भवतां योऽयं पराभवः कृतस्तेन भवतां पुराकृतानि वीर्य-ख्यापकानि प्रख्यातान्यपि कर्म्माणि प्रोज्झितानीव। दिनावसानसमये यथा सूर्यरश्मयः क्षीणाः भवन्ति तथैव भवतामुत्तरकालोऽपि शत्रुकृत-पराभवबलादेव क्षीणतामापन्न इति निकारमिमं स्मृत्वा नितरां खेद-मुपयामि। भवान् तपसा पुनरभ्युदयं सम्पादयन् तं खेदमपनयतु॥ अत्र'सम्प्रतीतिमभूतामिवे'त्युत्प्रेक्षालङ्कारः। सम्प्रतीतेर्विद्यमानाया अपि 'अभूतामिवे'त्यनेनाऽविद्यमानत्वोत्प्रेक्षणात्। 'अह्न अवशेषइवे'त्युप-मालङ्कारः। 'आयतीनां प्रयामक्षयं कुर्वन्' इति—'निकारेण' सह, साध-र्म्य प्रतिपादनात्। ततश्च तयोर्मिथो निरपेक्षतयावस्थानात् संसृष्टिः।

-x-

निकारस्वरूपमुपसंहरति-'प्रसह्ये'त्यादि ॥

प्रसह्य योऽस्मासु परैः प्रयुक्तः,
स्मर्त्तुं न शक्यः किमुताधिकर्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः,
स त्वद्विना मे हृदयं निकारः ॥४४॥

अन्वयः

परैः, अस्मासु, प्रसह्य, प्रयुक्तः, यः, स्मर्तुं, न, शक्यः, अधिकर्त्तुम् किमुत, सः, निकारः, त्वत्, विना, आर्द्रः, (सन्) उपशुष्यत्, मे हृदयं नवीकरिष्यति ॥

वाच्यान्तरम्

प्रयुक्तेन...येन....शक्येन (भूयते), तेन निकारेण त्वत् विना आर्द्रेण (सता) उपशुष्यत् मे हृदयं नवीकरिष्यते ॥

व्याख्या

परैः शत्रुभिः *अस्मासु प्रसह्य* अस्मान् प्रति बलात् *प्रयुक्तः* कृतः *यः* यो निकारः *स्मर्त्तुम्* मनसा चिन्तयितुम् *न शक्यः* न योग्यः *अधिकर्त्तुम्* अनुभवितुम् किमुत* किमु वक्तव्यम्* *सः निकारः* सभायां मदीयकेशाम्बरादिसमाकर्षणरूपः परिभवः *त्वत् विना* तव विरहेण *आर्द्रः सन्* सिक्तः सरसः सन् नवीनः सन्नित्यर्थः *उपशुष्यत्* शुष्कतां गच्छत् अपि *मे* मम *हृदयं* चेतः पुनः *नवीकरिष्यति* आर्द्रीकरिष्यति, व्रणमिवेतिशेषः । यथा

शुष्कप्रायमपि क्षतं कुतश्चिदाघातात् पुनरार्द्रं सत् नूतनं भवति, तथैव विस्मृतप्रायमपि शत्रुपरिभवजनितं दुःखमद्य तव विरहेण नूतनमिव भविष्यतीति भावः ॥

सरलार्थः

सभायां मदीयकशाम्बरादिकर्षणरूपो योऽयं परिभवः शत्रुभिरस्मासु बलाद् विहितः स खलु निकारः कालक्रमेण विस्मृतप्राय इव आसीत् तन्निकारजं दुःखं स्मर्तुमपि न शक्नोमि का कथा तदनुभवस्य, सोयं निकारः पुनरिदानीं तव विरहदुःखेन स्मृतावाविर्भूतः सन् मम चेता भृशं पीडयति, अतः प्रार्थयेऽहं भवन्तं यद् भवान् तपःसिद्धिं प्राप्य शत्रूणां तन्निकारस्य वैरशुद्धया मम चेतःप्रसादं विदधातु अत्र प्रस्तुतेनाप्रस्तुतव्रणव्यवहारप्रतीतेः'समासोक्ति'रलङ्कारः ।

कौमुदी

'अस्मासु'इति-विषयसप्तमी। 'त्वद् विने ति -''पृथग् विने'' त्यादिना विनायोगे पञ्चमी ।

-※-

द्रौपदी पुनरर्जुनस्य विशेषेण क्रोधोद्दीपनाय त्रिभिरर्जुनस्य शत्रुपराभवकृतां दुरवस्थामाह —'प्राप्तोऽभिमाने' त्यादि ॥

प्राप्तोऽभिमानव्यसनादसह्यं,
दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः,
शरद्घनाकीर्ण इवादिरह्नः ॥४५॥

अन्वयः

अभिमानव्यसनात्, दन्तव्यसनात्, दन्ती, इव, असह्यं विकारं, प्राप्तः द्विषत्प्रतापान्तरितोरुतेजाः, शरद्घनाकीर्णः, अह्नः, आदिः, इव, (त्वम्-अन्यम्, आकारम्, अभिपन्नः) ॥

वाच्यान्तरम्

दन्तिना...प्राप्तेन...तेजसा...शरद्घनाकीर्णेन...आदिना ॥

व्याख्या

अभिमानव्यसनात् अभिमानस्य गर्वस्य, व्यसनात् भ्रंशात्, "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे" इत्यमरः *दन्तव्यसनात्* दन्तस्य व्यसनात् भङ्गात् *दन्ती इव* हस्ती इव "दन्ती दन्तावलो हस्ती" इत्यमरः *असह्यं* सोढुमशक्यम् *विकारम्* विकृतिं अवस्थान्तरमिति यावत् *प्राप्तः* उपगतः, अतो न प्रत्यभिज्ञायसे इति भावः *द्विषत्प्रतापान्तरितोरुतेजाः* द्विषतां शत्रूणां प्रतापेन वीर्येण, तेजसा इति यावत्, अन्तरितं तिरस्कृतम् उरु महत् तेजः प्रतापो, यस्य सः शत्रुप्रतापेन हतशक्तिरित्यर्थः* शरद्घनाकीर्णः* शरदि शरत्काले समुत्पन्नो यो घनो मेघः, तेन आकीर्णः व्याप्तः *अह्नः* दिवसस्य *आदिः इव* प्रथमांश इव, प्रत्यूष इवेत्यर्थः। 'त्वमन्यमाकारं प्राप्त' इति तृतीयश्लोकोक्तपदैरन्वयः ॥

सरलार्थः

यथा गजो दन्तभङ्गेन विकारं प्राप्तः कृच्छ्रेण 'सोयमि'ति प्रत्यभिज्ञायते, तथैव शत्रुभिस्तव दर्पस्य शातनात् त्वमपि अन्य इव

जात इति कथञ्चित् प्रत्यभिज्ञायसे, यथा शरदि दिवसस्य प्रथमांशो मेघेन सूर्यरश्मीनां छादनाद् निस्तेजा इवाऽभिलक्ष्यते तथा शत्रूणां प्रतापेन तव तेजसोऽभिभवात् त्वमपि निर्वीर्य इव लक्ष्यसे । अत्र 'दन्तीवे'ति—'अह्न,आदिरिवे'ति-चोपमाद्वयस्य मिथो निरपेक्षतया-वस्थानात् संसृष्टिः ॥

कौमुदी

'द्विषत्प्रतापान्तरितोरुतेजा'इति द्विषतां प्रताप' इति-षष्ठीतत्पुरुषः, तेन-अन्तरितं-इति तृतीयातत्पुरुषः, तादृशं उरु तेजो यस्य स इति बहुव्रीहिः ।

*

पुनरपिप्रकारान्तरेण मन्युमुद्दीपयितुमाहसव्रीडेत्यादि ।

सव्रीड़मन्दैरिव निष्क्रियत्वा-
दत्यर्थमस्त्रैरवभासमानः ।
यशःक्षयात् क्षीणजलार्णवाभ-
स्त्वमन्यमाकारमिवाभिपन्नः ॥४६॥

अन्वयः

निष्क्रियत्वात्, सव्रीडमन्दैः, इव, अस्त्रैः, अत्यर्थम्, न, अवभासमानः, यशःक्षयात्, क्षीणजलार्णवाभः, त्वम्, अन्यमाकारम्, अभिपन्नः, इव, ॥

वाच्यान्तरम्

अवभासमानेन...क्षीणजलार्णवाभेन त्वया...अभिपन्नेन भूयते ॥

व्याख्या

निष्क्रियत्वात् निः नास्ति, क्रिया क्षत्रियकर्म वेधनादिकं येषां तेषां भावः तस्मात् क्षत्रियजनोचितकर्म्मरहितत्वादित्यर्थः *सव्रीडमन्दैः इव* व्रीडया लज्जया सह वर्त्तमानानि सव्रीडानि सलज्जानि, अत एव मन्दानि कर्माक्षमाणि तैः जातलज्जैः कर्म्माक्षमैरिव स्थितैः "मूढाल्पा पटुनिर्भाग्या मन्दाः" इत्यमरः *अस्त्रैः* आयुधैः *अत्यर्थम्* अतिमात्रम् *न अवभासमानः* न प्रकाशमानः अपि च *यशःक्षयात्* यशसां कीर्त्तीनां क्षयात नाशात् *क्षीणजलार्णवाभः* क्षीणानि जलानि यस्य सः क्षीणजलः,—तादृशो योऽर्णवः समुद्रः, "समुद्रोऽब्धिरकूपारः... सरस्वान् सागरोऽर्णवः" इत्यमरः तस्य आभा इव आभा यस्य सः कीर्त्तिक्षयवशात शुष्कसमुद्रसदृश इत्यर्थः *त्वम्* भवान् *अन्यं* अपरम् *आकारम्* आकृतिम् *अभिप्रपन्न इव* प्राप्त इव, असीति शेषः ।

सरलार्थः

इमानि भवतो धनुःशरादीनि अस्त्राणि शत्रूणां प्रभावेण किंचिदपि क्षत्रियोचितं कर्म्म कर्त्तुमक्षमाणि सन्ति लज्जितानीव, अत एव यशसां क्षयेण शुष्कः समुद्र इव कामपि दुरवस्थां प्राप्तवानिति, अहो ते भाग्यविपर्ययो नितरामेवानुशोचनीयः । अत्र 'क्षीणजलार्णवाभः' इत्युपमा 'अन्यमाकारमभिपन्न'इवेत्युत्प्रेक्षा, चानयोः संसृष्टिः ॥

-x-

पुनरन्यथोद्दीपयति—दुःशासनेत्यादि ।

दुःशासनामर्षरजोविकीर्णै-
रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः,
कच्चित्स एवासि धनञ्जयस्त्वम् ॥४७॥

अन्वयः

दुःशासनामर्षरजोविकीर्णैः, विनाथैः, इव, भाग्यनाथैः, एभिः, केशैः, कदर्थीकृतवीर्यसारः, त्वम्, स, एव, धनञ्जयः, असि, कच्चित् ॥

वाच्यान्तरम्

कदर्थीकृतवीर्यसारेण त्वया तेन एव धनञ्जयेन भूयते कच्चित् ॥

व्याख्या

दुःशासनामर्षरजोविकीर्णैः दुःशासनस्य दुर्योधनानुजस्य आकर्षः आकर्षणं, स एव रजो धूलिः, सभायां पश्यतामेव सर्वेषां युष्माकं पुरतः दुःशासनेन मदीयाः केशाः कृष्टाः इति मालिन्यहेतुतया धूलिरूपैराकर्षणैः विकीर्णाः विक्षिप्ताः, तैः अत एव *विनाथैः इव* विगतो नाथः प्रभुर्येषां तैः, स्थितेष्वपि युष्मासु न रक्षितैरिति नाथहीनैरिवेत्यर्थः *भाग्यनाथैः* भाग्यं दैवं "दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधि"रित्यमरः। तदेव नाथो येषां तैरिव, अशरणत्वात् भाग्यैकशरणैरिति भावः *केशैः* शिरोरुहैः "कचः केशः शिरोरुह"इत्यमरः *कदर्थीकृतवीर्यसारः* वीर्यं शौर्यम्, सारो बलम्, तौ वीर्यसारौ, कदर्थीकृतौ गर्ह्यौ कृतौ यस्य तादृशः *त्वम् स एव* य स्तवमु-

त्तरान् कुरूनपि विजित्य धनमाहृतवान् तादृशो यः *धनञ्जयः* 'धनञ्जय' इति नाम्ना ख्यातः *असि कच्चित्* यस्य तव पुरत एव शत्रुभिरिमे केशाः कृष्टाः, मन्ये त्वं न स धनञ्जयः। धनञ्जयोहि कथमेतत् सहेत इतिभावः॥

सरलार्थः

पुरा सभायां पश्यतस्तव पुरत इमे केशाः शत्रुभिः कृष्टाः समन्तात् विक्षिप्ता अभवन् नहि पत्यौ जीवति भार्यायाः केशानामेतादृशी-दुर्गतिः क्वापि दृष्टा तत्र स्थितेऽपि त्वयि रक्षितुरभावादिमे केशा अशरणा दैवैकशरणा बभूवुः इत्थमेभिः केशैस्तदानीं ते शौर्यं बलं चाकिञ्चित्करं गर्हणीयमिति सम्यक् प्रमाणीकृतम्, किं बहुना यो हि धनञ्जयो दुर्धर्षानुत्तरान् कुरून् विजित्य धनमाहृतवान् तस्यापि पुरतः मम केशानामेतादृश्यवस्था न कथमपि सम्भाव्यते अतो मन्ये त्वं न स धनञ्जय इति। अथवा यदि च त्वं स एवासि तदा न कथमप्येतन्मर्षणीयं भवतः। स इव चेत् त्वं नैवमस्मानुपेक्षेथाः॥

कौमुदी

'कच्चिदि'त्यव्ययम् "कच्चित् कामप्रवेदने" इत्यमरः। 'कदर्थीकृत' इव-कुत्सितः अर्थः इति वाक्ये "कोः कत् तत् पुरुषेऽचि" इति कदादेशः कदर्थः, ततः अकदर्थः कदर्थः कृतः इति कदर्थीकृतः 'अभूततद्भावे च्विः'।

-x-

उपेक्षायां दोषमाह—'स क्षत्रिय'—इत्यादि॥

स क्षत्रियस्त्राणसहः सतां य-

स्तत्कार्मुकं कर्मसु यस्य शक्ति

वहन्द्वयीं यद्यफलेऽर्थजाते,

करोत्यसंस्कारहतामिवोक्तिम् ॥४८॥

अन्वयः

यः, सताम्, त्राणसहः, सः, क्षत्रियः, यस्य, कर्म्मसु, शक्तिः, तत्, कार्म्मुकम्, द्वयीम्, उक्तिम्, यदि, अफले, अर्थजाते, वहन्, (तदा) (तामुक्तिं), असंस्कारहतामिव, करोति ॥

वाच्यान्तरम्

येन...त्राणसहेन भूयते, तेन क्षत्रियेण भूयते,...शक्तया भूयते तेन कार्मुकेण भूयते,...वहता द्वयी उक्तिः असंस्कार हता इव क्रियते ॥

व्याख्या

यः यो नरः *सताम्* साधूनाम् *त्राणसहः* रक्षणक्षमः *सः* स नरः *क्षत्रियः* क्षत्रियपदवाच्यः भवतीति शेषः क्षतः त्रायते यः स क्षत्रः, स एव क्षत्रिय इति व्युत्पत्त्यर्थलाभादन्वर्थसंज्ञः क्षत्रिय इत्यर्थः *यस्य* यस्य वस्तुनः *कर्म्मसु* युधि छेदनभेदनपातनादिकार्येषु *शक्तिः* सामर्थ्यम् अस्तीतिशेषः *तत्* तद् वस्तु *कार्मुकम्* धनुःसंज्ञं कार्मुकपदवाच्यमिति यावत्, भवतीतिशेषः । 'कर्म्मसु प्रभवतो'ति व्युत्पत्त्यर्थलाभात्तदेवान्वर्थं कार्मुकमित्यर्थः *द्वयीं उक्तिम्* 'क्षत्रिय'इति 'कार्मुकमि'ति च उक्तिम् *यदि* चेत् ! *अफले* नास्ति फलं ययो स्ते, नामानुरूपकार्यकरणे सामर्थ्याभावात् नाममात्रप्रयोजने *अर्थजाते* क्षत्रियकार्मकवाच्ये व्यक्तिरूपे

वहन् प्रापयन् *तदा* तर्हि उक्तिम् *असंस्कारहतामिव* क्षत्रियकार्मुकयोरुक्तिं च्युतसंस्कारदोषेण दूषिताम् इव *करोति* विदधाति ॥

सरलार्थः

यः सज्जनान् दस्युप्रभृतिपीडनजनितक्षतात् त्रायते स क्षत्रिय इति 'क्षत्रिय' शब्दस्य व्युत्पत्तिलभ्योऽर्थः। युधि शत्रूणां छेदपातादिषु यत् प्रभवति तत् 'कार्मुकमि'ति 'कार्मुक'शब्दस्य व्युत्पत्तिलभ्योर्थः। अतः यः क्षत्रियः सतां रक्षणे समर्थः स एवान्वर्थनामा क्षत्रियः॥ तस्य च कार्मुकं युधि शत्रूणां छेदपातादिषु समर्थं तदेवान्वर्थसंज्ञं कार्मुकम्, यः क्षत्रियः सन्नपि सतां रक्षणेऽसमर्थो भवति,यस्य च कार्मुकं युधि अकिञ्चित्करम् स नाममात्रबोधकं 'क्षत्रिय'इति 'कार्मुकमि' ति च शब्दद्वयं दधाति तेन तच्छब्दद्वयं व्युत्पत्त्यर्थविरहाच्च्युत-संस्कारदुष्टमिव विधीयते। अत्र उत्प्रेक्षालङ्कारः।

कौमुदी

'क्षत्रिय'इति 'क्षत त्रायते'-इतिक्षत्र:"सुपि"इति योगविभागात् 'क'प्रत्ययः पृषोदरादित्वात् पूर्वपदस्यान्तलोपः। 'क्षत् इति-'क्विप् प्रत्ययान्तः शब्दः। 'क्षत्रात्-जात' इति-क्षत्रियः। "क्षत्राद्घ 'इति'घ'प्रत्ययः। 'कार्म्मुकमि'ति-कर्म्मणि प्रभवतीति "कर्म्मण उकञ्" इत्युकञ्-प्रत्ययः॥

-x-

अथ त्वं यदि अस्मान् दुःखमुक्तान् न करोषि तदा ते गुणा अपि नोज्जीवेयुरित्याह-'वीतौजस' इत्यादि॥

वीतौजसः सन्निधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः,
सरूपतां पार्थ गुणा भजन्ते ॥४९॥

अन्वयः

हे पार्थ!, वीतौजसः, सन्निधिमात्रशेषाः, भवत्कृताम्, भूतिम्, अपेक्षमाणाः, त्वदीया गुणाः, समानदुःखाः, इव, नः, सरूपताम्, भजन्ते ॥

वाच्यान्तरम्

वीतौजोभिः सन्निधिमात्रशेषैः......अपेक्षमाणैः त्वदीयैर्गुणैः समानदुःखैरिव सरूपता भज्यते ॥

व्याख्या

हे पार्थ! हे अर्जुन! *वीतौजसः* वीतम् अपगतम् ओजस्तेजो येषां, ते प्रभावरहिता इत्यर्थः *सन्निधिमात्रशेषाः* सन्निधिरेवेति सन्निधिमात्रं सत्तामात्रम् शेषम् अवशिष्टं येषां ते सत्तामात्रावशिष्टाः *भवत्कृताम्* भवता त्वया कृतां सम्पादिताम् *भूतिम्* सम्पदम् *अपेक्षमाणाः* आशंसन्तः *त्वदीयाः* भवत्सम्बन्धिनः *गुणाः* वीर्यादयः *समानदुःखा इव* समानं तुल्यं दुःखं येषां ते तुल्यखेदाः इव *नः* अस्माकम् *सरूपताम्* तुल्यताम् *भजन्ते* श्रयन्ति ॥

सरलार्थः

यथा वयं शत्रुभिः परिभूता निर्वीर्या यथाकथञ्चित्मृतप्राया अपि

सत्तामात्रावशिष्टाः पुनरभ्युदयाय भवन्तमपेक्षामहे, तथैव शत्रुपरिभूतस्य तव गुणा अपि अकिञ्चित्करत्वात् निस्तेजस्काः कथञ्चित् सत्तामात्रेण स्थिताः त्वत्कृतमभ्युदयमपेक्षमाणा वर्त्तन्ते ।

कौमुदी

'सरूपतामि'ति–समानं रूपं येषां ते सरूपाः, तेषां भाव इति भावे 'तल' । 'पार्थ' इति–पृथायाः अपत्यम् इत्यण्–प्रत्ययः ।

-x-

एतत्कार्यभागग्रहणयोग्यस्त्वमेव नान्योऽस्त्यस्माकं कोऽपीत्याह—'आक्षिप्यमाणमि'त्यादि ॥

आक्षिप्यमाणं रिपुभिः प्रमादा–
न्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा,
दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥५०॥

अन्वयः

प्रमादात्, रिपुभिः, आक्षिप्यमाणम्, नागैः, आलूनसटम्, मृगेन्द्रम्, इव, त्वाम्, इयम्, धूः, तिग्मरश्मिम्, दीप्त्या, दिनश्रीः, इव, योग्यतया, अधिरूढा ॥

वाच्यान्तरम्

आक्षिप्यमाणः......आलूनसटः मृगेन्द्रः इव त्वम् अनया धुरा तिग्मरश्मिः... ...दिनश्रिया :...अधिरूढः ॥

व्याख्या

प्रमादात् अनवधानात् "प्रमादोऽनवधानता"इत्यमरः अवहेलया इत्यर्थः, न तु शक्तिहीनत्वादिति भावः *रिपुभिः* शत्रुभिः दुर्योधनादिभिरित्यर्थः *आक्षिप्यमाणम्* अभिभूयमानं तिरस्क्रियमाणं इतियावत् *नागैः* गजैः *आलूनसटम्* आलूनाः छिन्नाः, सटाः केशराः यस्य तम् "सटा जटाकेशरयो" रित्यमरः। *मृगेन्द्रम् इव* मृगेषु पशुषु इन्द्रम् श्रेष्ठं पशुराजम् सिंहम् इव *त्वाम* भवन्तम् *इयं धूः*पुनरभ्युदयलाभाय तपश्चरणरूपः कार्यभारः *तिग्मरश्मिम्* तिग्माः तीक्ष्णाः रश्मयः किरणाः यस्य, तम सूर्यम् *दिनश्रीः* दिनस्य दिवसस्य श्रीः शोभा इव योग्यतया कार्यनिर्वाहशक्तिमत्तया *अधिरूढा* आश्रितवती।

सरलार्थः

यथा गजाः केशरिणोऽनवधानतया कदाचित् केशरान् लूनन्ति तथैव तवानवधानतया शत्रवस्त्वां परिभूतवन्तः, त्वमेव पुनस्तपसा वीर्यातिशयं प्राप्य तान् शत्रून् विहन्तुं समर्थ इति, यथा दीप्तिशालितया दिनशोभा सूर्यमेवावलम्बते, तथा पुनरभ्युदयलाभाय तपश्चरणादिकार्यभारोऽपि त्वामेवावलम्बते, अतस्त्वमपि भारमिमं प्रतिपद्यस्व।

कौमुदी

'प्रमादादिति'—हेतौ पञ्चमी, ल्यबलोपे वा प्रमादं प्राप्येत्यर्थः। रिपुभिरिति कर्त्तरि तृतीया, नागैरिति कर्त्तरि तृतीया, योग्यतया दीप्त्या चोभयत्र हेतौ तृतीया, अधिरूढेति रुहेः कर्त्तरि क्तप्रत्ययः॥

-x-

एवं कार्यभारग्रहणे हेतुं प्रदर्श्य एतादृगन्यविलक्षणकार्य-सम्पादनस्य गुणमाह—करोतीत्यादि।

करोति योऽशेषजनातिरिक्तां,
सम्भावनामर्थवतीं क्रियाभिः।
संसत्सु जाते पुरुषाधिकारे,
न पूरणी तं समुपैति संख्या ॥५१॥

अन्वयः

यः, अशेषजनातिरिक्तां, सम्भावनां, क्रियाभिः, अर्थवतीं, करोति, संसत्सु, पुरुषाधिकारे, जाते, पूरणी, संख्या, तं, न समुपैति,।

वाच्यान्तरम्

येन अशेषजनातिरिक्ता सम्भावना...अर्थवती क्रियते......पूरण्या संख्यया स न समुपेयते ॥

व्याख्या

यः यो जनः *अशेषजनातिरिक्तां* अशेषाः निखिलाः जनाः लोकाः तेभ्यः अतिरिक्तां अतिशायिनीम् स लोकाधिका-मित्यर्थः *संभावनां* योग्यतां पौरुषमित्यर्थः *क्रियाभिः* कर्म्मभिः *अर्थवतीं* सफलां *करोति* विदधाति *संसत्सु* सभासु "सभासमितिसंसदः" इत्यमरः *पुरुषाधिकारे* पुरुषाणां योग्यतावतां जनानां अधिकारे गणनावसरे गणना-प्रस्तावे इत्यर्थः *जाते सति* समुत्पन्ने सति *पूरणी संख्या* द्वितीयादिसंख्या *तं* तादृशं सर्वजनातिगं क्रियाभिः पौरुषं

सफलं कुर्वन्तम् *न समुपैति* न प्राप्नोति सोऽद्वितीय एव भवति आदावेव तस्य नाम गृह्यते इति भावः। अतस्त्वमपि तथा कृत्वात्मगुणान् सम्भावयेत्यभिप्रायः ॥

सरलार्थः

अस्मिन् संसारे यः पुमान् लोकातिगं पराक्रमं प्राप्य तं पौरुषं प्रदर्श्य सफलं करोति योग्यतावतां वीरपुरुषाणां गणनाप्रस्तावे स एव प्रथमतः परिगण्यते अतस्त्वमपि स्वपौरुषं सफलीकर्तुमर्हसि ॥

*

आशीर्वादेन वचनमुपसंहरति-प्रियेष्वित्यादि ।

प्रियेषु यः पार्थ विनोपपत्ते-
विचिन्त्यमानैः क्लममेति चेतः ।
तव प्रयातस्य जयाय तेषां,
क्रियादघानां मघवा विघातम् ॥५२॥

अन्वयः

हे पार्थ, प्रियेषु, उपपत्तेः, विचिन्त्यमानैः, यैः, चेतः, क्लममेति, जयाय, प्रयातस्य, तव, तेषाम्, अघानाम्, मघवा, विघातं, क्रियात् ॥

वाच्यान्तरम्

चेतसा क्लम ईयते......मघोना विघातः क्रियेत ॥

व्याख्या

हे पार्थ पृथापुत्र अर्जुन *प्रियेषु* अस्मासु प्रियजनेषु *उपपत्तेः* कारणात *विना* व्यतिरेकेण *विचिन्त्यमानैः*

मनसा आलोच्यमानैः *यैः* यैरघैः दुःखैरनिष्टैरिति यावत् "दुःखैनोव्यसनेष्वघम्" इत्यमरः। *चेतः* चित्तं *क्लमम्* खेदं *एति* प्राप्नोति *जयाय* शत्रुजयार्थं *प्रयातस्य* तपः कर्त्तुं प्रस्थितस्य *तव* भवतः *तेषामघानां* तेषां दुःखानां *मघवा* इन्द्रः *विघातं* नाशं *क्रियात* कुरुतात्।

सरलार्थः

जयार्थं तपसि प्रस्थितस्य हेतुं विनापि मनसि समुत्पन्नैरस्माकं दुःखैस्तव चित्तं नितरां खिन्नं भवति। भगवानिन्द्रः तानि तव प्रियजननिमित्तानि दुःखानि समुपशमयतु ॥

कौमुदी

प्रियेषु इति विषयसप्तमी, उपपत्तेरिति "पृथग्विने"त्यादिना पञ्चमी, जयेति "तुमर्थाच्च भाववचना"दिति चतुर्थी, अघानामिति कृद्योगे कर्म्मणि षष्ठी। क्रियादिति "आशिषि लिङ्" ॥

-x-

सम्प्रति विशेषेण स्वकर्त्तव्ये सावधानेन भवितव्यमित्याह मा गा इत्यादि।

मा गाश्चिरायैकचरः प्रमादं,
वसन्नसम्बाधशिवेऽपि देशे।
मात्सर्यरागोपहतात्मनां हि,
स्खलन्ति साधुष्वपि मानसानि ॥५३॥

अन्वयः

असम्बाधशिवे, अपि, देशे, चिराय एकचरः, वसन्, प्रमादं, मा गाः, मात्सर्यरागोपहतात्मनां, मानसानि, साधुषु, स्खलन्ति, हि ॥

वाच्यान्तरम्

एकचरेण वसता प्रमादः मा गायि,...मानसैः स्खल्यते ।

व्याख्या

***असम्बाधशिवे* नास्ति संबाधः संकटं "संकटं ना तु सम्बाधः" इत्यमरः, यस्मिन् सोऽसम्बाधः संकटरहितः अत एव शिवः मङ्गलमयः इति कर्म्मधारयः निःसङ्कटे मङ्गलमये चेत्यर्थः *देशे* प्रदेशे स्थाने *चिराय* दीर्घकालं *एकचरः* चरतीति चरः एकश्चासौ चरश्चेति एकाकीत्यर्थः *वसन्* निवसन् *प्रमादं*दौर्बल्यं *मा गाः* न प्राप्नुहि *मात्सर्यरागोपहतात्मनां* मत्सरस्य भावः मात्सर्यं द्वेषः रागः स्नेहः ताभ्याम् उपहतः दूषितः आत्मा चित्तं येषां तेषां रागद्वेषदूषितचित्तानामित्यर्थः *मानसानि* मनांसि *साधुषु अपि* सज्जनेषु अपि *स्खलन्ति* विकृतानि भवन्ति *हि* अवश्यम् ॥**

सरलार्थः

त्वं यस्मिन् स्थाने तपश्चरिष्यति तत्स्थानं निर्विघ्नमतीव कल्याणयुक्तं चेति मनसिकृत्य त्वं एकाकीति दौर्बल्यं न प्राप्नुहि । तत्रापि सर्वदा त्वया सावधानेन भवितव्यं यथा कश्चिद् हिंस्रः तपोविघ्नं न कुर्यात् रागद्वेषदूषितचित्तानां हिंस्राणां परेषामनिष्टाचरणं स्वभाव इति पुरुषदोषेण विनापि ते हिंसन्ति इति विज्ञातव्यम् । अत्र पराधगत-

वाक्यार्थस्य पूर्वार्धगतवाक्यार्थं प्रत्युपपादकहेतुतयोपन्यासात् काव्यलिङ्गमलङ्कारः ।

कौमुदी

चिरायेत्यव्ययम् । "आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि" इति मेदिनी ॥

-x-

पुनरुत्साहवर्धनायाह—तदिति ।

तदाशु कुर्वन्वचनं महर्षे-
मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वास्मि कृतार्थमेव,
स्तनोपपीडं परिरब्धुकामा ॥५४॥

अन्वयः

तद्, आशु, महर्षेः, वचनं, कुर्वन्, नः, मनोरथान्, सफलीकुरुष्व, कृतार्थम्, प्रत्यागतम्, एव, त्वा, स्तनोपपीडं, परिरब्धुकामा, अस्मि ॥

वाच्यान्तरम्

कुर्वता त्वया मनोरथाः सफलीक्रियन्ताम्......परिरब्धुकामया मया भूयते ॥

व्याख्या

तद् तस्मात् कारणात् *आशु* शीघ्रं "सत्वरं चपलं तूर्णमविलम्बितमाशु च" इत्यमरः *महर्षेः* वेदव्यासस्य *वचनं* वाक्यं *कुर्वन्* प्रतिपालयन् तपः कुर्वन्नित्यर्थः *नः*

अस्माकं *मनोरथान्* अभिलाषान् *सफलीकुरुष्व* परिपूरय *कृतार्थं* कृतः सम्पादितः अर्थः प्रयोजनं येन तं कृतकृत्यमित्यर्थः *प्रत्यागतं एव* प्रत्यावृत्तं तपस्यया प्राप्तसिद्धिं गृहं प्रतिनिवृत्तमित्यर्थः *त्वा* त्वाम् *स्तनोपपीडं* स्तनद्वयेन उपपीड्य *परिरब्धुकामा* परिरब्धुम् आलिङ्गितुम् कामः अभिलाषो यस्याः सा आलिङ्गनाभिलाषिणीत्यर्थः *अस्मि* भवामि ॥

सरलार्थः

महर्षेः वेदव्यासस्य उपदेशवचनं प्रमाणीकुर्वन् त्वम् तपःसिद्धिं प्राप्य अस्माकं मनोभिलाषान् पूरय यदा तु सिद्धिं प्राप्य प्रत्यागमिष्यसि तदैव त्वाम् स्तनाभ्यां परिपीड्य गाढमालिङ्गिष्यामि ॥

कौमुदी

सफलीकुरुष्वेति प्रार्थनायां लोट् । त्वेति "त्वामौ द्वितीयायामिति त्वादेशः । स्तनोपपीडमिति स्तनयोरुपपीड्येति "सप्तम्यां चोपपीडरुधिकर्षः" इति णमुल् ।

अथ द्रौपद्याभिहितं समुत्तेजनं वचनमाकर्ण्यार्जुनः शत्रुपराभव स्मरन् यमवस्थाविशेषमाप तां वर्णयति द्वाभ्याम्—उदीरितामित्यादि ।

उदीरितां तामिति याज्ञसेन्या,
नवीकृतोद्ग्राहितविप्रकाराम् ।

आसाद्य वाचं स भृशं दिदीपे,
काष्ठामुदीचीमिव तिग्मरश्मिः ॥५५॥

अन्वयः

सः, इति, याज्ञसेन्या, उदीरितां, नवीकृतोद्ग्राहितविप्रकारां, तां, वाचम्, आसाद्य, उदीचीं, काष्ठाम्, (आसाद्य) तिग्मरश्मिः, इव, भृशं, दिदीपे ॥

वाच्यान्तरम्

तेन......तिग्मरश्मिना......दिदीपे ॥

व्याख्या

सः पार्थः *इति* इत्थं *याज्ञसेन्या* यज्ञसेनस्य यज्ञसेननामकस्य राज्ञः अपत्यं स्त्री याज्ञसेनी द्रौपदी तया *उदीरितां* कथितां *नवीकृतोद्ग्राहितविप्रकारां* अनवो नवः कृतः इति नवीकृतः विस्मृतवृत्तान्तस्य पुनरुत्थापनात् नूतनीकृत्य स्मारित इत्यर्थः, अत एव उद्ग्राहितः पुनरनुभावितः विप्रकारः परिभवो यया तामिति बहुव्रीहिःसमासः। *वाचं* वाक्यं *आसाद्य* प्राप्य श्रुत्वेत्यर्थः *उदीचीं* उत्तरां *काष्ठां* दिशं *आसाद्य* प्राप्य "दिशश्च कुकुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः *तिग्मरश्मिरिव* तिग्माः प्रखराः रश्मयः किरणाः यस्य सः सूर्यः इव *भृशं* अत्यन्तम् *दिदीपे* जज्वाल ॥

सरलार्थः

यथाहि उत्तरां दिशं प्राप्तः सूर्यस्तेजसा ज्वलति, तथैव सोऽर्जु-

नोऽपि द्रौपदीकथितां विस्मृतानामपि शत्रुकृतपराभवाणां स्मारकतया पुनर्नवीकृत्य प्रतिपादयित्रीं तां वाणीमाकर्ण्य अभिमानोष्मणा नितरां ज्वलितोऽभवत् अत्र तिग्मरश्मिनोपमानेन उपमेयभूतस्यार्जुनस्य बिम्बप्रतिबिम्बन्यायेन साम्यप्रतिपादनादुपमालङ्कारः ॥

-✲-

एवं तेजसा प्रज्वलितस्यार्जुनस्य तात्कालिकीं शरीरावस्थामाह–अथेत्यादि ।

अथाभिपश्यन्निव विद्विषः पुरः,
पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं,
गतः क्रियां मन्त्र इवाभिचारिकीम् ॥५६॥

अन्वयः

अथ, विद्विषः, पुरः, अभिपश्यन् इव, पुरोधसा, आरोपितहेतिसंहतिः, सः, रम्यः, अपि, आभिचारिकीं, क्रियां, गतः, मन्त्रः, इव, भीषणं, वपुः, बभार ॥

वाच्यान्तरम्

अभिपश्यता...आरोपितहेतिसंहतिना तेन रम्येण....गतेन मन्त्रेण...बभ्रे ॥

व्याख्या

***अथ* उद्दीपनानन्तरम् *विद्विषः* शत्रून् *पुरः* अग्रतः *अभिपश्यन् इव* आभिमुख्येनावलोकयन् इव स्थितः *पुरो-**

धसा* पुरोहितेन "पुरोधास्तु पुरोहितः"इत्यमरः धौम्येन *आरोपितहेतिसंहतिः* आरोपिता यथास्थानं निबद्धा हेतीनां आयुधानां संहतिः समूहः यस्य सः इति बहुव्रीहिः "हेतिर्ज्वालाङ्कुरायुधे" इति वैजयन्ती *सः* पार्थः *रम्यः* सौम्यः सन् अपि *आभिचारिकीं क्रियां* अभिचारः परहिंसा प्रयोजनं यस्याः तां "हिंसा कर्म्माभिचारः स्यात्"इत्यमरः मरणादिक्रियां *गतः* प्राप्तः मारणादिकर्म्मणि प्रयुक्त इत्यर्थः *मन्त्र इव* तत्तद्देवताको मन्त्रो यथा तथैव *भीषणं* भयावहं *वपुः* शरीरं *बभार* धृतवान् ॥

सरलार्थः

यथा देवताप्रसादजनकतया परमरमणीयोऽपि मन्त्रो मारणाद्यभिचारकर्म्मसु प्रयुक्तो भीषणाकारो भवति तथा पार्थः प्रकृत्या रम्याकारोऽपि पुरोधसा यदा तस्याङ्गे हेतिसमूहो निबद्धस्तदा भीषणाकारो जातः तदानीं स पार्थः शत्रून् पुरतोऽवलोकयन्निव क्रोधेन नितरां स्फीतो बभूव ॥ अत्र मन्त्रपार्थयोर्बिम्बप्रतिबिम्बभावेन तुल्यताख्यापनादुपमालङ्कारः, विद्विषः पुरः पश्यन्निवेत्युत्प्रेक्षा च तदङ्गम् इति द्वयोरङ्गाङ्गिभावसंकरः ।

-x-

अथ त्रिभिः श्लोकैरर्जुनस्य तपश्चरणाय यात्रां वर्णयति- अविलङ्घ्येत्यादि ।

अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म कार्मुकम् ।

अगतावरिदृष्टिगोचरं

शितनिस्त्रिंशयुजौ महेषुधी ॥५७॥

अन्वयः

परैः, अविलङ्घ्यविकर्षणं, प्रथितज्यारवकर्म्म, कार्म्मुकं, अरिदृष्टि-गोचरम्, अगतौ, शितनिस्त्रिंशयुजौ, महेषुधी, (उद्वहन् तपोभृतां हृदयानि समाविवेश) ॥

वाच्यान्तरम्

उद्वहता ॥

व्याख्या

*परैः*शत्रुभिः *अविलङ्घ्यविकर्षणम्* न विलङ्घ्य-मतिक्रमणीयं विकर्षणमाकर्षणं यस्य तत् बहुव्रीहिः समासः अन्यैरनिवार्याकर्षणमव्यर्थसन्धानमित्यर्थः *प्रथितज्यारव-कर्म्म* प्रथितः विख्यातः ज्यायाः रवः ध्वनि. कर्म्म बाणमोक्षणा-दिकं च यस्य तत् बहुव्रीहिसमासः यस्य टङ्कारध्वनिबाणनिक्षेपा-दिकार्यमतिप्रसिद्धं तादृशं *कार्मुकं* धनुः उद्वहन् इत्यनेन अन्वयः । तथा *अरिदृष्टिगोचरं* अरीणां शत्रूणां दृष्टिगोचरं दर्शनपथं अगतौ अप्राप्तौ *शितनिस्त्रिंशयुजौ* शितः तीक्ष्णः निस्त्रिंशः खड्गः तेन युजौ युक्तौ *महेषुधी* महान्तौ अति-विशालौ इषुधी तूणौ *उद्वहन्* दधानः सोऽर्जुनस्तपोभृतां हृदयानि समाविवेशेति परेणान्वयः ॥

सरलार्थः

अथार्जुनस्तपस्यार्थं यास्यन् अव्यर्थसन्धानं विशालं कार्मुकं तथा विशालौ द्वौ तूणौ च दधानः तपस्विनामपि चित्तमखेदयत् ॥

कौमुदी

'निस्त्रिंश' इति निर्गतस्त्रिंशतः अङ्गुलीभ्यः निस्त्रिंशः खड्गः 'ड'प्रत्यये संख्यायाः तत्पुरुषस्योपसंख्यानादिति समासान्तः। शितः निस्त्रिंश इति कर्म्मधारयः। तेन युज्येते इति "सत्सूद्विष" इत्यादिना क्विप् उपपदःसमासः। महेषुधी इति इषवः धीयन्ते अनयोरिति वाक्ये "कर्म्मण्यधिकरणे चेति" किप्रत्ययः। महान्तौ च तौ इषुधी चेति कर्म्मधारयः। "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः" इत्यमरः ॥

-x-

उक्तमेवायुधारोपणं पूर्वश्लोकेन वर्णयितुमुपक्रान्तं सावशेषमाह—यशसेवेत्यादि।

यशसेव तिरोदधन्मुहु-
महसा गोत्रभिदायुधक्षतीः
कवचं च सरत्नमुद्वहन्
ज्वलितज्योतिरिवान्तरं दिवः ॥५८॥

अन्वयः

गोत्रभिदायुधक्षतीः, यशसा, इव, महसा मुहुः, तिरोदधत्, सरत्नं,

ज्वलितज्योतिः, दिवः, अन्तरम् इव, कवचम्, च, (उद्वहन् तपोभृतां हृदयानि समाविवेश) ॥

वाच्यान्तरम्

उद्वहता ॥

व्याख्या

***गोत्रभिदायुधक्षतीः* गां पृथिवीं त्रायन्ते रक्षन्ति इति गोत्राः पर्वताः तान् भिनत्ति इति गोत्रभिद् इन्द्रः तस्य आयुधं अस्त्रं तस्य क्षतयः रन्ध्राः ताः खाण्डवदाहसमये युधि इन्द्रास्त्र-प्रहारजनितव्रणाङ्कान् *यशसा* कीर्त्या इव *महसा* तेजसा शरीरकान्त्या इत्यर्थः *मुहुः तिरोदधत्* अतिशयेन आच्छा-दयन् *सरत्नं* रत्नेन हीरकादिना सहितं अत एव *ज्वलित-ज्योतिः* ज्वलितानि प्रज्वलितानि ज्योतींषि तारकाः यस्मिन् तत् *दिवः* आकाशस्य *अन्तरं इव* मध्यं इव *कवचं* वर्म्म उद्वहन् तपोभृतां हृदयानि समाविवेशेत्यन्वयः ॥**

सरलार्थः

तदानीं पार्थः हीरकादिरत्नखचितं समुज्ज्वलं वर्म्म सर्वाङ्गेषु समाच्छादितवान् । पुरा खाण्डवदाहावसरे इन्द्रेण सह संग्रामे तदस्त्र-प्रहारजनिता ये व्रणाङ्काः ते मूर्त्तिमता यशसा इव तस्य वर्म्मणस्तेजसा तिरोहिताः । रत्नानां भासा तद् वर्म्म नक्षत्र शोभितमाकाशमिवादृश्यत ॥ अत्र यशसेव महसेति उत्प्रेक्षालङ्कारः ज्वलितज्योतिः दिवः अन्तरमिव कवचं इति उपमालङ्कारश्च एतयोर्निरपेक्षतयावस्थानात् संसृष्टिः ॥

कौमुदी

"ज्योतिस्ताराग्निभाज्वलादृक्पुत्रार्थ........"इतिवैजयन्ती। "शीर्षण्यं च शिरस्त्रे" इत्यमरः।

-x-

यक्षोपदिष्टेन मार्गेण गमनमाह–अलकाधिपेत्यादि ॥

अलकाधिपभृत्यदर्शितं
शिवमुर्वीधरवर्त्म संप्रयान्।
हृदयानि समाविवेश स
क्षणमुद्बाष्पदृशां तपोभृताम् ॥५९॥

अन्वयः

सः, अलकाधिपभृत्यदर्शितं, शिवं, उर्वीधरवर्त्म, सम्प्रयान्, क्षणम्, उद्बाष्पदृशां, तपोभृतां, हृदयानि, समाविवेश ॥

वाच्यान्तरम्

तेन......सम्प्रयाता......समाविविशिरे ॥

व्याख्या

सः अर्जुनः *अलकाधिपभृत्यदर्शितं *शिवं* मङ्गलमयम् निर्बाधमिति भावः *उर्वीधरवर्त्म* उर्वीं पृथिवीं धरति इति उर्वीधरः पर्वतः तस्य वर्त्म मार्गम् तपस्यार्थं गन्तव्यपर्वतस्य मार्गं अभिलक्ष्य *सम्प्रयान्* गच्छन् *क्षणं* अल्पमेव कालं न तु चिरम् *उद्बाष्पदृशाम्* उद्गतः बाष्पः ययोः ते उद्बाष्पे निर्गतबाष्पे जलभराक्रान्ते इत्यर्थः दृशौ नयने येषां तेषां

जलभराक्रान्तनयनानामित्यर्थः ॥ अर्जुनविरहदुःखेन साश्रुनेत्राणाम् इतियावत् *तपोभृतां* तपो बिभ्रति ये तेषाम् द्वैतवनवासिनां तपस्विनामित्यर्थः *हृदयानि* चित्तानि *समाविवेश* खेदयामास शोकाकुलानि चकार इत्यर्थः ॥

सरलार्थः

मुनेर्वेदव्यासस्यादेशेन खड्गकार्मुकतूणीरादिकमस्त्रजातं दधानो वर्म्म च परिदधानः पार्थः मुनिवचनात् स्वसाहाय्याय समागतेन तेन यक्षेण सह निर्बाधं मार्गं समालम्ब्य यदा गन्तुमुपक्रमतेस्म तदा द्वैतवनवासिनस्तपस्विनोऽपि तद्विरहदुःखेन क्षणम् शोकव्याकुलाः साश्रुनयना जाताः ॥

कौमुदी

सम्प्रयानिति सम्प्रपूर्वकयाधातोः शत्रन्तस्य रूपम् । क्षणमिति अत्यन्तसंयोगे द्वितीया ॥

-※-

जगतो हितायैवार्जुनस्तपश्चरितुं गच्छतीति देवा अपि तद्गमनमभिनन्दन्ति स्मेत्याह-अनुजगुरित्यादि ।

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥६०॥

अन्वयः

अथ, आशाः, दिव्यं, दुन्दुभिध्वानं, अनुजगुः, व्योम्नि, सुरकुसुमनिपातैः, लक्ष्मीः वितेने, अनिभृतवेलावीचिबाहुः, पयोधिः, प्रियं, कथयिष्यन्, इव, स्फुरन्तीं, भुवं, आलिलिङ्ग ॥

वाच्यान्तरम्

अथ आशाभिः दिव्यः दुन्दुभिध्वानः अनुजगे व्योम्नि सुरकुसुमनिपाताः लक्ष्मीं वितेनु, अनिभृतवेलावीचिबाहुना पयोधिना प्रियं कथयिष्यता इव स्फुरन्ती भूः आलिलिङ्गे ॥

व्याख्या

अथ प्रस्थानारम्भानन्तरम् *आशाः* दिशः "आशाश्च ककुभः काष्ठाः दिशश्च हरितश्च ताः" इत्यमरः *दिव्यं* दिवि भवम् "दिगादिभ्यो यत्" इति 'यत्'प्रत्ययः *दुन्दुभिध्वानं* दुन्दुभिशब्दं *अनुजगुः* दध्वनुः *व्योम्नि* आकाशे *सुरकुसुमनिपातैः* सुराणां देवानां कुसुमनिपातैः पुष्पवृष्टिपातैः *लक्ष्मीः* शोभा *वितेने* विस्तारिता सम्पादितेत्यर्थः *अनिभृतवेलावीचिबाहुः* न निभृताः निश्चला इति अनिभृताः चपलाः इत्यर्थः वेलानां नीराणां या वीचयस्तरङ्गाः "भङ्गस्तरङ्ग उर्म्मिर्वा स्त्रियां वीचि"रित्यमरः, ता एव बाहवो भुजा यस्य सः *पयोधिः* समुद्रः *प्रियं* प्रीतिकरं वचनं *कथयिष्यन् इव* निवेदयिष्यन्निव *स्फुरन्तीं* उल्लसन्तीं भुवं* पृथवीं *आलिलिङ्ग* परिष्वक्तवान् ॥

सरलार्थः

पार्थो यदा शत्रुजयाय तपस्यार्थम् हिमगिरिमभिप्रस्थितस्तदा देवा दुन्दुभिध्वानेन तद्गमनमभिनन्दन्ति स्म आकाशे समन्तात् पुष्पवृष्टिं विधाय मङ्गलाचारमकुर्वन्। समुद्रश्च पृथिवीं शीघ्रमेव ते असुरविनाशेन भारलाघवं भविष्यतीति प्रियां वार्त्तां चञ्चलतरङ्गरूपैर्बाहुभिः समालिङ्ग्य कथयितुमुपचक्रमे इव। ततो भूरपि तां शुभां वार्त्तां श्रुत्वा स्फुरति स्म। अत्र वीचिबाहुरित्यत्र वीचिषु बाहुत्वारोपाद्रूपकम् प्रियं कथयिष्यन् इवेत्युत्प्रेक्षायाः अङ्गम् पयोधिर्भुवमालिलिङ्गेतिलिङ्गसाम्यात् पयोधौ नायकव्यवहारप्रतीतेः समासोक्तिश्चोक्तोत्प्रेक्षासहभावेनैकाश्रयेण श्रिता सती तदङ्गीभूता समृद्धिमद्वस्तुवर्णनादुदात्तालङ्कारश्चेत्यलङ्काराणां सङ्करः।

कौमुदी

दिव्यमिति "दिवादिभ्यो यत्" इति 'यत्' प्रत्ययः। अनुजगुरिति-गायतेर्लिट्। व्योम्नीत्यधिकरणे सप्तमी।

-x-

इति किरातार्जुनीये महाकाव्ये तृतीयः सर्गः समाप्तः॥

किरातार्जुनीयस्य सर्गत्रये प्रश्नाः,

संख्याङ्कैः श्लोका अवगन्तव्याः

(१९१०)

१ म सर्गस्य ६।३६
२ य ,, ८।२४।४३
३ य ,, १६।२५।५१

कोपविग्रहप्रदर्शनपूर्वकं दण्डान्वयेन व्याख्येया एते श्लोकाः केवलं टीकानुपूर्वीलेखो निष्फलः स्यादिति च स्मरणीयम् ।

(१९११)

म सर्गस्य १७।४०
: य ,, ८।३१
य ,, १२।२०।३२।५३

कोपविग्रहप्रदर्शनपूर्वकं दण्डान्वय- लम्ब्य व्याख्येया अमी श्लोकाः, केवलं टीकानुपूर्वीलेखो निष्फलः स्यादि।त चावधेयम्. ।

(१९१२)

१ म सर्गस्य ५।२४।४६
२ य ,, ३।५८
३ य ,, ३२।३५।४२

एतानि पद्यानि प्रतिशब्दं पर्यायैः कोषविग्रहभावार्थनिरूपणपूर्वकं व्याख्येयानि, केवल टीकानुपूर्वीलेखे त्वंकलाभो न भवेत् ।

(१९१३)

१ म सर्गस्य १६।३६
२ य ,, ६।५६
३ य ,, २०।३३।६०

एते श्लोकाः खण्डान्वयेन प्रतिशब्दं पर्यायैः कोपविग्रहभावार्थनिरूपणसहितं व्याख्येयाः ।

(१९१४)

१ म सर्गस्य १९।२४।४६
२ य ,, ४।५७
३ य ,, ४०।४६

एते श्लोकाः दण्डान्वयेन प्रतिशब्दं पर्यायैः कोपविग्रहभावार्थनिरूपणसहितं व्याख्येयाः ।

(१९१५)

१ म सर्गस्य ३१।४५
२ य ,, ३।१२।२३
३ य ,, ३।५३

एते श्लोकाः दण्डान्वयेन प्रतिशब्दं पर्यायैः कोपविग्रहभावार्थनिरूपणपूर्वकं व्याख्येयाः ।

(१९१६)

१ म सर्गस्य १६।२४
२ य ,, ४।२३।५८
३ य ,, ३५।५६

एते श्लोका. प्रतिशब्दं पर्यायैः व्याकृतिच्छन्दःकोपविग्रहाभिप्राय-निरूपणपूर्वकं स्पष्टं व्याख्येयाः ।

(१९१७)

१ म सर्गस्य १५।४३
२ य ,, ६।३१।५०
३ य ,, ३३।४७

एते श्लोकाः कथासन्दर्भपूर्वकं कोपसमासपर्यायमनुसृत्य दण्डान्वयेनैव व्याख्येयाः ।

(१९१८)

१ म सर्गस्य १३।३१।४१
२ य सर्गस्य ९।२३।५३
३ य सर्गस्य ३५।४६

एते श्लोकाः सुस्पष्टं कथासन्दर्भपूर्वकं दण्डान्वयमनुसृत्य व्याख्येयास्तत्र कोशसमासपदपर्याया अपि प्रदर्शनीयाः ।

(१९१९)

१ म सर्गस्य २।१३।३
२ य सर्गस्य ३।१३।[illegible]
३ य सर्गस्य २।४

पर्यायकोशसमासान् स[illegible]

भावार्थप्रदर्शनपूर्वकमेते श्लोका व्याख्येयाः ।

(१९२०)

१ म सर्गस्य	११।२८।४३
२ य सर्गस्य	८।३५
३ य सर्गस्य	११।३३।५५

एतेषां व्याख्यासु कथासन्दर्भसमासविग्रहकोशाः प्रदर्शनीयाः पर्यायशब्दा नुप्रवेशेन वा केवला न्वयप्रदर्शनेन न सम्यगङ्क लाभ इति ।

(१९२१)

१ म सर्गस्य	३।२०।३७
२ य सर्गस्य	१२।४१।५६
३ य सर्गस्य	१३।५३

(अ) टीकाक्रमेण सुव्याख्येया सर्वे श्लोकाः केवलान्वयप्रदर्शनेन टीकानुपूर्वीलेखेन वा नाङ्कलाभ इति।

(१९११) (क) चतुर्थपञ्चमषष्ठश्लोकानां तात्पर्यं सरलसंस्कृतेन लेख्यम् ।

(१९२२)

१ म सर्गस्य	१४।३३।४०
२ य सर्गस्य	८।५७
३ य सर्गस्य	२५।३७।५०

कोषविग्रह-भावप्रदर्शनपुरस्सरं दण्डान्वयमवलम्ब्य निजसंस्कृतेनैते श्लोका व्याख्येयाः केवलं टीकानुपूर्वीलेखेऽङ्कलाभो न भविष्यति ॥

(१९२३)

१ म सर्गस्य	१५।४५
२ य सर्गस्य	१२।३१।४८
३ य सर्गस्य	१८।२५।३५

कोशविग्रहभावप्रदर्शनपुरस्सरं दण्डान्वयमवलम्ब्य निजसंस्कृतेनते श्लोका व्याख्येयाः केवलं टीकानुपूर्वीलेखेऽङ्कलाभो न भविष्यति ॥

(१९२४)

१ म सर्गस्य	२६।३५।४२
२ य सर्गस्य	१२।५७
३ य सर्गस्य	५।३२।३७

एते श्लोकाः कोषविग्रहभावप्रदशनमुखेन दण्डान्वयमवलम्ब्य

स्फुटं व्याख्येया: टीकानुपूर्वीलेखेऽङ्कलाभो न भविष्यति ।

(१९२५)

१ मसर्गस्य ४ क।३८ ख,
२ य सर्गस्य ४ ग,
३ य सर्गस्य २० घ,

(१) वक्तृनिर्देशपुरस्सरं मल्लिनाथरीत्या व्याख्यायन्तामिमे श्लोकाः ।

(२) 'क' चिन्हितश्लोकस्याऽऽद्यं चरणद्वयं वाच्यान्तरे परिणम्य 'अत' इत्यस्य कोऽर्थः "असाधु" 'साधु वे'ति च कस्य विशेषणं तल्लिख्यताम् ।

(३) 'राजानश्चारचक्षुष' इति किमपि प्रमाणमुद्धृत्य समर्थ्यताम् ।

(४) 'गरीयसि' 'जिघत्सन्तम्' इतिपदद्वयं कथं निष्पन्नं तन्निरूप्य 'महाधन" स्तुतिगीतिमङ्गलैः' 'परिणामसुखे' "परिस्फुरल्लोलशिखाग्रजिह्वम्" एतेषामधोरेखाङ्कितपदानां समासनामानि विग्रहवाक्यानि च प्रदर्श्यन्ताम् ।

(५) सरलसंस्कृतभाषया पद्यांशानामेषां तात्पर्यं विशदीक्रियाम्—

(क) १ प्रथमसर्गस्य ८
(ख) १ द्वितीयसर्गस्य २१
(ग) ३ तृतीयसर्गस्य ३१।५७

(१९२६)

१ म सर्गस्य १७।४६
२ य सर्गस्य ३६।४३।५८
३ य सर्गस्य ३२।५१

कोशविग्रहतात्पर्यादिनिरूपणपूर्वकं व्याख्येया अमी श्लोकाः

(१९२७)

व्याख्यायन्तामिमे श्लोकाः

(१) क प्रथमसर्गस्य ३१
(२) ख द्वितीयसर्गस्य ३१
(३) ग तृतीयसर्गस्य ४

(२) "भारवेरर्थगौरव" मित्याभाणकं निपुणं विचार्य्यताम् ।

(३) अधस्तनश्लोकांशानां किमपि चतुष्टयं सन्दर्भसम्बन्धनिदर्शनपुरस्सरं व्याख्येयम् ।

(क) परैति कार्श्यं यशसा समं वपुः (ख) ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ।

(ग) क्रियते पतिरुच्चकैरपां भवता धीरतयाऽधरीकृतः ।

(घ) निरास्पदं प्रश्नकुतूहलित्वम्, संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥

(४) वनेचरोक्तदुर्योधनवृत्तान्तः संक्षेपेणोपवर्ण्यताम् ।

(५) क ३३ अत्र केषांचिन्मते जन्तुप दंसदोषं कोऽसौ दोषःकथंवा :(विद्विषादरः)इत्यत्र मल्लिनाथमते द्विधापदच्छेदः कथंसमर्थनीयः,

(ब) द्वितीयसर्गस्य ४१ श्लोकस्यास्य तात्पर्यार्थःसरलसंस्कृतेन प्रकटनीयः(विनयन्ते) इत्यत्र कथमात्मनेपदम् ।

(१) संशय्य कर्णादिषु तिष्ठते य—अत्र सूत्रोद्धारपूर्वकमात्मनेपदप्रयोगं समर्थ्य पादस्य वाक्यार्थः स्पष्टीक्रियताम् ।

(१९२८)

३ य सर्गस्य	५
२ य सर्गस्य	१२।५२
१ म सर्गस्य	३१।२४
३ य सर्गस्य	५२
२ य सर्गस्य	४३

(१) ते श्लोका व्युत्पत्तिकोशपर्य्यायप्रदर्शनपुरस्सरं दण्डान्वयेन व्याख्येयाः

(२) अनाप्तपुण्योपचयैर्दुरापा, भवद्दर्शनसम्पदेषा, वीतबलाहकायाः (३ य स ५)

कृतपञ्चाङ्गविनिर्णयो नयः (२ य स—१२) विपदन्ताह्यविनीतसम्पदः (२ य स-५२) गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी (१ म स-३१) गुणानुरागेण (१ म स-२१) पदानामेतेषां समासा अवश्यं लेख्या टीकानुपूर्व्वीलेखनेन नांकप्राप्तिर्भविष्यति ।

(१९२९)

१ म	सर्गस्य	२४
२ य	,,	३।५३
३ य	,,	११।५८

(१) एतेश्लाकाः कोशविग्रहाभिप्रायादिप्रदर्शनपूर्व्वकं व्याख्येयाः ।

(२) अधोनिर्दिष्टपद्यांशानां प्रकरणसङ्गतिं वक्तृबोद्धव्यनिरूपणपूर्वकं सरलसंस्कृतेनोपवर्णयत—

(क) पराभवोऽप्युत्सव एव मानिनाम् ।

(ख) कृतोपकारा इव विद्विषस्ते,

(ग) न पूरणी तं समुपैतिसंख्या,

(घ) विपदन्ता ह्यविनीतसम्पदः,

(ङ) न तितिक्षा सममस्ति साधनम् ।

(१९३०)

१ म	सर्गस्य	६
२ य	,,	५०
३ य	,,	३२

(१) एषु त्रिषु पद्येषु कयोश्चिद्द्वयोरन्वयपूर्विका कोषव्याकरणांशगर्भिता सुस्फुटा व्याख्या लेख्या सर्वत्र समस्तपदानां विग्रहवाक्यानि दर्शनीयानि ता पर्यं च पद्यानां दर्शनीय

(२)	१ म	सर्गस्य	१८
	२ य	,,	४
	३ य	,,	

एषु त्रिषु यथेच्छं पद्यद्वय

न्वयं प्रदर्श्य भावार्थः स्वकृतेनसं तथादर्शनीयो यथाल्पमप्यपरिहीणं स्यात् प्रतिपदं पर्यायप्रदर्शनं नावश्यकम् ।
उदारकीर्तेरुदयं १ म स १८)
प्रशान्तबाधं (१ म स-१८)
शरीरजन्मनः (२ य स-४१)
प्रकर्षेण जनातिगेन (३ य स-२)
पदानामेतेषां विग्रहं प्रदर्श्य द्विषतोऽभिरक्षया गुणैरुपस्नुता (१ म स-१८) श्रुतमप्यधिगम्य, शरीरजन्मनः (३-य स-४९) दधतं, समग्रां, जनातिगेन, (३ य स-२) पदेष्वेतेषु च कस्मिन्नर्थे का विभक्तिरिति लेख्यम्

(३) ३ य सर्गस्य ५२

अस्य पद्यस्य भावार्थमात्रं संस्कृतेन प्रदर्शनीयम् मूलाक्षराणां स्पर्शोऽपि न कार्यः ।

४) (क) २ य सर्गस्य ३

३ य ,, १६

अस्मिन् पद्यद्वये कस्यचिदेकाम्याऽन्वयं स्पष्टं विलिख्य हिन्दीभाषया तदभिप्रायः प्रकाश्यतांरेखाङ्कितेषु—

च विगाह्यते,विशेषदुर्लभः,विधाय, विध्वंसमनात्मनीनमित्येषां प्रकृतिप्रत्ययविभागः पृथक् क्रियताम् ।

(५) वरं विरोधोऽपि समं महात्मभिः,प्रवृत्तिसाराः खलु मादृशां गिरः, अगरीयान्न पदं नृपश्रियः, विपदन्ता ह्यविनीतसम्पदः, एषां खण्डानां तात्पर्यं हिन्दीभाषया लिख्यताम् व्याख्या नकार्या ।

(१९३१)

कोषसमासपर्यायसन्दर्भप्रदर्शनपूर्वकमन्वयमुखेन व्याख्येया-अधस्तनश्लोकाः

१ म सर्गस्य २४ (क) ३३ (ख)
२ य ,, ३ (ग) २७ (घ)
३ य ,, ३९ (ङ)

(ग)चिन्हितयोः श्लोकयोर्वक्तृबोद्धव्यनिर्देशः कार्यः

(घ) चिन्हितश्लोके गिरां सामर्थ्यं कीदृशम्

(ङ) चिन्हितश्लोके प्रसिद्धेरित्यत्र का नाम विभक्तिः

वनेचरोक्तदुर्य्योधनराज्यशासनप्रणालीवृत्तान्तः स्वकीयशब्दैरनुद्य लेखनीयः, ३ य सर्ग-६ इत्यादिपद्यस्य वाच्यान्तरे परिणतिर्विधेया भावार्थश्च वर्णनीयः

(१९३२)

१ म सर्गस्य	३२।४३
२ य ,,	१२।३१
३ य ,,	३५

कोषविग्रहसन्दर्भप्रदर्शनपूर्वकं दण्डानवयमवलम्ब्य व्याख्येया अमी श्लोकाः अधस्तनानां पद्यांशानां तात्पर्यार्थमुपवर्ण्य प्रकरणसङ्गतिर्निरूपणीया

(क) अहो दुरन्ता बलवद्विरोधिता

(ख) विपदन्ता ह्यविनीतसम्पदः

(ग) प्रकर्षतन्त्रा हि रणे जयश्रीः

(घ) विश्वासयत्याशु सतां हि योगः

(ङ) भवन्ति भव्येषु हि पक्षपाताः

(१९३३)

१ म सर्गस्य	२४।१३
२ य ,,	३६।५०
३ य ,,	३२।४६

(१) इमे श्लोकाः विग्रहतात्पर्यार्थप्रदर्शनपूर्वकं दण्डान्वयमवलम्ब्य व्याख्येयाः ।

(२) कविकृतं व्यासवर्णनं स्वशब्दैर्लेखनीयम्

(१९३४)

१ म सर्गस्य

२ य ,,

३ य ,,

कोषविग्रहप्रमाणसरलयुतं दण्डान्वयेन व्या क्रियतामेतेषां श्लोकानाम्

❀ समाप्तोऽयं ग्रन्थः ❀

LIBRARY

LAL BAHADUR SHASTRI

National Academy of Administration

MUSSOORIE

Accession No. 125541

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.

Help to keep this book fresh, clean & moving